पुत्राश्चत्वारोऽसुरयाजकाः । त्वष्टाधरस्तथात्रिश्च द्वावन्यौरौद्रकर्मिणौ ॥३७॥ तेजसा सूर्यसङ्काशा ब्रह्मलोकपरायणाः । इत्येषवंशप्रभवः कथितस्तेतरस्विनाम् ॥ ३८ ॥ असुराणांसुराणांच पुराणेसंश्रुतो मया । एतेषांयदपत्यन्तु नशक्यंतदशेषतः ॥३९॥ असंख्यातुंमहीपाल गुणभूतमनन्तकम् । तार्क्ष्यश्चारिष्टनेमिश्च तथैवगरुड़ारुणौ ॥४०॥ आरुणिर्वारुणिश्चैव वैनतेयाःप्रकीर्त्तिताः । शेषोऽनन्तोवासुकिश्च तक्षकश्चभुजंगमः ॥ ४१ ॥ कूर्मश्चकुलिकश्चैव काद्रवेयांप्रकीर्त्तिता । भीमसेनोग्रसेनौच सुपर्णोवरुणस्त था ॥४२॥गोपतिर्धृतराष्ट्रश्च सूर्यवर्च्चाश्चसप्तमः । सत्यवागर्कपर्णश्च प्रयुतश्चापिविश्रुतः ॥४३॥ भीमश्चित्ररथश्चैव विख्यातःसर्व विद्वशी । तथाशालिशिराराजन् पर्ज्जन्यश्च चतुर्दशः ॥४४॥ कलिःपञ्चदशस्तेषां नारदश्चैवषोड़शः । इत्येतेदेवगन्धर्वा मौनेयाः

और दोऔर भयानक कर्मके करने वाले थे जो कि ब्रह्मलोक में तत्पर और तेज में सूर्यकी समान थे । ३७ । इसप्रकार यह तेजस्वी असुर और देवताओंका जैसा कि मैंने पुराणोंमें सुनाथा वह वंश मैंने तुझ से कह दिया ।३८। इनकी जो सन्तानहै वह सम्पूर्णता से हे राजन् कहने को असंख्यहै क्योंकि अनन्त और अप्रधानहै ३९ तार्क्ष्य, अरिष्टनेमी, गरुड़, अरुड़, अरुणी और वारुणी यह विनता की सन्तान कही गई है । ४० । शेष, अनन्त वासुकि तक्षक, कूर्म, कुलिक, यह कद्रुकी सन्तान है । ४१ । भीमसेन, उग्रसेन, सुपर्ण वरुण, गोपति, धृतराष्ट्र, और सातवां सूर्यवर्चा सत्यवाक अर्कपर्ण, प्रसिद्ध प्रयुत, भीम, चित्ररथ, (जोकि प्रसिद्ध और सबका जानने वालाथा) और शालि शिरा और हेराजन् चौदहवां पर्जन्य था और पन्द्रहवां कलि, सोलहवां नारद यह देवताओं में गन्धर्व मुनि की सन्तान हैं । ४४ । हे जनमेजय इस के उपरान्त बहुत से और भी कहता हूं

---

are countless and not noteworthy. The sons of Vinata were Tarkhya, Arishtanemi, Garur, Arun, Aruni and Varuni. Among the sons of Kadru, Shes, Vasuki, Takshak, Kurm and Kulik are well known. The sons of Muni were Bhimsen, Ugrasen, Saparn, Varun, Gopati, Dhritrhshtra, Suryavarch, Satyavak, Arkaparn, Prayut, Bhim, Chitrarath of great fame and learning and controller of his passions, Shalishir, Parjanya, Kali, and Varad. I shall name many others, O Bharat. Anavadya, Manu, Vans Asura, Margan-pria, Anupa, Suvag and Vasi were the daughters of Pradha; Sidha, Rerna, Varhi, Purnayu of great fame, Brahmchari, Ratiguna, Viswavasu, Vrun, Shuehandra, were the sons or Pradha; and some of them were gods and others Gandharvas. Pradha also gave birth to the race

परिकीर्त्तिताः ॥४५॥ अथमसूतान्यन्यानि कीर्त्तयिष्यामिभारत । अनवद्यांमनुं वंशा मसुरांमार्गणप्रियाम् ॥ ४६ ॥ अरूपांसुभगांभासी मितिप्राधाव्यजायत । सिद्धः पूर्णश्चवर्हीच पूर्णायुश्चमहायशाः ॥ ४७ ॥ ब्रह्मचारीरतिगुणः सुपर्णश्चैव सप्तमः । विश्वावसुश्चभानुश्च सुचन्द्रोदशमस्तथा ॥ ४८ ॥ इत्येतेदेवगन्धर्वाः प्राधेयाः परिकीर्त्तिताः । इमंत्वप्सरसांवंशं विदितंपुण्यलक्षणम् ॥ ४९ ॥ प्राधासूतमहाभागा देवी देवर्षितःपुरा । अलम्बुषामिश्रकेशी विद्युत्पर्णा तिलोत्तमा ॥ ५० ॥ अरुणा रक्षिता चैव रम्भातद्वन्मनोरमा । केशिनी च सुबाहुश्च सुरता सुरजातथा ॥ ५१ ॥ सुप्रियाचातिबाहुश्च विख्यातौ च हाहाहूहूः । तुम्बुरुश्चेतिचत्वारः स्मृतागन्धर्व सत्तमाः ॥५२॥ अमृतंब्राह्मणागावो गन्धर्वाप्सरसस्तथा। अपत्यं कपिलायास्तुपुराणे परिकीर्त्तितम् ॥ ५३ ॥ इतितेसर्वभूतानां सम्भवः कथितो मया । यथावत्सम्परि-

---

अनवद्या, मनु, वंशा, असुरा, मार्गणप्रिया, अरूपा, सुभगा, भासी, यह प्राधाकी संतान है सिद्ध, पूर्ण, वर्ही, बड़े यशवाला पूर्णायु ब्रह्मचारी, रतिगुण और सातवां सुपर्ण, विश्वावसु, भानु और दशवां सुचन्द्र यह इतने देवताओं के गन्धर्व प्राधाकी सन्तान कही गई है और यह पवित्र लक्षणवाला प्रसिद्ध अप्सराओं का वंश जोकि बड़े भागवाली देवी प्राधाने देवर्षिद्वारा उत्पन्न किया वह यह है—अलम्बुषा, विद्युतपर्णा, तिलोत्तमा, अरुणा रक्षिता, और मनोरमा, रम्भा, केशिनी, सुबाहु, सुरता, सुरजा, सुप्रिया, अतिबाहु और हाहा, हूहू, तुम्बुरु यह चार गन्धर्वों में श्रेष्ठ गन्धर्व कहे गये हैं । ५२ । अमृत, ब्राह्मण गऊ, गन्धर्व, अप्सरा, पुराणों में यह कपिलाके सन्तान कहे हैं । ५३ । यह संपूर्ण प्राणियोंकी उत्पत्ति मैंने तुझसे कही है गन्धर्व और अप्सराओंकी उत्पत्तिभी मैंने तुझसे कही है गन्धर्व और अप्सरा सर्प सुपर्ण रुद्र मरुत् गुरु ब्राह्मण जोकि शोभायुक्त और

---

of Apsaras. Alamvush, Misrakeshi, Vidyutparn, Tilottama, Arun, Rakshita, Rambha, Manorama, Keshini, Suvahu, Surata, Suaraja and Supria were the Apsara daughters and Ativahu, Hapa, Hahu and Tumvaru were the famous Gandharvs sons Pradha. The Purans say that Amrit, the Brahmans, cows, Gandharvas and Apsaras were the offspring of Kapila. I have now recited the birth of all the creatures duly—of Gandharvs, Apsaras, Snakes, Suparnas, Marutts, Cows, Brahmans, blessed with great good fortune and of sacred deeds. This account increases the life, is sacred, worthy of all praise, and gives pleasure to the ear. It should be always read recited to others with steadiness of mind. He who properly reads this account of the birth of high-souled creatures, in the presence of

ख्यातो गन्धर्वाप्सरसांतथा ॥ ५४ ॥ भुजंगानांसुपर्णानां रुद्राणां मरुतां तथा । गवांच ब्राह्मणानाञ्च श्रीमतांपुण्यकर्मणाम् ॥ ५५ ॥ आयुष्यश्चैव पुण्यश्च धन्यः श्रुतिसुखावहः । श्रोतव्यश्चैव सततं श्राव्यश्चैवानसूयता ॥ ५६ ॥ इमन्तु वंशंनियमेनयःपठेन् महात्मनांब्राह्मणदेवसन्निधौ । अपत्यलाभंलभते स पुष्कलं श्रियंयशः प्रेत्यचशोभनांगतिम् ५७ ॥

इत्यादि पर्वणि सम्भवपर्वण्यंशावतरणे पञ्चषष्टोऽध्यायः ६५ ॥



वैशम्पायन उवाच ॥ ब्रह्मणोमानसा पुत्रा विदिताःषण्महर्षयः । एकादशः सुताः स्थाणोः ख्याताःपरम तेजसः १ मृगव्याधश्चसर्पश्च निर्ऋतिश्चमहायशाः । अजैक पाद हिर्बुध्न्यः पिनाकी च परन्तपः ॥ २ ॥ दहनोऽथेश्वरश्चैव कपालीचमहाद्युतिः

पुण्यवान् हैं उन के वंशकी यह कथा आयु और पुण्य धन के बढानेवाली और कानोंको आनन्दकी देनेवाली है और यह कथा कुतर्क को छोड़कर सदैव सुननी और सुनानी चाहिये । ५५ । इस वंशकी कथाको जो पुरुष नियम पूर्वक महात्मा ब्राह्मण और देवताओं के समीप पढ़ता है वह बहुतसी सन्तान लक्ष्मी यश और मरकर उत्तम गति को प्राप्तहोता है ५७ ॥

अध्याय ६६ ॥

वैशम्पायन ने कहा ब्रह्मा के मन से उत्पन्न हुए ६ पुत्र प्रसिद्ध हैं और सातवें स्थाणु के बड़े प्रसिद्ध ११ पुत्र हुए । १ । मृग, व्याध, सर्प, निर्ऋति जोकि बड़ायश स्वीथा अजैकपाद, अहिर्बुध्न्य, पिनाकी, दहन ईश्वर बड़ी कान्तिवाला कपाली, स्थाणु

---

the gods and Brahmans, obtains large progeny, good fortune and attains also the excellent worlds hereafter.

CHAPTER LXVI

(SAMBHAV PARV CONTINUED)

Vaishampayan said, " It is known that Brahma had six great Rishis for his spiritual sons. There was another named *Sthanu* who had eleven sons gifted with great energy. They were *Mrigvyadha*, *Sarp*, *Nirite*, *Ajaekapad*, *Ahirvadhan*, Pinaki, Dahan Ishwar,

स्थाणुर्भगश्च भगवान् रुद्रा एकादश स्मृताः ॥ ३ ॥ मरीचिरंगिरा अत्रिः पुलस्त्यः पुलहः क्रतुः । षडेते ब्रह्मणः पुत्रा वीर्य्यवन्तो महर्षयः ॥ ४॥ त्रयस्त्वंगिरसःपुत्रालोके सर्वत्रविश्रुताः । बृहस्पतिरुतथ्यश्च सम्वर्त्तश्च धृतव्रताः ॥ ५ ॥ अत्रेस्तु बहवः पुत्राः श्रूयन्ते मनुजाधिप । सर्वे वेदविदः सिद्धाः शान्तात्मानो महर्षयः ॥ ६ ॥ राक्षसाश्च पुलस्त्यस्य वानराः किन्नरास्तथा । यक्षाश्चमनुजव्याघ्र पुत्रास्तस्यच धीमतः ॥ ७ ॥ पुलहस्य सुता राजञ्छलभाः परिकीर्त्तिताः । सिंहाः किंपुरुषाव्याघ्रा यक्षा ईहामृगास्तथा ॥ ८ ॥ क्रतोःक्रतुसमाःपुत्रा पतंगसहचारिणः । विश्रुतास्त्रिषु लोकेषु सत्यव्रतपरायणाः ॥ ९ ॥ दक्षस्त्वजायतांगुष्ठाद्दक्षिणाद्भगवानृषिः । ब्रह्मणःपृथिवीपाल शान्तात्मा सुमहातपाः ॥ १० ॥ वामाद जायतांगुष्ठाद्भार्य्या तस्य महात्मनः ॥ तस्यां पञ्चाशतं कन्याः सएवाजनयन्मुनिः ॥ ११ ॥ ताः सर्वास्त्वनवद्याङ्ग्यः कन्याः

भगवान् भग यह ११ रुद्र कहे हैं । ३ । मरीचि, अंगिरा, अत्रि, पुलस्त्य, पुलह, क्रतु, यह ६ बड़े प्रभावयुक्त ब्रह्मा के पुत्रहैं । ४ । और अंगिराके पुत्र उत्तम व्रतों के धारण करनेवाले सब लोक में प्रसिद्ध बृहस्पति, उतथ्य और सम्वर्त नामसे प्रसिद्ध हैं और हे राजन् अत्रि के बहुत से पुत्र सुनने में आते हैं वह सब वेदके जाननेवाले सिद्ध औरशांत चित्तवाले महर्षि हैं । ६ । और हे मनुष्यों में उत्तम जन्मेजय ! बुद्धिमान् पुलस्त्यकी सन्तान राक्षस, वानर, किन्नर, यक्ष, मनुष्य हुए । ७ । और पुलहकी सन्तान हेजन्मेजय, शलभ, सिंह, किम्पुरुष, व्याघ्र, भेड़िये थे । ८ । और क्रतु के पुत्र जोकि क्रतु के समान थे और सूर्यके साथ रहनेवाले तीनों लोकमें प्रसिद्ध सत्यव्रतमें तत्पर वालखिल्य नामक थे । ९ । ब्रह्मा के दाहिने अंगूठेसे शांति चित्तवाला और बड़ा तपस्वी हे जन्मेजय भगवान् दक्षऋषि हुआ । १० । और ब्रह्मा के बांये अंगूठेसे उस महात्मा दक्षकी स्त्री उत्पन्न हुई उस में ५० कन्या उस महात्मा दक्ष ने उत्पन्नकीं । ११ । वह सब

Kapati, Sthanu and Bhag. These are called the eleven Rudras. The sons of Brahma were Marichi Angira, Atri, Pulastya, Pulah and Kratu. Angira had three famous sons, viz, Vrihaspati, Utathia, Samvart all of rigid vows. Atri had many sons, conversant with the Vedas, great Rishis, crowned with ascetic success and of souls in perfect peace. The sons of Pulastya, O king, were the Rakshases, Monkeys, Kinners, men and Yakshes. The sons of Pulaha were the winged insects, the lions, the Kimpurushas, tha tigers, bears and wolves. The holy sons of Kratu were the companions of the sun and noted for their devotion to truth and virtue. The famous Rishi Daksh, of perfectly peaceful soul and great asceticism, had sprung from the right toe of Brahma. From the left toe of Brahma sprang the wife of Daksh and had fifty daughters of faufless featur-

कमललोचनाः । पुत्रिकाः स्थापयामास नष्टपुत्रः प्रजापतिः ॥ १२ ॥ ददौ स दश धर्माय सप्तविंशतिमिन्दवे । दिव्येन विधिना राजन् कश्यपायत्रयोदश ॥ १३ ॥ नामतोधर्मपत्न्यस्ताः कीर्त्यमानानिबोधमे । कीर्तिर्लक्ष्मीर्धृतिर्मेधापुष्टिःश्रद्धा क्रियातथा ॥ १४ ॥ बुद्धिर्लज्जा मतिश्चैव पत्न्यो धर्मस्य ता दश । द्वाराण्येतानि धर्मस्य विहितानि स्वयम्भुवा ॥ १५ ॥ सप्तविंशति सोमस्य पत्न्यो लोकेषु विश्रुताः । कालस्य नयनेयुक्ताः सोमपत्न्याः शुचिव्रताः ॥ १६ ॥ सर्वा नक्षत्रयोगिन्यो लोकयात्राविधानतः । पैतामहो मनुर्देवस्तस्य पुत्रःप्रजापतिः ॥ १७ ॥ तस्याष्टौ वसवः पुत्र स्तेषां वक्ष्यामि विस्तरम् । धरोध्रुवश्च सोमश्च अहश्चैवानिलोऽनलः ॥ १८ ॥ प्रत्यूषश्चप्रभासश्च वसवोऽष्टौप्रकीर्त्तिताः । धूम्रायास्तुधरः पुत्रो ब्रह्मविद्यो ध्रुवस्तथा ॥ १९ ॥

कन्याएं उत्तम अंग और कमल केसे नेत्रवालीथीं और दक्ष प्रजापति के पुत्र सन्तान न होने से उसने उनको पुत्रिका बनाया । १२ । उस महात्माने दस कन्याएं तो धर्म को व्याहदीं, २७ चन्द्रमा को और हेजन्मेजय दिव्य विधिके साथ १३ कन्याएं कश्यपको दीं । १३ । और यह जो धर्मकी पत्नियें हैं उन के नामोंको सुन कीर्त्ति, लक्ष्मी, धृति, मेधा, पुष्टि, श्रद्धा, क्रिया, बुद्धि, लज्जा, मति, यह दसों धर्मकी पत्नीथीं यह ब्रह्मा के बनायेहुए दस धर्म के द्वारहैं । १५ । और लोक में प्रसिद्ध और समय के प्रत्यक्ष करने में सम्मिलित और पवित्र व्रतवाली २७ चन्द्रमाकी स्त्रियें हैं और यह सब सत्ताईस नक्षत्र नामवाली हैं और लोककी यात्राके विधान के लिये उत्पन्न हुई पैतामह मुनि धर्म था और ब्रह्मा का पुत्र दक्षथा उसकी वसु सम्बन्धिनी कन्या से आठ वसु उत्पन्न हुए और उन के विस्तार को कहूंगा । १७ । धर, ध्रुव, सोम, अहर, अनिल, अनल, प्रत्यूष प्रभास, यह आठ वसु कहे हैं धूम्राका धर पुत्र हुआ और ब्रह्मविद्याका जाननेवाला ध्रुव

es and limbs and eyes like lotus leaves. Daksh the Prajapati, having no sons, treated them as Putrikas (so that he might adopt their sons). He married ten of them to Dharm, twenty seven to Chandra and thirteen to Kashyap. The names of Dharm's ten wives are Kirti, Lakshmi, Dhriti, Medha, Pushti, Sradha, Kria, Budhi, Lajja and Mati. The wives of som (Chandra) were twenty seven, all of sacred vows and employed in indicating time. They are called Nakshattras or Yoginis and assist the courses of the world. Brahma had another son, Manu whose son was Prajapati. The latter had eight sons, called the Vasus whose names are Dhara, Dhruv, Som, Aha, Anil, Anal, Pratyus and Prabhas. Of these Vasus Dhar and the truth knowing Dhruv were born of Dhumra; Chandrama and Shasan were born of Shasa; Aha was the son of

चन्द्रमास्तु मनस्विन्याः श्वसायाः श्वसनस्तथा । रतायाश्चाप्यहः पुत्रः शाण्डिल्याश्च हुताशनः ॥ २० ॥ प्रत्यूषश्च प्रभासश्च प्रभातायाः सुतौस्मृतौ । धरस्य पुत्रो द्रविणो हुतहव्यवहस्तथा ॥ २१ ॥ ध्रुवस्य पुत्रो भगवान् कालो लोकप्रकालनः । सोमस्य तु सुतो वर्चा वर्चस्वी येन जायते ॥ २२ ॥ मनोहरायाः शिशिरः प्राणोऽथ रमण स्तथा । अन्हः सुतस्तथा ज्योतिः शमः शान्तस्तथा मुनिः ॥ २३ ॥ अग्नेः पुत्रः कुमारस्तु श्रीमाञ्छरवणालयः । तस्यशाखोविशाखश्च नैगमेयश्च पृष्ठजः ॥ २४ ॥ कृत्तिकाभ्युपपत्तेश्च कार्त्तिकेयइतिस्मृतः । अनिलस्यशिवाभार्य्या तस्याः पुत्रोमनोजवः ॥ २५ ॥ अविज्ञातगतिश्चैव द्वौ पुत्रावनिलस्यतु ॥ प्रत्यूषस्यविदुः पुत्रमृषिंनाम्नाथदेवलम् ॥ २६ ॥ द्वौपुत्रौदेवलस्यापि क्षमावन्तौसनीषिणौ । बृहस्पतेस्तुभगिनीवरस्त्री ब्रह्मवादिनी ॥ २७ ॥ योगसक्ताजगत् कृत्स्नमसक्ताविचचारह ॥ प्रभासस्यतुभार्य्या

हुआ मनुश्विनी का चन्द्रमा पुत्र हुआ और श्वसा का श्वसन और रताका अहन और शाण्डिल्या का हुताशन, प्रत्यूष और प्रभास यह दोपुत्र प्रभाताके हुए । २० । और धर के पुत्र द्रविण और हुतहव्य हुए और ध्रुवका पुत्र सब संसार का प्रलयकरनेवाला भगवान् कालहुआ । २१ । सोमका पुत्र वर्चा हुआ मनोहरा के तीनपुत्र शिशिर प्राण और रमणहुए । २२ । अहन् के ज्योति, शम, शांति, मुनि यह चारपुत्र हुए शोभायुक्त शरों के बन में स्थानवाला कुमार अग्नि का पुत्रहुआ उसके पश्चात् शाख, विशाख और नैगमेयहुए और कृतिकाओं के सम्बन्धसे उस कुमार को कार्त्तिकेयभी कहते हैं । २४ । अनिलकी भार्या शिवाथी और अनिल के उससे मनोजव और अविज्ञात गति यहदोपुत्र हुए । २५ । और प्रत्यूषका पुत्र देवलनाम ऋषि हुआ और देवल के दयावान् और बुद्धिमान दोपुत्र हुए ब्रह्मा को कहनेवाली और स्त्रियों में उत्तम बृहस्पतिकी बहिन योगा में आसक्त और संसार से विरक्त जोकि सम्पूर्ण जगत्में फिरती थी वह आठवें वसु प्रभ सकी भार्याथी । २७ । शिल्पविद्या का प्रजापति बड़े भागवाला विश्वकर्मा उससे उत्पन्न

Rata; Hutashan of Sandilya; and Pratyush and Prabhas were the sons of Prabhas. Dhara had two sons, Dravin and Hutahavyah. The son of Dhruva is the illustrious Kal, the destroyer of the worlds. Som's son is the glorious Varcha. Varcha had three sons from his wife Man ohara, viz, Shishir, Pran and Ramanu. The son of Anha were Jyoti, Shama, Shanta and Muni. The son of Agni is the handsome Kumar, born in the forest of reeds, also called Kartikeya, because he was reared by Kritika and others. Kartikeya had three younger brothers, Shakha, Vishakh and Naigmeya. The wife of Anil, was Shiva. Anil's sons were Manojava and Avijnatagati by Shiva his wife. The son of Pratyush was Deval, the Rishi. Deval had two sons of great mental power and exceedingly forgiving. The

सा वसूनामष्टमस्यह ॥ २८ ॥ विश्वकर्मामहाभागो जज्ञेशिल्पप्रजापतिः ॥ कर्त्ताशिल्प-
सहस्राणां त्रिदशानांच वर्द्धकः ॥ २९ ॥ भूषणानाञ्चसर्वेषां कर्त्ताशिल्पवतांवरः ॥
योदिव्यानिविमानानि त्रिदशानांचकारह ॥ ३० ॥ मनुष्याश्चोपजीवन्ति यस्यशिल्पं
महात्मनः । पूजयन्तिचमं नित्यं विश्वकर्माणमव्ययम् ॥ ३१ ॥ स्तनन्तुदक्षिणंभित्वा
ब्राह्मणोनरविग्रहः । निःसृतोभगवान्धर्मः सर्वलोकसुखावहः ॥ ३२ ॥ त्रयस्तस्यवराः
पुत्राः सर्वभूतमनोहराः । शमःकामश्चहर्षश्च तेजसालोकधारिणः ॥ ३३ ॥ कामस्यतु
रतिर्भार्य्या शमस्यप्राप्तिरङ्गना । नन्दातुभार्य्याहर्षस्य यासुलोकाःप्रतिष्ठिताः ॥३४॥
मरीचेःकश्यपःपुत्रः कश्यपस्यसुरासुराः । जज्ञिरेनृपशार्दूल लोकानांप्रभवस्तुसः ३५
त्वाष्ट्रीतुसवितुर्भार्य्या वडवारूपधारिणी । असूयतामहाभागा सान्तरिक्षेऽश्विनावुभौ

हुआ जो हजारोंप्रकारकी शिल्पविद्या को प्रकाश करनेवाला और देवताओं का शिल्पीथा । २८ । और सम्पूर्ण प्रकार के आभूषणों का बनानेवाला और शिल्पविद्या में श्रेष्ठ था और जिसने देवताओंके दिव्य विमानों को बनाया । २९ । और जिस महात्माकी शिल्प विद्या को ग्रहणकर इस संसार में आजीवन करते हैं और जिस विकाररहित विश्वकर्मा को पूजित मानते हैं । ३० । ब्रह्मा के दहिने स्तनको तोड़कर मनुष्याकार सम्पूर्ण लोक को सुखका देनेवाला भगवान् धर्म उत्पन्न हुआ । ३१ । सम्पूर्ण संसार के मनोहर और अपने तेज से लोकोंके धारण करनेवाले शम, काम और हर्ष यह तीन उत्तम पुत्र धर्म के उत्पन्न हुए । ३२ । कामकी भार्या रति, शमकी स्त्री प्राप्ति, हर्षकी भार्या नन्दाथी जिन में यह सम्पूर्ण लोक स्थितहैं । ३३ । मरीचि का पुत्र कश्यप था, और कश्यप के हे— जन्मेजय सुर और असुर यह पुत्र उत्पन्न हुए इस से वह कश्यप लोकोंका उत्पादक था । ३४ । और सूर्यकी स्त्री त्वाष्ट्री थी उस बड़े भागवाली ने घोड़ी रूप धारण कर आकाश में दोअश्विनीकुमारों को उत्पन्न किया । ३५ । और अदिति के बारहपुत्र हुए

sister of Virhaspati, the best of women, uttering sacred truth, engaged in asceticism, wandering throuhout the world, became the wife of Prabhas, the eighth Vasu. She was the mother of Vishwakarma, the founder of all arts, architect of the gods, maker of all sorts of ornaments, the first artist, builder of the god's carriages, worshipped by men on account of the many blessings and inventions he gave them, eternal and immutable. The famous Dharm, the dispenser of all happiness, came out of the right breast of Brahma in the human form. He had three beautiful sons, viz, Sham Kam and Harsh, the supporters of the worlds by their energy. The wife to Kam is Rati, to Sham is Prapti, to Harsh is Nanda. The worlds depend on them. The son of Marichi was Kashyap whose offspring are the gods and Asurs. Kashyap is therefore called the father of

॥ ३६ ॥ द्वादशैवादितेःपुत्राः शक्रमुख्यानराधिप । तेषामवरजोविष्णुर्यत्र लोकाः प्रतिष्ठिताः ॥ ३७ ॥ त्रयस्त्रिंशतइत्येते देवास्तेषामहंतव । अन्वयंसम्प्रवक्ष्यामि पक्षैश्च कुलतोगणान् ॥ ३८ ॥ रुद्राणामपरःपक्षः साध्यानां मरुतांतथा । वसूनांभार्गवं विद्या द्विश्वेदेवांस्तथैवच ॥ ३९ ॥ वैनतेयस्तुगरुडो बलवानरुणस्तथा । बृहस्पतिश्च भगवा नादित्येष्वेवगण्यते ॥ ४० ॥ अश्विनौगुह्यकान् विद्धि सर्वौषध्यस्तथापशून् । एतेदेवग णाराजन् कीर्त्तितास्तेऽनुपूर्वशः ॥ ४१ ॥ यान् कीर्त्तयित्वामनुजः सर्वपापैः प्रमुच्यते ब्राह्मणोहृदयंभित्त्वा निःसृतोभगवान्भृगुः ॥४२॥ भृगोःपुत्रःकविर्विद्वांश्छुक्रः कवि- सुतोग्रहः । त्रैलोक्यप्राणयात्रार्थं वर्षावर्षभयाभये ॥ ४३ ॥ स्वयम्भुवानियुक्तः सन भुवनंपरिधावति । योगाचार्यो महाबुद्धिर्दैत्यानामभवद्गुरुः । सुराणांचापिधीमान् ब्र

जिनमें इन्द्र मुख्य हैं और उन में विष्णु सब में लघु है जिसमें तीनों लोक स्थित हैं ३६ तैंतीस देवताहैं उन के वंश को और पक्षोंके साथ कुल और गणों को मैं तुझसे कहूंगा रुद्रोंका पृथक् पक्ष है साध्यों और मरुतों केभी पृथक् २ पक्षहैं, वसु और विश्वेदेवा का भार्गव पक्ष है । ३८ । विनता का पुत्र गरुड अरुण भगवान् बृहस्पति, यह देवताओं में गिने जाते हैं । ३९ । अश्विनीकुमारों और सम्पूर्ण औषधियों और पशुओंकी गुह्यक संख्या है हेराजन् जनमेजय यह देवतागण क्रम से तुझसे कह दिया मनुष्य जन देवताओं के गणका कीर्त्तन करके सम्पूर्ण पापों से छूटसक्ते हैं और ब्रह्मा के हृदय को भेदनकर भगवान् भृगु उत्पन्नहुआ । ४१ । उसका पुत्र विद्वान कवि शुक्रहुआ जो कि त्रैलोकोंके प्राणोंकी रक्षा के लिये वर्षाकाहोना या नहोना भय का होना नहोना इन कार्यों में ब्रह्मा से नियुक्त कियाहुआ अपने कार्य को करता है । ४२ । और जो योगाचारी होताहुआ बड़ा बुद्धिमान ब्रह्मचारी और व्रतों में तत्पर दैत्योंका गुरु और बृहस्पति रूप बनाके देव- ताओंकाभी गुरुरहा ४३ ब्रह्माकी आज्ञा से संसारके कल्याण करनेमें उस शुक्र के नियुक्त

the world. Tashtri, assuming the forms of a mare, brought forth the twins Aswinikumars, Aditi had twelve sons with Indra at their head and Vishnu the youngest upon whom the three worlds depend. The gods are thirty three. I shall now recount their Progeny according to their Pakshas, Kulas and Ganas. The Rudras, the Sadhyas, the Maruts the Vasus, the Bhargavas and the Vishwedevas are called the Paksh. Garur, the son of Vinta; the mighty Arun; and the illustrious Vrihaspati are called the Adityas. The twin Aswins, all the annual plant and inferior animals are the Guhyakas. The recitation of the Gans of the gods removes all sin, O king, Bhrigu came out of the breast of Brahma. The learned Shukra is Bhrig's son Shukra, as a planet, is given the power of pouring and withholding rain, the dispensing and remitting

ह्मचारीयतव्रतः ॥ ४४ ॥ तस्मिन्नियुक्तेविधिना योगक्षेमायभार्गवे । अन्यमुत्पादयामासपुत्रं भृगुरनिन्दितम् ॥ ४५ ॥ च्यवनंदीप्ततपसं धर्मात्मानंयशस्विनम् । यःस्वरोषाच्च्यवतो गर्भान्मातुर्मोक्षायभारत ॥४६॥ आरुषीतुमनोःकन्या तस्यपत्नीमनीषिणः और्वस्तस्यांसमभवंगुरुं भित्त्वामहायशाः ॥ ४७ ॥ महातेजामहावीर्यो बालएवगुणैर्युतः । ऋचीकस्तस्यपुत्रस्तु जमदग्निस्ततोऽभवत् ॥ ४८ ॥ जमदग्नेस्तुचत्वार आसन्पुत्रामहात्मनः । रामस्तेषांजघन्योऽभूद जघन्यैर्गुणैर्युतः ॥ ४९ ॥ सर्वशस्त्रेषु कुशलः क्षत्रियान्तकरोवशी । और्वस्यासीत्पुत्रशतं जमदग्निपुरोगमम् ॥ ५० ॥ तेषांपुत्रसहस्राणि बभूवुर्भुवि विस्तरः । द्वौपुत्रौब्रह्मणस्त्वन्यौ ययोस्तिष्ठतिलक्षणम् ५१ लोकेधातात्रिधाताच यौस्थितौमनुनासह । तयोरेवस्वसादेवी लक्ष्मीःपद्मगृहाशुभा ५२

होने पर भृगु ने निन्दा रहित और प्रकाशवान् तपवाले धर्मात्मा यशयुक्त च्यवननाम दूसरे पुत्रको उत्पन्न किया जो च्यवन क्रोध से गर्भ मेंसे पहिलेही गिरगया ।४५। और उसकी स्त्री आरुषी नामवाली मनुकी कन्याथी और उस आरुषी में च्यवन से उसकी जंघा को भेदनकर और्व नामक पुत्र उत्पन्न हुआ । ४६ । जो बड़ा तेजस्वी और बलवान और बालकपनही से सम्पूर्ण गुणों से युक्तथा उसका पुत्र ऋचीक हुआ और इसकापुत्र जमदग्नि हुआ । ४७ । और महात्मा जमदग्नि के चारपुत्र हुए और उन चारोंमें परशुराम सबमें छोटा और गुणों में बड़ा हुआ जोकि सम्पूर्ण शास्त्रों में कुशल और क्षत्रियों का नाश करनेवाला और जितेन्द्रिय हुआ । ४८ । और्व के सौपुत्रहुए जमदग्नि आदि उन के हजारों पुत्र हुए जिनका विस्तार पृथ्वी में फैला हुआहै । ४९ । ब्रह्मा के दो पुत्र हुए जिनका लक्षण संसार में स्थित है वह दोनों पुत्र धाता विधाता नाम वाले और मनु के साथ रहते हैं उन दोनों की भगिनी पद्म में रहने वाली देवी लक्ष्मी है उस के मानसिक पुत्र आकाशचारी घोड़े हैं । ५१ । वरुणके वीर्य से वरुणकी ज्येष्ठा भार्या में बलनामपुत्र

of calamities and sustaining the lives of all creatures, traversing through the skies. The learned Shukra, of great intelligence and wisdom, of rigid vows, observing a vow of celibacy, divided himself into two by his power of asceticism and became the adviser of the Daityas and the gods. While Shukra was thus employed by Brahma for the good of his creatures, Bhrigu became the father of another son, Chyavan, who was virtuous, famous and like the Sun in glory. He dropped out of his mother's womb in anger and released her. Arushi, the daughter of Manu was Chyavan's mother. Their son was Aurv of great reputation. He was born of Arushi and was father of Richika. Richika possessed great power, energy and virtue from his boyhood and was the father of Jamadagni. The latter had four sons, the youngest of whom was Ram, superior to

तस्यास्तुपानसाः पुत्रास्तुरगाव्योमचारिणः। वरुणस्यभार्य्यायाज्येष्ठा शुक्राद्देवीव्यजायत ५३ तस्याःपुत्रंवलंविद्धि सुरांचसुरनन्दिनीम्। प्रजानामभक्षकामानामन्योऽन्यपरिभक्षणात् ॥ ५४ ॥ अधर्मस्तत्रसञ्जातः सर्वभूतविनाशकः। तस्यापि निर्ऋतिर्भार्य्या नैर्ऋतायेनराक्षसाः ॥ ५५ ॥ घोरास्तस्याञ्चपःपुत्राः पापकर्मरताःसदा। भयोमहाभयश्चैव मृत्युर्भूतान्तकस्तथा ॥ ५७ ॥ नतस्यभार्य्यापुत्रो वा कश्चिदस्त्यन्तको हिसः काकींश्येनींतथाभासीं धृतराष्ट्रींतथाशुकीम् ५७ ताम्रातुसुषुवेदेवी पञ्चैतालोकविश्रुताः उलूकान् सुषुवेकाकी श्येनीश्येनान्व्यजायत ॥ ५८ ॥ भासीभासानजनयद्गृध्रांश्चैव जनाधिप। धृतराष्ट्रीतुहंसांश्चकलहंसांश्चसर्वशः ॥ ५९ ॥ चक्रवाकांश्चभद्रातु जनयामाससैवतु। शुकीचजनयामास शुकानेवयशस्विनी ॥ ६० ॥ कल्याणगुणसम्पन्ना

और सुगनाम कन्या सुरोंकी आनन्ददेने वाली उत्पन्न हुई। ५२। प्रजाओं का भक्षण किया तिससे अधर्म उत्पन्न हुआ (जो कि सम्पूर्ण प्राणियोंका नाश करने वाला है)। ५३। और अधर्म की निर्ऋति भार्या ने राक्षसों को उत्पन्न किया तीन पुत्र उसके बड़े भयानक और पाप कर्म को करने वाले। ५४। भय, महाभय और सम्पूर्ण प्राणियों का अन्त करने वाला मृत्यु, और उस मृत्युकी नकोई स्त्रीहै नकोई पुत्रहै जिसकारण वह सबका अन्त करने वालाहै. ५५ ताम्राकी, काकी, श्येनी, भासी, धृतराष्ट्री, शुक्रकी यह पांच लोक में प्रसिद्ध कन्या उत्पन्न हुईं। ५६। काकी के अलूक पुत्रहुए और श्येनी ने बाजों को उत्पन्न किया, और जन्मेजय भासी ने भास और गृद्धों को उत्पन्न किया। ५७। धृतराष्ट्री के हंस और कल हंस हुए, भद्रा ने चक्रवाकों को उत्पन्न किया। ५८। यश वाली शुकाने तोतों को उत्पन्न किया कल्याण गुणों से युक्त और सम्पूर्ण लक्षणों से युक्त ने क्रोध वश और क्रोध से उत्पत्ति वाली नौ स्त्रियों को उत्पन्न किया,—मृगी, मृगमन्दा,

all his brothers in good qualities, skilful in arms and the slayer of Kshatrias. He controlled his passions. Jamadagni was the eldest of the hundred sons of Aurva. Their race multiplied and spread all over the world. Brahma had two other sons, Dhata and Bidhata who stayed with Manu. Their sister is the auspicious Lakshmi living amid lotuses. The sons of Lakshmi are the celestial horses. Sukra's wife Divi, was Varun's daughter. She had a son and a daughter, Val and Sura respectively, giving joy to the gods. Adharm was born when creatures began to devour each other. He always destroys creatures. His wife is Niriti and the offspring the *Rakshases* called Nairits. She had three more sons, cruel and engaged in doing sinful deeds. They are Bhaya (fear) Mahabhaya (terror) and Mrityu (death), always engaged in killing the creatures. The destroyer has no wife and no sons. Tamar's five daughters are known throughout

सर्वलक्षणपूजिता । नवक्रोधवशानारीः प्रजज्ञेक्रोधसम्भवाः ॥ ६१ ॥ मृगीचमृगमन्दाच हरीभद्रमनाअपि । मातङ्गीत्वथशार्दूली श्वेतासुरभिरेवच ॥ ६२ ॥ सर्वलक्षण सम्पन्ना सुरसाचैवभामिनी । अपत्यंतुमृगाःसर्वेमृग्यानरवरोत्तम ॥ ६३ ॥ ऋक्षाश्वमृगमन्दायाः हरयाश्चपरन्तप । ततस्त्वैरावतंनागं जज्ञेभद्रमनाःसुतम् ॥ ६४ ॥ ऐरावतःसुतस्तस्या देवनागोमहागजः । हर्य्याश्चहरयोऽपत्यं वानराश्चतरस्विनः ॥ ६५ ॥ गोलांगूलांश्चभद्रन्ते हर्य्याःपुत्रान्प्रचक्षते । प्रजज्ञेत्वथशार्दूली सिंहान्व्याघ्राननेकशः ॥ ६६ ॥ द्वीपिनश्चमहासत्त्वान् सर्वानेवनसंशयः । मातंग्यपिच मातङ्गानपत्यानिनराधिप ॥ ६७ ॥ दिशांगजंतु श्वेताख्यं श्वेताजनयदाशुगम् । तथादुहितरौराजन सुरभिर्वैव्यजायत ॥ ६८ ॥ रोहिणींचैवभद्रंते गन्धर्वींतुयशस्विनी । विमलामपिभ-

हरी, भद्रमना, मातङ्गी, शार्दूली, श्वेता, सूरभि, और सम्पूर्ण लक्षण से युक्त सुरसा । ६१ । हे राजाओं में श्रेष्ठ जन्मेजय ? मृगी के पुत्र सम्पूर्ण मृग हुए, और हेशत्रुओं को ताप देनेवाले जन्मेजय रीछ और अमर यह मृगमन्दा से हुए, और भद्रमना ने ऐरावत हाथीको उत्पन्न किया । ६३ । और हरी के वानर और बड़े वेग वाले लंगूर पुत्र हुए । ६४ । और शार्दूली के सिंघ, व्याघ्र, द्वीप यह बड़े बलवान् पुत्र हुए । ६५ । और मातंगी के सन्तान हाथी हुए और दिशगज जो श्वेतहाथी हैं उसको श्वेताने उत्पन्न किया ६६ और हेराजन् सुरभि के रोहिणी और गन्धर्वी यहदो यशवाली कन्या हुई ६७ और विमला और अनलाकोभी उत्पन्न किया रोहिणीसे गउऐं पैदाहुई और गन्धर्वी से घोड़े पैदाहुए और अनलाकी सन्तान खजूर और ताल, हिन्ताल, ताली, खर्जूरिका, गवाका, नरियल, यह सात पिंड फल वृक्ष हैं अनलाकी पुत्री शुकी है और सुरसाका पुत्र

the world. They are Kaki, Sheyni, Vashi, Dhritrashtri and Shuk. Kaki brought forth the crows, Sheyni, the hawks; Bhashi, the cocks and vultures; Dhritrashtri, the ducks, swans and Chakravaks; and the fair Shuki of amiable nature and good omens, brought forth the parrots. Krodha brought forth nine daughters of wrathful disposition. Their names were Mrigi, Mrigmanda, Hari, Bhadramun, Malangi, Sharduli, Sheta, Surabhi and the virtuous Surasa. The offspring of Mrigi are all the animals of the deer species. The offspring of Mrigmunda are bears of sorts and swift-footed animals. Bhadramana was the mother of the celestial eleqhant Airavat. The offspring of Hari are the active monkies, the horses and other animals having a tail like the cow. Sharduli brought forth the lions, tigers, leopards and strong animals. Elephants were born of Matangi and Sheta brought forth the swiftest elephant named Shet. Surabhi brought forth two daughters, the amiable Rohini and the famous Gandharvi and two others named Vemala and Anala Rohini brought

द्रन्ते अनलामपिभारत ॥ ६९ ॥ रोहिण्यांजज्ञिरेगावो गन्धर्व्यांवाजिनःसुताः । स-
मपिण्डफलान् वृक्षाननलापि व्यजायत ॥ ७० ॥ अनलायाःशुकीपुत्री कङ्कस्तुसुरसा-
सुतः । अरुणस्य भार्य्याश्येनी तुवीर्य्यवन्तौमहाबलौ ॥ ७१ ॥ सम्पातिंजनयामास
वीर्य्यवन्तंजटायुषम् । सुरसाजनयन्नागान् कद्रुःपुत्रांस्तुपन्नगान् ॥ ७२ ॥ द्वौपुत्रौ
विनतायास्तु विख्यातौगरुडारुणौ । इत्येषसर्वभूतानां महतांमनुजाधिप । प्रभवः
कीर्तितः सम्यङ्गयामतिमतांवर ॥७३॥ यंश्रुत्वापुरुषः सम्यङ्मुक्तोभवतिपाप्मनः
सर्वज्ञतांचलभते गतिमग्र्यांच विन्दति ॥ ७४ ॥

इत्यादिपर्वणि सम्भवपर्वण्यंशावतरणे षट्षष्ठोऽध्यायः ॥ ६६ ॥

कंक हुआ, अरुणकी भार्या से श्येनी है उसके बड़े बलवान् दोपुत्र हुए ६९ सम्पाती और जटायु सुरसा से नागों को उत्पन्न किया और कद्रु ने सर्पों को उत्पन्न किया । ७० । दोपुत्र विनता के हुए जोकि संसार में गरुड़ और अरुणनाम से विख्यात हैं हेराजन् जन्मेजय ! यह सम्पूर्ण बड़े बड़े प्राणियोंकी उत्पत्ति मैंने भलीप्रकार तुझसे कहदी ७१ इसको सुननेसे मनुष्य सम्पूर्ण पापों से छूटजाता है और सर्वज्ञता प्राप्तहोकर उत्तमगति को जाता है ७२ ॥

---

forth the cows and Gandharvi the horses. Anala produced seven kinds of trees yielding pulpy fruits. Sursa's son was Kank and Shyeni, the wife of Arun, gave birth to two sons of great strength and energy named *Sampati* and the mighty *Jatayu*. *Sursa* also brought forth the Nagas and Kadru the Pannagas. Vinata brought forth two famous sons Garur and Arun. O wise king, I have told thee geneology of all the principal creatures. By listening to this, one is fully cleansed from his sins and acquires great knowledge and finally attains to the foremost of states in after life.

जनमेजय उवाच। देवानांदानवानांच गन्धर्वोरगरक्षसाम्। सिंहव्याघ्रमृगाणांच पन्नगानांपतत्रिणाम् ॥ १ ॥ सर्वेषांचैवभूतानां सम्भवंभगवन्नहम्। श्रोतुमिच्छामितत्त्वेन मानुषेषुमहात्मनाम्। जन्मकर्मचभूताना मेतेषामनुपूर्वशः ॥२॥वैशम्पायन उवाच। मानुषेषुमनुष्येन्द्र सम्भूतायेदिवौकसः। प्रथमंदानवांश्चैव तांस्तेवक्ष्यामिसर्वशः ॥ ३ ॥ विप्रचित्तिरितिख्यातौ यआसीद्दानवर्षभः। जरासन्धइतिख्यातः सआसीन्मनुजर्षभः ॥ ४ ॥ दितेपुत्रस्तुयोराजन् हिरण्यकशिपुःस्मृतः। सजज्ञेमानुषेलोके शिशुपालोनरर्षभ ॥ ५ ॥ संह्रादइतिविख्यातः प्रह्रादस्यानुजस्तुयः। सशल्यइतिविख्यातो जज्ञेवाह्लीकपुङ्गवः ॥ ६ ॥ अनुह्रादस्तुतेजस्वी योऽभूत्ख्यातोजयन्यजः। धृष्टकेतुरितिख्यातःसवभूवनरेश्वरः ॥ ७ ॥ यस्तुराजन् शिविर्नाम दैतेयःपरिकीर्त्तितः। द्रुमइत्यभिविख्यातः सआसीद्भुविपार्थिवः ॥ ८ ॥ बाष्कलोनाम यस्तेषामासीदसुरसत्तमः। भगदत्तइतिख्यातः सजज्ञेपुरुषर्षभः ॥ ९ ॥ अयःशिराअश्वशिरा

अध्याय ६७ ॥

जन्मेजय ने कहा देवता, दानव, गन्धर्व, उरग, राक्षस, सिंह, व्याघ्र, मृग, पन्नग, पक्षी औरभी सम्पूर्ण प्राणियोंकी मनुष्य जाति में उत्पन्नहोने का वृत्तान्त यथार्थ रीतिसे और उनके जन्म और कर्मकी कथा क्रम से सुनना चाहताहूं। २। वैशम्पायन ने कहा हे राजा जन्मेजय मनुष्यों में जो देवता और दानव उत्पन्न हुए उनमें प्रथम दानवोंकी उत्पत्ति कहताहूं। ३। विप्रचित्ति नामवाला श्रेष्ठ दानव मनुष्यों में श्रेष्ठ जरासंधहुआ। ४। दितिका पुत्र हिरण्य कश्यप शिशुपाल राजाहुआ। प्रह्रादका छोटाभाई संह्रादनाम वाला वाह्लिकों में श्रेष्ठ राजा शल्य हुआ। ६। उस से छोटाभाई अनुह्रादनामवाला धृष्टकेतु राजा हुआ। ७। दिति का पुत्र शिवि द्रुम राजा हुआ। ८। बाष्कल नाम असुर श्रेष्ठ भगदत्त राजा के नाम से प्रसिद्ध हुआ। ९। अयःशिरा, अश्वशिरा

CHAPTER LXVII

(SAMBHAV PARV CONTINUED)

Janmejaya said, "Reverend Sir, I wish to hear in detail the birth among men of the gods, the Danavas the Gandharvas the Rakshases, the lions, the tigers, the snakes, the birds and all other creatures. Tell me also their acts and achievements, in due order, on their coming down to the earth. Vaishampayan said, "I shall first tell thee, O monarch, about the gods and Asurs that were born among men. The foremost of Asurs, Viprachitti, was born among men as Jarasandh. The Daitya Hiranyakasipu was known on earth as Shishupal. Sanhrad, the younger brother of Prahrad came among

अयःशकुंश्चवीर्य्यवान् । तथागगनमूर्द्धाच वेगवांश्चैवपंचमः ॥ १० ॥ पञ्चैतेजज्ञिरे राजन्वीर्यवन्तोमहासुराः । केकयेषुमहात्मनः पार्थिवर्षभसत्तमाः ॥ ११ ॥ केतुमानितिविख्यातोयस्ततोऽन्यःप्रतापवान् । असितौजाइतिख्यातःसोग्रकर्मानराधिपः १२ स्वर्भानुरितिविख्यातःश्रीमान्यस्तुमहासुरः । उग्रसेनइतिख्यात उग्रकर्मानराधिपः १३ यस्त्वश्वइतिविख्यातः श्रीमानासीन्महासुरः । अशोकोनाम राजाभून्महावीर्योऽपराजितः ॥ १४ ॥ तस्यादवरजोयस्तु राजन्नश्वपतिःस्मृतः । दैतेयःसोऽभवद्राजा हार्दिक्योमनुजर्षभः ॥ १५ ॥ वृषपर्वेतिविख्यातः श्रीमान्यस्तुमहासुरः । दीर्घप्रज्ञइतिख्यातः पृथिव्यांसोऽभवन्नृपः ॥ १६ ॥ अजकस्त्ववरोराजन्य आसीद्वृषपर्वणः । सशाल्वइतिविख्यातः पृथिव्यामभवन्नृपः ॥ १७ ॥ अश्वग्रीवइतिख्यातःसत्त्ववान्यो महासुरः । रोचमानइतिख्यातः पृथिव्यांसोऽभवन्नृपः ॥ १८ ॥ सूक्ष्मस्तुमतिमानराजन् कीर्तिमान्नृपःप्रकीर्तितः । बृहद्रथइतिख्यातः क्षितावासीत् स पार्थिवः ॥ १९ ॥ तुहुण्डइतिविख्यातो यआसीदसुरोत्तमः । सेनाबिंदुरितिख्यातः सर्वभूतनराधिपः ।२०। इषुपात्नामयस्तेषा मसुराणांबलाधिकः । नमजिह्माम राजासीद्भुवि विख्यात विक्रमः

शिरा, वीर्यवान अश्वशंकु गगनमूर्द्धा, वेगवान यह पांच महा वीर्यवान असुर केकय देश में बड़े राजा हुए और प्रतापी केतुमान असुर उग्रकर्मा नामवाला राजाहुआ और स्वर्भानु नामवाला बड़ा असुर वृषपर्व नामवाला बहादुर राजाहुआ लक्ष्मीयुक्त अश्वासुर अपराजित अशोकनाम राजाहुआ अश्व दैत्यका छोटाभाई अश्वपति हार्दिक्य नाम राजाहुआ वृषपर्वा नामवाला महा असुर दीर्घप्रज्ञराजा प्रसिद्ध हुआ वृषपर्वा का छोटाभाई अजक नामवाला दैत्य शाल्वनाम से पृथ्वीमें प्रसिद्धहुआ बलवान अश्वग्रीव नामवाला महाअसुर रोचमान नामवाला राजाहुआ बड़ा बुद्धिमान और कीर्तिमान सूक्ष्म असुर बृहद्रथ राजा हुआ असुरों में उत्तम तुहुंड असुर सेनाबिंदु राजाहुआ बड़ा बलवान असुर इषुपात असुर

---

man as Shalwa, the famous Valhik. The youngest Anuhrad became Dhrishtketu. The Daitya Shivi became the famous monarch Drum. The great Asur Vashkal became on earth the famous Bhagdatta. The five great Asurs Ayashira, Ashwashira, Ayashanku, Gangamurdha and Vegvan were all born in the house of king Kekaya and became great monarchs. The mighty Asur Ketuman became on earth the King Amituya of dreadful deeds. The great Asur Swarvanu became the mighty Ugrasen of terrible deeds. Ashwa, the great Asur became king Asoka of great energy and incincible in war. Ashwapati, the younger brother of Ashwa, the son of Diti, became on earth the mighty monarch Hardikya. The great and fortunate

॥२१॥ एकचक्रइतिख्यात आसीद्यस्तुमहासुरः। प्रतिविन्ध्यइतिख्यातो बभूवमथितः क्षितौ ॥ २२ ॥ विरूपाक्षस्तु दैतेयश्चित्रयोधी महासुरः। चित्रधर्मेतिविख्यातःक्षितावासीत्सपार्थिवः ॥ २३ ॥ हरस्त्वरिहरोवीर आसीद्योदानवोत्तमः। सुबाहुरितिविख्यातः श्रीमानासीत्सपार्थिवः ॥ २४ ॥ अहरस्तुमहातेजाः शत्रुपक्षक्षयङ्करः। बाल्हिकोनामराजा सबभूवमथितःक्षितौ ॥ २५ ॥ निचन्द्रश्चन्द्रवक्त्रस्तु यआसीदसुरोत्तमः। सुञ्जकेशइतिख्यातः श्रीमानासीत्सपार्थिवः ॥ २६ ॥ निकुम्भस्त्वजितः शूरोयमद्वामतिरजायत। भूमौभूमिपतिश्रेष्ठो देवाधिपइतिस्मृतः ॥ २७ ॥ शरभोनामयस्तेषां दैतेयानांमहासुरः। पौरवोनामराजर्षिः सबभूवनरोत्तमः ॥२८॥ कुपटस्तु महावीर्यो श्रीमान्राजन्महासुरः। सुपार्श्वइतिविख्यातः क्षितौजज्ञेमहीपतिः ॥ २९ ॥ क्रथस्तु राजन्राजर्षिः क्षितौजज्ञेमहासुरः। पार्वतेइतिख्यातः काञ्चनाचलसन्निभः ॥ ३० ॥ द्वितीयः शलभस्तेषामसुराणां बभूवह। प्रह्लादोनामबाह्लीकः सबभूवनराधिपः ३१॥ चन्द्रस्तुदितिजश्रेष्ठो लोकेताराधिपोपमः। चन्द्रवर्मेतिविख्यातः काम्बोजानांनराधिपः

पृथ्वी में प्रसिद्ध बलवान नगजित राजाहुआ, एक चक्रनामवाला महा असुर प्रतिविन्ध्य नामवाला प्रसिद्ध राजाहुआ विचित्र युद्धका करनेवाला महा असुर विरूपाक्ष चित्रधर्मा नाम से प्रसिद्ध हुआ, शत्रुनाशी हरनाम वाला दानव ऐश्वर्ययुक्त सुबाहुनामसे प्रसिद्धहुआ शत्रुनाशी अहरनामवाला तेजस्वी असुर पृथ्वी में प्रसिद्ध बाह्लीक राजाहुआ निचन्द्र चन्द्र वक्त्र असुरों में उत्तम बड़ा ऐश्वर्यवान सुंजकेश राजाहुआ अजित निकुंभनामवाला प्रसिद्ध राजाहुआ शरभ नाम महासुर पौरवनाम राजर्षि मनुष्यों में श्रेष्ठहुआ ऐश्वर्यवान वीर कुपट सुपार्श्व नाम प्रसिद्ध राजाहुआ क्रथ नामवाला महा असुर सुमेरु पर्वतके समान कान्तिवाला पार्वतेय राजर्षि हुआ और द्वितीय शलभ असुर बाह्लीक देशका राजा प्रह्लाद नामवाला हुआ । ३१ । चन्द्रमाके तुल्य दितिका पुत्र चन्द्रनाम असुर कम्बोजदेश का

Asur Vrishparva became Dirgh Praja on the Earth. The younger brother of Vrishparva, named Ajak, became the famous king Shalwa. The mighty Asur Ashwagreev was known here as Rochaman. The Asur Sakshm who was very intelligent and of great achievements became on earth the famous king Vrihadrath. The foremost of Asurs, Tuhund, was known on the earth as Senvindu. That Asur of great strength who was named Ishup became the famous Nagnjit of great prowess. The great Asur Ekchakra became the famous Prativindhya. The great Asur Viroopaksh, learned in the arts of war, became king Chitravarma. The foremost of Danavs, the brave Hora who was tha terror of all foes became on earth

॥ ३२ ॥ अर्कइत्याभिविख्यातो यस्तुदानवपुङ्गवः । ऋषिकोनाम राजर्षिर्बभूव नृप सत्तमः ॥ ३३ ॥ मृतपाइतिविख्यातो यआसीदसुरोत्तमः । पश्चिमानूपकंविद्धि तंनृपं नृपसत्तम ॥३४॥ गरिष्ठस्तुमहातेजाः प्रख्यातोमहासुरः । द्रुमसेनइतिख्यातःपृथिव्यां सोऽभवन्नृपः ॥ ३५ ॥ मयूरइतिविख्यातः श्रीमान्यस्तुमहासुरः । सविश्वइतिविख्यो तो बभूवपृथिवीपतिः ॥ ३६ ॥ सुपर्णइति विख्यातस्तस्मादवरजस्तुयः । कालकीर्ति-रितिख्यातः पृथिव्यांसोऽभवन्नृपः ॥३७॥ चन्द्रहन्तेतिविख्येषां कीर्तितःप्रवरोऽसुरः । शुनकोनामराजर्षिः सबभूवनराधिपः ॥ ३८ ॥ विनाशनस्तुचन्द्रस्य यआख्यातोमहा-सुरः । जानकिर्ज्ञानविख्यातः सोऽभवन्मनुजाधिपः ॥ ३९ ॥ दीर्घजिह्वस्तुकौरव्य उक्तोदानवर्षभः । काशिराजःसविख्यातः पृथिव्यांपृथिवीपते ॥ ४० ॥ अहन्तुसुषुवे यन्तु सिंहकार्किन्दुमर्दनम् । सक्राथइतिविख्यातो बभूवमनुजाधिपः ॥ ४१ ॥ अना-युषस्तुपुत्राणां चतुर्णांप्रवरोऽसुरः । विक्षरोनामतेजस्वी वसुमित्रोनृपःस्मृतः ॥ ४२ ॥ द्वितीयोविक्षराद्यस्तु नराधिपःमहासुरः । पाण्ड्यराष्ट्राधिपइति विख्याताःसोऽभवन्नृपः ॥ ४३ ॥ बलीनइतिविख्यातो यस्त्वासीदसुरोत्तमः । पौण्ड्रमत्स्यकइत्येवं बभूवसन-

---

राजा चन्द्रवर्मा हुआ । दानवों में श्रेष्ठ अर्क राजाओं में श्रेष्ठ ऋषिकहुआ । असुरों में श्रेष्ठ मृतपा पश्चिमानूपक राजाहुआ, महासुर तेजस्वी गरिष्ठ द्रुमसेन राजाहुआ, महासुर मयूर विश्वनामक राजाहुआ, मयूरका छोटाभाई सुपर्ण असुर कालकीर्तिनामक राजाहुआ असुरों में श्रेष्ठ चन्द्रहन्ता मनुष्यों में श्रेष्ठ शुनकनामक राजर्षि हुआ, महाअसुर चन्द्र विनाशक जानकिनामक प्रसिद्धहुआ, दीर्घ जिह्वनामक दानव श्रेष्ठ काशिराजहुआ, सिंह का पुत्र सूर्य चन्द्रका मर्दन करनेवाला किरात नामक राजाहुआ, । ४० । दनायुके चार पुत्रोंमें सब से बड़ा विक्षरनामक तेजस्वी असुर सुमित्र राजाहुआ । ४१ । विक्षरसे छोटा पाण्ड्य देशका राज हुआ । ४२ । असुरों में श्रेष्ठ बलि वीर पौंड्रमत्स्यक राजाहुआ ।४३।

---

the famous and fortunate Suvahu. The Asur Suhar of great energy and destroyer of foes was the famous king Valhik. The best Asur named Nichandra, beautiful like the moon became known as Munj-kesh. The great and intelligent Asur called Nilkumbh never van-quished in battle was born on the earth as king Devadhip the fore-most of monarchs. The great Asur Daitya named Sharva became on earth the Rajarshi named Paurav. The great Asur, the fortu-nate Kupith became the famous Suparsh. The great Asur Kratha was the Rajarshi Parvatya, shining like a mountain of gold. The famous Asur Shalav the second became on earth Prahrad in the country of Valhika. The foremost among the sons of Diti named

राधिपः ॥ ४४ ॥ वृत्रइत्याभिविख्यातो यस्तुराजन्महासुरः । मणिमान्नागराजर्षिः सर्वभूतनराधिपः ॥ ४५ ॥ क्रोधहन्तेतियस्तस्य बभूवावरजोऽसुरः । दण्डइत्यभिविख्यातः सआसीन्नृपतिःक्षितौ ॥ ४६ ॥ क्रोधवर्द्धनइत्येव यस्त्वन्यःपरिकीर्तितः । दण्डधारइतिख्यातः सोऽभवन्मनुजर्षभः ॥ ४७ ॥ कालेयानान्तुये पुत्रास्तेषामष्टौनराधिपाः। जज्ञिरराजशार्दूल शार्दूलसमविक्रमाः ॥ ४८ ॥ मगधेषु जयत्सेनस्तेषानासीत्सपार्थिवः । अष्टानाम्प्रवरस्तेषां कालेयानांमहासुरः ॥ ४९ ॥ द्वितीयस्तुततस्तेषां श्रीमान् हरिहरोपमः । अपराजितइत्येवं सर्वभूतनराधिपः ॥ ५० ॥ तृतीयस्तुमहातेजा महामायोमहासुरः । निषादाधिपतिर्ज्जज्ञे भुविभीमपराक्रमः ॥५१॥ तेषामन्यतमोयस्तु चतुर्थःपरिकीर्तितः । श्रेणिमानितिविख्यातः क्षितौराजर्षिसत्तमः ॥५२॥ पञ्चमस्त्वभवत्तेषां प्रवरोयोमहासुरः । महौजाइतिविख्यातो बभूवेहपरन्तपः ॥ ५३ ॥ षष्ठस्तुमतिमान्योवै तेषामासीन्महासुरः । अभीरुरितिविख्यातः क्षितौराजर्षिसत्तमः ॥ ५४ ॥ समुद्रसेनस्तु नृपस्तेषामेवाभवद्गणात् । विश्रुतःसागरान्तायां क्षितौधर्मार्थतत्त्ववित् ।५५।

वृत्रनामक महासुर नामक राजर्षि हुआ । ४४ । वृत्रका छोटाभाई क्रोधहंता असुर दंड नामक राजाहुआ । ४५ । क्रोध वर्धन असुर दंडधारनामक राजाहुआ । ४६ । कालेय नामक दैत्यों के आठ पुत्र शार्दूलके समान विक्रमी राजे हुए । ४७ । उनमें सब से बड़ा मगध देशका जयत्सेन नामक राजाहुआ । ४८ । उससे छोटा इन्द्रके समान अपराजित राजाहुआ । ४९ । तीसरा बड़ी मायाका जाननेवाला बड़ा पराक्रमी निषादों का राजा हुआ । ५० । चौथा श्रेणिमान नामक श्रेष्ठ राजर्षि हुआ । ५१ । पांचवां श्रेष्ठ महासुर महौजा नामक प्रसिद्ध भान छठा महा असुर राजर्षियों में श्रेष्ठ अभीरु नामक राजाहुआ सातवां असुर समुद्र पर्वत पृथ्वीमें प्रसिद्ध धर्मतत्वका जाननेवाला समुद्रसेन राजाहुआ ५४ आठवां कालकेय धर्मात्मा और सबप्राणियोंका हितचाहनेवाला समुद्र बृहत्नामक राजाहुआ

Chandra, handsome like the moon became Chandravarma the king of Kambojas. The brave Danav Ark became the king Richik. The best of Asurs known as Mutap became on earth the king Paschimanupak. The great asur of energy, Garisht became king Drum sen. The great Asur Mayur became the king Vishwa. The younger brother of Mayur became Kalkirti. The mighty Asur Chandra Kant became king Sunak. The great Asur, Chandravinashan became hero king Janaki. The great Danav, Dirghjivha became the king of Kashi. The grish born of Singhika who persecuted the Sun and the Moon became on the earth the monarch Karth. The eldest of the four sons of Danayu known as Vikshar became Vasumitra. The

बृहन्नामाष्टमस्तेषां कालेयानांनराधिप । बभूवराजाधर्मात्मा सर्वभूतहितेरतः ॥ ५६ ॥ कुक्षिस्तुराजन्विख्यातो दानवानांमहाबलः । पार्वतीयइतिख्यातः काञ्चनाचलसन्निभः ॥ ५७ ॥ क्रथनश्चमहावीर्य्यः श्रीमान्राजामहासुरः । सूर्याक्षइतिविख्यातःक्षितौजज्ञे महीपतिः ॥५८॥ असुराणान्तुयःसूर्य्यः श्रीमांश्चैवमहासुरः । दरदोनामबाह्लीको वरः सर्वमहीक्षिताम् ॥ ५९ ॥ गणःक्रोधवशोनाम यस्तेराजनमकीर्तितः । ततःसंजज्ञिरेवीराः क्षितावितरराधिपः ॥ ६० ॥ भद्रकःकर्णवेष्टश्च सिद्धार्थःकीटकस्तथा । सुवीरश्चसुबाहुश्च महावीरोऽथबाह्लिकः ॥ ६१ ॥ क्रथोविचित्रःसुरथ श्रीमान्नीलश्चभूमिपः । चोरपासाश्चकौरव्य भूमिपालश्चनामतः ॥ ६२ ॥ दन्तवक्रश्च नामासीद्दुर्जयश्चैव दानवः । रुक्मीचनृपशार्दूलो राजाचजनमेजयः ॥६३॥ आषाढोवायुवेगश्च भूरितेजास्तथैवच । एकलव्यःसुमित्रश्च वाटधानोऽथगोमुखः ॥ ६४ ॥ कारूषकाश्चराजानः क्षेमधूर्तिस्तथैवच । श्रुतायुरुद्वहश्चैव बृहत्सेनस्तथैवच ॥६५॥ क्षेमोग्रतीर्थःकुहरः कलिङ्गेषुनराधि

कुक्षिक नामक प्रसिद्ध दानव सुमेरु पर्वत के समान कान्तिवाला पार्वतीय राजाहुआ ५६ क्रथनु नामक बड़ा पराक्रमी महा असुर पृथ्वी में सूर्याक्ष नामक प्रसिद्ध राजाहुआ ५७॥ सूर्यनामक असुरों में सूर्य सम्पूर्ण राजाओंमें श्रेष्ठ दरदनामक बाल्हीक देशका राजा हुआ। ५८। हे राजन् मैंने जिस क्रोधवश नामक असुरगण का नाम लियाथा उसगणमें से पृथ्वी में बड़े बड़े वीर राजे उत्पन्न हुए । ५९ । भद्रक, कर्णवेष्ट, सिद्धार्थ, कीटक, सुवीर, सुबाहु, महावीर, बाल्हिक । ६० । क्रथ, विचित्रसुरथ, श्रीमान्नील राजा, चोरवासा भूमिपाल दुर्जय, दंतवक्र, राजाओं में श्रेष्ठ रुक्मि जन्मेजय । ६२ । आषाढ, वायुवेग, भूरितेजा, एकलव्य सुमित्र वाटधान, गोमुख । ६३ । कारुषक राजे, क्षेमधूर्ति, श्रुतायु, उद्वह, बृहत्सेन । ६४ । क्षेमोग्रतीर्थ कलिंगदेश का राजाकुहर, मतिमान, मनु-

---

second brother of the great Asur Vikshar, was born as the king of Pandya. The best of Asurs, Valin, became king of Paundra Matsyak. The great Asur Vitra, O king, became the Rajarshi Maniman and his younger brother, named Krodhhunta, became king Dand. The Asur Krodh-vardhan became the famous Dandadhar. The eight sons of the Kalkeyas were born on the earth as great kings edued with the strength of lions. The eldest of them became king Jayat Sen of Magadh. The Second, of Indra like prowess, became the famous king Aparajit. The third, of great energy and power of illusion, became the king of Nishadhas of great prowess. The fourth became the famous Shreniman, the best of Rajarshis. The fifth became the famous king Mahouj, the

पः । मतिमांश्चमनुष्येन्द्र ईश्वरश्चेतिविश्रुतः ॥ ६६ ॥ गणात्क्रोधवशादेव राजपूगोऽभवत्क्षितौ । जातःपुरामहाभागो महाकीर्तिर्महाबलः ॥ ६७ ॥ कालनेमिरितिख्यातोदानवानांमहाबलः । सकंसइतिविख्यात उग्रसेनसुतोबली ॥ ६८ ॥ यस्त्वासीद्देवकोनाम देवराजसमद्युतिः । सगन्धर्वपतिर्मुख्यः क्षितौजज्ञेनराधिपः ॥ ६९ ॥ बृहस्पतेर्बृहत्कीर्तेर्देवर्षेर्विद्धिभारत । अंशाद्द्रोणंसमुत्पन्नं भारद्वाजमयोनिजम् ॥ ७० ॥ धन्विनांनृपशार्दूल यःसर्वास्त्रविदुत्तमः । महाकीर्तिर्महातेजाः सजज्ञेमनुजेश्वर ॥ ७१ ॥ धनुर्वेदेचवेदेच यंतंवेदविदोविदुः । वरिष्ठाचित्रकर्माणं द्रोणंस्वकुलवर्द्धनम् ॥ ७२ ॥ महादेवान्तकाभ्याञ्च कामात्क्रोधाच्चभारत । एकत्वमुपपन्नानां जज्ञेशूरःपरन्तपः ॥ ७३ ॥ अश्वत्थामामहावीर्य्यः शत्रुपक्षभयावहः । वीरःकमलपत्राक्षः क्षितावासीन्नराधिप ७४ ।

प्येन्द्र, ईश्वर । ६५ । क्रोधवश नामगणसे पृथ्वी में वह राजाओंका गण उत्पन्न हुआ जो समूह बड़े बड़े भागवाला कीर्तिमान और बलवान था । ६६ । बड़ा बलवान दानव कालनेमि नामक उग्रसेन का बेटा बलवान कंस राजाहुआ । ६७ । गंधर्वों का राजा इंद्र के समान कान्तिवाला देवकहुआ । ६८ । बड़ी कीर्तिवाले देवर्षि बृहस्पति के अंश से अयोनिज (जो योनिसे उत्पन्न नहीं हुआ) भरद्वाजका जन्म हुआ । ६९ । हे राजाओं में श्रेष्ठ जन्मेजय वह द्रोणाचार्य धनुष विद्या और अस्त्रविद्याके जाननेवालों में श्रेष्ठथा और बड़ी कीर्तिवाला और तेजस्वी था ७० उसद्रोणाचार्य को वेद के जाननेवाले धनुर्वेद और वेद विद्यामें श्रेष्ठ और चित्रकर्म करनेवाला और अपने पक्षका बढ़ानेवाला मानते थे । ७१ । महादेव काम काल क्रोध इन चारों के मेलसे बड़ा पराक्रमी शत्रुके पक्ष को भयका देनेवाला, वीर कमल केसे नेत्रवाला अश्वत्थामा पृथ्वी में उत्पन्न हुआ । ७३ । आठवसु राजाशांतनु से गंगामें वसिष्ठ के शाप और इन्द्रके कहने से उत्पन्न हुए ।७४।

---

oppressor of enemies. The sixth, a great and intelligent Asur, was the most famous and best of kings on the earth, known as Abhiru. The seventh, of world-wide fame became king Samudrasen, well-versed in the religious books. The eighth of the Kaleyas known as Vrihat became on earth a virtuous king ever engaged in the good of his subjects. The mighty Danav known as Kukshi was born on earth as Parvatia, of beautiful face bright as a golden mountain. The mighty Asur Krathana gifted with great energy was the famous king Suryaksh. The great Asur Surya of beautiful form, became Darad, the king of Valhikaa, the foremost of kings. Of the group of Asurs, known as Krodhvash whom I have already mentioned, were born many heroic kings on the earth:—Bhadrak, Karnaveshta,

जज्ञिरेवसवस्त्वष्टौ गङ्गायांशान्तनोःसुताः । वासिष्ठस्यचशापेन निसोगाद्वासवस्य च ॥ ७५ ॥ तेषामवरजोभीष्मः कुरूणांभयङ्करः । मतिमान्वेदविद्वाग्मी शत्रुपक्षक्षयङ्करः ॥ ७६ ॥ जामदग्न्येनरामेण सर्वास्त्रविदुषांवरः । योऽयुध्यतमहातेजा भार्गवेणमहात्मना ॥ ७७ ॥ यस्तुराजन्क्रुधोनाम ब्रह्मर्षिरभवत्क्षितौ । रुद्राणान्तुगणाद्विद्धि सम्भूतमतिपौरुषम् ॥ ७८ ॥ शकुनिर्नामयस्त्वासीद्राजालोके महारथः । द्वापरं विद्धितंराजन् सम्भूतमरिमर्दनम् ॥ ७९ ॥ सात्यकिः सत्यसन्धश्च योऽसौ वृष्णिकुलोद्वहः । पक्षात्सञ्जज्ञेमरुतां देवानामरिमर्दनः ॥८०॥ द्रुपदश्चैवराजर्षिस्तत्पक्षाभवद्गणात् । मानुषेनृपलोकेऽस्मिन् सर्वशस्त्रभृतांवरः ॥ ८१ ॥ ॥ ततश्चकृतवर्माणं विद्धिराजन्जनाधिपम् । तमप्रतिमकर्माणं क्षत्रियर्षभसत्तमम् ॥ ८२ ॥ मरुतान्तुगणाद्विद्धि सञ्जातमरिमर्दनम् । विराटंनामराजानं परराष्ट्रतापनम् ॥ ८३ ॥ अरिष्टाया-

---

उन आठोंमें सबसे छोटा भीष्म कुरु वंशियों के भयका दूर करनेवाला मतिमान वेदज्ञानी बोलने में चतुर शत्रु पक्षका क्षयकारी था उस सम्पूर्ण अस्त्रविद्या जानने वालों में श्रेष्ठ भीष्मने भृगुवंशी महात्मा जमदग्नि के पुत्र परशुराम के साथ युद्ध किया ७६ क्रुधनाम ब्रह्मर्षि अति पुरुषार्थवाला रुद्रों के गण में से उत्पन्नहुआ ७७ शकुनि नामक महारथ राजा शत्रु पक्षका मर्दन करनेवाला द्वापर जानो ७८ वृष्णियों के कुलका बढ़ाने वाला सत्यवादी सात्यकि शत्रुओं का मर्दन करनेवाला मरुतों के पक्षसे उत्पन्न हुआ । ७९ । उसी मरुत्गण में से मनुष्य लोक में सब शस्त्रधारियों में श्रेष्ठ राजा द्रुपद का जन्म हुआ ८० हे राजन् जन्मेजय ! अजित क्षत्रिय राजाओं में श्रेष्ठ कृतवर्मा भी उसी गण से उत्पन्न हुआ ८१ शत्रुओं के राज्य को ताप देनेवाला, कालसम राजा विराट्भी मरुत् गण से पैदाहुआ ८२ गन्धर्वपति अरिष्टा का पुत्र हंस नामक कौरवों के वंश का बढ़ाने

Sidharth, Kitak, Suvir, Suvahu, Mahavir, Valhik, Kritha, Vichitra Surath, the handsome Nila, Chirvasa, Bhumipal, Dantvakra, Durjaya, the valliant, Rukmi, Asharh, Vayuveg, Bhuriteja, Eklavya, Sumitra, Vatadhan, Gomukh, the Karushak, Kshemdhurti, Srutayu, Udvah, Vrihatsen, Kshema, Ugratirtha, the king of the Kalingas, and Iswar. These first of kings of the group of Krodhvash, were all born on the earth. Another mighty Asur known among the Danavas as Kalanemi, of great strength and achievements and very prosperous, became the mighty son of Ugrasen, the famous Kansa. The famous Asur Devak, in splendour like Indra, became on the earth the powerful king of Gandharvas. Drona, the son of Bharadwaj not born of woman had sprung from a portion of the god-rishi Brahas-

स्तुयःपुत्रो हंसइत्यभिविश्रुतः । सगन्धर्वपतिर्ज्ञेय कुरुवंशविवर्धनः ॥ ८४ ॥ धृतराष्ट्रतिरूपातः कृष्णद्वैपायनात्मजः । दीर्घबाहुर्महाराजा प्रज्ञाचक्षुर्नराधिपः ॥ ८५ ॥ मातुर्दोषादृषेःकोपादन्धएवाव्यजायत । तस्यैवावरजोभ्राता महासत्त्वोमहाबलः । स पाण्डुरितिविख्यातःसत्यधर्मरतःशुचिः ॥ ८६ ॥ अत्रेस्तुसुमहाभागं पुत्रंपुत्रवतांवरम् । विदुरंविद्धितंलोके जातंबुद्धिमतांवरम् ॥ ८७ ॥ कलेरंशस्तुसञ्जज्ञे भुविदुर्योधनो नृपः । दुर्बुद्धिर्दुर्मतिश्चैव कुरूणामयशस्करः ॥ ८८ ॥ जगतोयस्तुसर्वस्य विद्विष्टः कलिपूरुषः । यःसर्वाघातयामास पृथिवींपृथिवीपते ॥ ८९ ॥ उद्दीपितंयेनवैरं भूतान्तकरणंमहत् । पौलस्त्याभ्रातरश्चास्य जज्ञिरेमनुजेष्विह ॥ ९० ॥ शतंदुःशासनादीनां सर्वेषांक्रूरकर्मणाम् । दुर्मुखादुःसहश्चैव येचान्येनानुकीर्त्तिताः ॥ ९१ ॥ दुर्योधनसहायास्ते पौलस्त्यागरतर्षभ । वैश्यापुत्रोयुयुत्सुश्च धार्त्तराष्ट्रःशताधिकः ॥ ९२ ॥ जनमेजय उवाच । ज्येष्ठानुज्येष्ठतामेषां नामधेयानिवाविभो । धृतराष्ट्रस्य

वाला व्यास जीका पुत्र दीर्घबाहु प्रज्ञाचक्षु राजा धृतराष्ट्र माता के दोष और ऋषि के कोप से अंधा उत्पन्न हुआ उसका छोटा भाई अति बुद्धिमान और बलवान् सत्यधर्म में रत, पवित्र राजा पांडु उत्पन्न हुआ सूर्य के पुत्र धर्म से श्रेष्ठ और बुद्धिमान् पुत्र विदुर का जन्म हुआ ८६ खोटी बुद्धि मतवाला और कुरुकीर्त्ति का नष्ट करनेवाला कलि अंश से उत्पन्न हुआ । ८७ । हे राजन वह दुर्योधन सम्पूर्ण जगत् का द्वेषी: कलि पुरुष सम्पूर्ण पृथ्वी के नाश का हेतु हुआ ८८ उस दुर्योधन से सम्पूर्ण प्राणियों का महान् बैर रूपी अग्नि उद्दीपित हुआ, पुलस्त्यकी संतान क्रूरकर्म करनेवाले दुःशासनादिक १०० भाई दुर्योधन के उत्पन्नहुए उन में दुर्मुख दुःसह आदि दुर्योधन के सहायकारी पुलस्त्यकी संतान थे इन सौसे अधिक युयुत्सु वैश्या से उत्पन्न था ९१ जन्मेजयने कहा, हे वैशम्पायन इन धृतराष्ट्रके पुत्रों के नाम क्रम से मुझे सुनाओ ९२ वैशम्पायन ने कहा कि दुर्योधन

---

pati of mighty deeds. He was the foremost of all bowmen. He knew the use of all weapons, and was of great achievements and energy. He was versed in the Vedas and the science of arms. He worked wonders and was the pride of his race. His son the heroic Ashwathama, of eyes like the lotus petals, gifted with great energy, the terror of foes, the oppressor of enemies, was born on the earth with the united powers of Mahadev, Yam, Kam and Krodh. From the curse of Vasisht and the order of Indra, the great Vasus were born of Ganga by her husband Shantanu. The youngest of them was Bhishm the remover of the fears of the Kauravas, of great intelligence, conversant in the Vedas, the first of speakers and decimater of enemie's ranks. Possessed of great energy, acquainted with

पुत्राणामानुपूर्व्येण कीर्त्तिय ॥ ९३ ॥ वैशम्पायन उवाच । दुर्य्योधनोयुयुत्सुश्च राजन्दुःशासनस्तथा । दुःसहोदुःशलश्चैव दुर्मुखश्चतथापरः ॥ ९४ ॥ विविंशतिर्विकर्णश्च जलसन्धःसुलोचनः । विन्दानुविन्दौदुर्द्धर्षः सुबाहुर्दुष्प्रधर्षणः ॥ ९५ ॥ दुर्मर्षणोदुर्मुखश्च दुष्कर्णःकर्णएवच । चित्रोपचित्रौचित्राक्षश्चारुचित्राङ्गदश्च ॥ ९६ ॥ दुर्मदोदुष्प्रहर्षश्च विवित्सुर्विकटःसमः । ऊर्णनाभःपद्मनाभस्तथानन्दोपनन्दकौ ॥९७॥ सेनापतिःसुषेणश्च कुण्डोदरमहोदरौ । चित्रबाहुश्चित्रवर्मा सुवर्मादुर्विरोचनः ॥ ९८ ॥ अयोबाहुर्महाबाहुश्चित्रचापसुकुण्डलौ । भीमवेगोभीमबलो बलाकीभीमविक्रमः ।९९। उग्रायुधोभीमशरः कनकायुर्दृढायुधः । दृढवर्माद्दढक्षत्रः सोमकीर्त्तिरनूदरः ॥ १००॥ जरासन्धोदृढसन्धः सत्यसन्धःसहस्रवाक् । उग्रश्रवाउग्रसेनः क्षेममूर्त्तिस्तथैवच

युयुत्सु, दुःशासन दुःसह दुःशल दुर्मुख, ९३ विविंशति, विकर्ण, जलसंध, सुलोचन, विंद, अनुविंद, दुर्धर्ष, सुबाहु, दुष्प्रधर्षण ।९४। दुर्मर्षण, दुर्मुख, दुष्कर्ण, कर्ण चित्र, उपचित्र, चित्राक्ष चारु चित्र, अंगद । ९५ । दुर्मद, दुष्प्रहर्ष, विविंत्सु, विकट सम, ऊर्णनाभ, पद्मनाभ, नन्द, उपनन्दक, । ९६ । सेनापति,सुषेण,कुंडोदर,महोदर,चित्रबाहु,चित्रवर्मा, सुवर्मा,दुर्विरोचन । ९७ । अयोबाहु,महाबाहु,चित्रचाप,सुकुंडल,भीमवेग,भीमबल,बलाकी, भीमविक्रम ९८ उग्रायुध,भीमशर,कनकायुध,दृढायुध,दृढवर्मा,दृढक्षत्र,सोमकीर्ति,अनूदर, । ९९ । जरासंध, दृढसंध, सत्यसंध, सहस्रवाक्, उग्रश्रवा, उग्रसेन, क्षेममूर्त्ति, ।१००।

---

Shubhangi who gave birth to Bidoorath. The latter married Madhava's daughter Samprya whose son was Anashwa. Anashwa married Magdhraj's daughter whose son was Parikshit. Parikshit married Bahud's daughter Suyasha whose son was Bhimsen.41.The latter married Kumari the daughter of Kakay.Her offspring was Pratishrava. Pratishrava's son Pratip, married Sunanda the daughter of king Shaivya. Three sons, Devapi, Balhik and Shantanu were the offspring of the union.42. Of these, Devapi, became a recluse in his youth and the kiugdom devolved on Shantanu. Every old man that Shantanu touched with his hand became young again. So he was called Shantanu. He married Ganga, the Bhagirathi, and became by her the father of Dev Brat, called by the people, Bhishma.To please his father, Bhishm married him with Satyavati,

राजासीत् ॥ ४९ ॥ विचित्रवीर्य्यःखलु कौसल्यात्मजेऽम्बिकाम्बालिके काशिराज दुहितराबुपयेमे ॥ ५० ॥ विचित्रवीर्य्यस्त्वनपत्यएव विदेहत्वंप्राप्तस्ततः सत्यवत्यचिन्तयन्मादौष्यन्तो वंशउच्छेदंव्रजोदिति ॥ ५१ ॥ साद्वैपायनमृषिं मनसा चिन्तयामास । स तस्याः पुरतः स्थितः किङ्करवाणीति ॥ ५२ ॥ सा तमुवाच भ्राता तवानपत्यएवस्वर्यातो विचित्रवीर्यः साध्वपत्यं तस्योत्पादयेति ॥ ५३ ॥ सतथेत्युक्त्वात्रीन् पुत्रानुत्पादयामास । धृतराष्ट्रं पाण्डुंविदुरञ्चेति ॥ ५४ ॥ तत्रधृतराष्ट्रस्य राज्ञः पुत्रशतंबभूवगान्धार्यां वरदानाद्द्वैपायनस्य ॥ ५५ ॥ तेषांधृतराष्ट्रस्यपुत्राणां चत्वारःप्रधानावभूवुः । दुर्य्योधनो दुःशासनोविकर्णश्चित्रसेनश्चेति ॥ ५६ ॥ पाण्डोस्तु द्वेभार्य्ये वभूवतुः कुन्ती पृथानाममाद्री चेत्युभेस्त्रीरत्ने ॥ ५७ ॥ अथ पाण्डुर्मृगयांचरन्मैथुनगतमृषिमपश्यन्मृग्यांवर्त्तमानं तथैवाद्भुतमनासादितकामरसमतृप्तञ्च वाणेनाजघान ॥ ५८ ॥ सबाणाविद्धउवाचपाण्डुं चरताधर्ममिमं येन त्वयाभिज्ञेन काम

से विवाह किया परन्तु सन्तानें उत्पन्न होने से पहलेही परलोक को सिधारा इस लिये कि दुष्यन्त का वंश नष्ट न होजाय सत्यवतीने अपने पुत्र वैशम्पायन ऋषिको याद किया और द्वैपायन ने उस के सम्मुख आकर पूछा कि क्या आज्ञा ।५२। है सत्यवतीने कहा कि तुम्हारा भाई विचित्रवीर्य विना सन्तान पर लोकको गया उसका पुत्रोत्पादनकरो द्वैपायन ने स्वीकार किया और उचित काल में धृतराष्ट्र, पांडु, और विदुर तीन पुत्र उत्पन्न किये फिर द्वैपायन के वरदान से गांधरी के गर्भमें सौ पुत्र उत्पन्न हुए धृतराष्ट्र के पुत्रों में दुर्योधन, दुःशासन विकर्ण और चित्रसेन यह चारपुत्र प्रधानथे।५६।पांडुकी दोस्त्रियें कुंती और माद्रीथीं कुंती का दूसरा नाम पृथा था फिर एक समय पांडु आखेट के लिये वन में गया वहां देखाकि एक ऋषि मृगीसे मैथुन कर कहा है तब तक काम रस के पूर्णन होनेसे भले प्रकार तृप्त नहीं हुआथा उस अद्भुत मृगरूपी ऋषिपर राजाने वाण मारा ।५८। ऋषिने

alias Gandhkali. Before her marriage she had become the mother of Dwaipayan (Vays) by her union with Parashar. By her union with Shantanu she had two sons, *viz*, Vichitravirya and Chitrangad. The latter was killed by a Gandharb in his youth and the former became king. Vichitra-virya married the two daughters of the king of *Benares*, named, Ambika and Ambalika. But he died without issue. To continue the line of Dushyant Satyavati called her son, the Rishi Dwaipayan, who respectfully stood before her to await her orders. 52 Satyvati said, "Your(half) brother Vichitravirya has died childless. Produce sons for him." Dwaipayan agreed and produced in time three sons, *viz*, Dhritrashra, Pandu, and Vidur. By the blessing of Vyas Dhritrashtra's wife Gandhari brought forth hundred sons. Chief among them

रसस्याहमनवाप्तकामरसो निहतस्तस्मात्वमप्येतामवस्थामासाद्यानवाप्तकामरसः पंचत्वमाप्स्यसि क्षिप्रमेवेति स विवर्णरूपस्तथा पाण्डुः शापं परिहरमाणो नोपासर्पत भार्य्येवाक्यंचोवाच ॥ ५९ ॥ स्वचापल्यादिदंप्राप्तवाहनंशृणोमि च नानपत्यस्यलोकाः सन्तीति सात्वं मदर्थेपुत्रानुत्पादयेति कुन्तीमुवाचसा तथोक्ता पुत्रानुत्पादयामास धर्मायुधिष्ठिरं मारुताद्भीमसेनं शक्रादर्ज्जुनमिति ॥ ६० ॥ तांसंहृष्टःपाण्डुरुवाच इयंतेसपत्न्यनपत्या साध्वस्या अपत्यमुत्पाद्यतामिति ॥ ६१ ॥ एवमस्त्वितिकुन्तीतां विद्यांमाद्र्यैः प्रायच्छत । माद्र्यामश्विभ्यां नकुलसहदेवावुत्पादितौ ॥ ६२ ॥

वाण से विद्ध होकर पांडु से कहा कि तुमने धर्म और काम रसको जानते हुए मुझको अपूर्ण मनोरथ देखकरभी मार डाला इस लिये तुमभी कामरस मैं अतृप्त रहकर उस दशा में ही शीघ्र परलोक को जाओगे यह शाप सुनतेही पांडु का रंग बदल गया और शाप से बचने के लिये स्त्री से मिलना त्यागदिया फिर उन्होंने कुंती और मादरी से कहा कि मैंने अपनी चपलता से कुदशा प्राप्तकी है सुना है कि पुत्र के विना स्वर्ग प्राप्ति नहीं होती फिर कुंतीसे कहा कि तू मेरेलिये पुत्र उत्पादन कर कुंतीने पतिकी आज्ञा नुसार धर्म से युधिष्ठिर पवनसे भीम और इन्द्रसे अर्जुन यह तीनपुत्र पैदाकिये।६०।पांडुने उस से प्रसन्न होकर कहा यह मादी निःसन्तान है सो यत्न से इस से अच्छा पुत्र उत्पन्न कराओ कुंतीने यह स्वीकार कर वह विद्यामाद्री को देदी जिससे वह धर्म आदिको बुलाकर पुत्रोत्पादन कर तीथी और माद्रीने दोनों अश्विनीकुमारों से नकुल और सहदेव दो यमजपुत्र उत्पन्नाकिये

were four, namely, Duryodhan, Dushasan, Bikarn, and Chitra sen. Pandu had two wives, Kunti and Madri. Kunti was also called Pratha. Once, Pandu went to forest to kill deer. There he saw a rishi conpling with a doe and shot him with an arrow before he had finished it. 58 The wounded rishi addressed Pandu, saying, "Being acquained with Dharm and laws of desire you have killed me when my desire was not satisfied. You will also die in the same state." Pandu's colour changed on hearing the curse and he left altogether the enjoyment of women to shun his sad fate by the curse of the Rishi. One day he said to his wives, Kunti and Madri, "I have, by my folly, fallen into this deplorable condition. I hear no childless being can attain heaven." He then asked Kunti to bring forth a son for him. Kunti by the order of her husband brought forth Yudhishthir by Dharm, Bhim by Pavan, and Arjun by Indra. Well pleased with her, Pandu said, "Your co-wife Madri is still childless. Try to get her good offspring." Kunti assented and taught Madri the secret of

माद्रीं खल्वलंकृतांदृष्ट्वा पाण्डुर्भावं चक्रे सतां स्पृष्ट्वैव विदेहत्वं प्राप्तः ॥ ६३ ॥ तत्रैनं चिताग्निस्थंमाद्रीसमन्वारुरोह॥उवाचकुन्तींयमयोरप्रमत्तया त्वयाभवितव्यमिति। ६४। ततस्तेपाण्डवाःकुन्त्या सहिताहास्तिनपुरमानीय तापसैर्भीष्मस्य विदुरस्यचनिवेदिताः सर्ववर्णानाञ्च निवेद्यांतर्हितास्तापसा बभूवुःप्रेक्षमाणानां तेषाम् ॥ ६५ ॥ तच्च वाक्यमुपश्रुत्य भगवतामन्तरीक्षात् पुष्पवृष्टिः पपातदेवदुन्दुभयश्च प्रणेदुः ॥ ६६ ॥ प्रतिगृहीताश्चपाण्डवाः पितुर्निधनमावेदयंतस्तस्यौर्ध्वदेहिकं न्यायतश्चकृतवन्तस्तांस्तत्र निवसतःपाण्डवान् बाल्यात्प्रभृतिदुर्योधनो नामर्षयत् ॥ ६७ ॥ पापाचारोराक्षसीं बुद्धिमाश्रितोऽनेकैरुपायैर्हन्तुञ्च व्यवसितोभावित्वाच्चार्थस्य नशकितास्तेसहुर्द्धुम् ॥ ६८ ॥ ततश्चधृतराष्ट्रेणव्याजेन वारणावतमनुप्रेषिता गमनमरोचयन्॥६९॥ तत्रापि

एक समय पांडुने माद्री को गहनों से सजी हुई देख कर काम वशहो माद्री के स्पर्श मात्र से शरीर छोड़ा पांडुकी देहमें आग लगने पर माद्रीभी उस के साथ सती हुई और कुंती से यह कह मरी कि तू सावधान होकर मेरे इन दो पुत्रोंको पालन करना ॥६४॥ फिर तपस्वीलोग कुंती सहित पांडवों को हस्तिना पुर में लिवालाये और उन्हें भीष्म और विदुरको दिया और ब्राह्मण क्षत्रिय आदि सब वर्णों के सामने पांडवों की जन्मकथा सुनाकर चलेगये इस के उपरान्त आकाश से फूलोंकी वर्षा हुई और देवताओं के नगाड़े बजने लगे॥६६॥पांडवोंने भीष्म आदि से एकाकी पिताकी मृत्यु कथा कहकर विधिपूर्वक पिताका और्ध्वदेहिक कर्म किया फिर वे उस स्थानमें बसने लगे दुर्योधन उनसे लड़कपन में ही झगड़ने लगा उस पापात्माने अपनी राक्षसी बुद्धि से नाना उपाय कर पांडवों को वहां से उखाड़ने की चेष्टाकी परन्तु जो कार्य होनहार है वह अवश्य होता है इस लिये उसका मनोर्थ सफल नहीं हुआ फिर धृतराष्ट्रने उनको धोखा देकर वारणा वत में भेजा

invoking the gods. Madri invoked the Ashwini Kumars and by them she became the mother of the twins, Nakul and Sahadev. One day, Pandu saw the beautiful Madri decked with ornaments and could not control his desire and as soon as he touched her he was no more. Madri burnt herself on the funeral pile of Pandu and entrusted her twin sons to the care of Kunti. 64. The hermits conducted Kunti with the sons of Pandu to Hastinapur and committed them to the care of Bhishm and Vidur. And having given them an account of the birth of the Pandavas, before an assembly of the Brahmans, Kshatryas and others, they went away. When the hermits had finished their speech a shower of flowers fell from the sky and there were sounds of the musical instruments of the gods. 66. The Pandavas gave an account of the death of their father to Bhishm and Bidur and performed the after-death ceremonies.

जतुगृहेदग्धुंसमारब्धान शकिताविदुरमंत्रीतेनेति ॥ ७० ॥ तस्माश्चहिडिम्बमन्तरा हत्वाएकचक्रांगताः ॥ ७१ ॥ तस्यामप्येकचक्रायां बकंनामराक्षसंहत्वा पाञ्चाल नगरमधिगताः ॥ ७२ ॥ तत्रद्रौपदींभार्य्यामविन्दन् स्वविषयंचाभिजग्मुः ॥ ७३ ॥ कुशलिनःपुत्रांश्चोत्पादयामासुः प्रतिविंध्यंयुधिष्ठिरः सुतसोमंवृकोदरः । श्रुतकीर्त्तिम- र्ज्जुनः शतानीकंनकुलः श्रुतकर्माणं सहदेवइति ॥ ७४ ॥ युधिष्ठिरस्तुगोवासनस्य शैब्यस्यदेविकांनाम कन्यांस्वयम्वराल्लेभे तस्यांपुत्रंजनयामास यौधेयंनाम ॥ ७५ ॥ भीमसेनोऽपिकाश्यां बलन्धरांनामोपयेमे वीर्य्यशुल्कांतस्यां पुत्रंसर्वगं नामोत्पादया मास ॥ ७६ ॥ अर्ज्जुनःखलुद्वारवतींगत्वा भगिनींवासुदेवस्य सुभद्रांभद्रभाषिणीं भार्यामुदावहत् । स्वविषयंचाभ्याजगाम कुशलीतस्यांपुत्रमभिमन्युं अतीवगुणसम्पन्नं दयितंवासुदेवस्याजनयत् ॥ ७७ ॥ नकुलस्तुचैद्यांकरेणुमतींनाम भार्यामुदावहत्तस्यां

पांडुलोग वहाँ गये वारणा वतमें दुर्योधन के बनाये हुए जतुग्रहमें जलने से विदुरकी सलाह से बचे फिर वारणा वतसे एक चक्रा नगरी में गये रास्ते में हिडिम्बको मारा और एचक्रा नगरी में पहुंच कर बक राक्षसको मारा फिर द्रौपदी से बिवाह कर अपने राज्यमें लौटकर कुछ दिन कुशलसे रहे उस समय द्रौपदीके गर्भ से पांच पुत्र उत्पन्न हुए उनमें युधिष्ठिरसे प्रतिविंध्य भीमसे सुतसोम, अर्जुनसे श्रुतकीर्ति, नकुलसे शतानीक और सहदेवसे श्रुतकर्मा उत्पन्नहुआ॥७४॥युधिष्ठिरने शैब्यराजकी कन्या देविकाको स्वयंवरमें प्राप्त किया देविका के गर्भ से यौधेय नामक पुत्र उत्पन्न हुआ भीमसेन ने काशिराजकी पुत्री बलंधरा से बिवाह करके सर्ग नामक पुत्र उत्पन्न किया अर्जुन ने द्वारका में जाकर बासुदेवकी बहन मधुर भाषिणी सुभद्राको हरकर उस से बिवाह किया और बिना विघ्न अपने नगर में लौटकर अतिगुणवान बासुदेवके प्यारे अभिमन्यु नामक पुत्रको उत्पन्न किया नकुलने

They began to live there. Duryodhan used to quarrel with them from his childhood. The bad natured man tried his best to oust them but could not succeed in his wicked designs against them. Dhritrashtra, then, deceitfully sent the Pandavas to Barnavat where they were to be burnt down in the house of lac specially prepared for their reception by Duryodhan. However, they made their escape by the advice of Vidur. From Barnavat they went to Ekchakra. On their way they killed Hidimb and at Ekchara they slew Vak. Then, they proceeded to Panchal where they obtained Draupadi for wife. From Panchal they came back to their capital and lived peacefully there for some time. Draupadi gave birth to five sons—Prativindya by Yudhishthir, Sutsom by Bhim Shrutkirti by Arjun, Shatanik by Nakul and Shrutkarma by Sahdev. 74.

पुत्रंनिरमित्रंनामाजनयत् ॥ ७८ ॥ सहदेवोऽपिमाद्रीमेव स्वयम्वरेविजयां नामोपयेमे मद्रराजस्यद्युतिमतो दुहितरंतस्यांपुत्र मजनयत्सुहोत्रंनाम ॥ ७९ ॥ भीमसेनस्तुपूर्व मेव हिडिम्बायांराक्षसं घटोत्कचं पुत्रमुत्पादयामास ॥ ८० ॥ इत्येतेएकादश पाण्ड वानां पुत्रस्तेषांवंशकरोऽभिमन्युः ॥ ८१ ॥ सविराटस्यदुहितर मुपयेमेउत्तरांनाम । तस्यामस्य परासुर्गर्भोऽभवत्तमुत्सङ्गेन प्रतिजग्राहपृथानियोगात् । पुरुषोत्तमस्य वासु देवस्य षाण्मासिकंगर्भमहमेनं जीवयिष्यामिति ॥ ८२ ॥ सभगवतावासुदेवेनास- ञ्जातबलवीर्य पराक्रमोऽकालजातोऽस्त्राग्निना दग्धस्तेजसास्वेनसजीवितः जीवयित्वा चैनमुवाचपरिक्षीणे कुलेजातोभवत्वयं परीक्षिन्नामेति ॥ ८३ ॥ परीक्षितखलुमाद्रवतीं नामोपयेमेत्वन्मातरंतस्यां भवान्जज्ञेजनमेजयः ॥ ८४ ॥ भवतोवपुष्टमायांद्वौ पुत्रौ जज्ञातेशतानीकः शंकुकर्णश्चशतानीकस्य वैदेह्यांपुत्र उत्पन्नोऽश्वमेधदत्तइति ॥ ८५ ॥

चेदिराज की पुत्री करेणुमती से विवाह करके उस से निरमित्र नाम पुत्र उत्पन्न किया सह देव ने स्वयम्वर में द्युतिमान मद्रराज की कन्या विजया से विवाह किया उस से सुहोत्र नामक पुत्रका जन्म हुआभीमसेनने पहले ही हिडिंबासे घटोत्कच राक्षस उत्पन्न कियाथा पांडवोंके यह ग्यारह पुत्रथे परन्तु अभिमन्युसेही वंशकी रक्षाहुई॥८१॥अभिमन्युने विराट राजकी पुत्री उत्तरा से विवाह किया उस से उत्तरा के गर्भ में छः महीने का अस्त्राग्नि से जला हुआ पुत्र पृथ्वी पर गिरा परन्तु पुरुषोत्तम वासुदेव ने कुंतीसे यह कहा मैं इस संतान को जिलाऊंगा उन के कहने से कुंतीने उस मरेहुए बालकको गोद में लिया और भगवान वासुदेवने उसअकाल उत्पन्न बल वीर्य पराक्रमयुक्त अस्त्राग्निसे जलेहुए बालकको अपने तेजसे जिलाया और कहा कि कुलके परीक्षित होनेपर यह बालक उत्पन्नहुआ है इसलिये इसका नाम परीक्षित होगा ॥८३॥ हे महाराज परीक्षित ने माद्रवती नामवाली आपकी मातासे विवाहकिया उस माद्रवती से आप, जन्मेजय नामसे उत्पन्न हुए आपने वपुष्टमा नामवाली रानी से शतानीक और शंकुकर्ण दोपुत्र उत्पन्न किये हैं शतानीक के

Yudhishthir won Shaivya Raj's daughter Devika at Swayamvar. Youdheya was born of her. Bhim married Kashiraj's daughter Balandhara and had by her a son named Sarwak. Arjun in Dwarka eloped with Vasudev's sister Subhadra and returned safely to his capital. There a son named Abhimanyu was born of her. Nakul married Chediraj's daughter Karendumati and had by her a son named Nirmav. Sahdev won at Swayamvar Madraraj's daughter, Bijaya and had by this marriage a son named Suhotra. Bhimsen had already a son, Ghatotkach by his Rakshasi wife Hidimba. The Pandavas had eleven sons in all. Of them Abhimanyu was the perpetuator of the line. 81. Abhimanyu married Biratraj's daughter, Uttara. Her embryo of six month's standing fell on earth by the hurt caused by a fire arm. The best of men Vasudev brought it back to life. By his order Kunti took the

एषपूरोर्वंशःपाण्डवानाञ्च कीर्त्तितोधन्यःपुण्यः परमपवित्रःसततंश्रोतव्यो ब्राह्मणैर्नियमवद्भिरनन्तरं क्षत्रियैःस्वधर्मनिरतैः प्रजापालनतत्परैर्वैश्यैरपिच श्रोतव्योऽधिगम्यश्च । तथाशूद्रैरपि त्रिवर्णशुश्रूषुभिः श्रद्दधानैरिति ॥ ८६ ॥ इतिहासमिमं पुण्यमशेषतः श्रावयिष्यन्तियेनराः । श्रोष्यन्तिवानियतात्मानो विमत्सरामैत्रा वेदपरास्तेऽपिस्वर्गजितः पुण्यलोकाभवन्ति सततंदेवब्राह्मण मनुष्याणांमान्याः सम्पूज्याश्च ।८७। परंहीदंभारतंभगवताव्यासेनप्रोक्तंपावनं येब्राह्मणादयोवर्णाःश्रद्दधानाअमत्सरमैत्रावेदसम्पन्नाः श्रोष्यन्तितेऽपिस्वर्गजितः सुकृतिनोऽशोच्याःकृताकृतेभवंति ॥ ८८ ॥ भवतिचात्रश्लोकः । इदंहिवेदैःसमितं पवित्रमपिचोत्तमम् । धन्यंयशस्यमायुष्यं श्रोतव्यंनियतात्मभिः ॥ ८९ ॥

इत्यादिपर्वणि सम्भवपर्वणि पूरुवंशानुकीर्त्तने पञ्चनवतोऽध्यायः ॥ ९५ ॥

वीर्य और वैदेही के गर्भ से अश्वमेध दत्त नामक एक पुत्र उत्पन्नहुआ हे राजन् पूरु और पांडवोंकी यह वंश कथा कहचुका धन्य,पुण्यभरी और परम पवित्रयह कथा नियमसे ब्राह्मण लोग अपने धर्म में तत्पर व प्रजापालने में लगेहुए क्षत्रियगण वैश्यगण और इन तीनों वर्णोंके सेवक शूद्रगण अवश्यसुनें॥८६॥और इसका अर्थ जानें जो सब देवपरायण ब्राह्मण और दूसरे मनुष्य अहंकार रहित और संयतहोकर इस पवित्र इतिहासको सम्पूर्ण सुनें या सुनावेंगे वह स्वर्गको जीतकर पुण्यलोकमें बसेंगे और देवता और ब्राह्मण और दूसरे मनुष्यों के पूजनीयहोंगे।८७।यह परम पवित्र महाभारत भगवान् वेदव्यास ने बनाया है जो वेदज्ञानी ब्राह्मणादि चारोंवर्ण अहंकार रहित और श्रद्धायुक्त द्वेषरहित होकर इसको सुनेंगे वे सुकृतशाली और उपकारी होंगे और पापाचरण करने परभी शोकदशाको नहीं प्राप्तहोंगे देवताओंकी तरह पवित्र उत्तम धन और यशका बढाने वाला यह महाभारत नियत आत्मा ओं के सुनने योग्य है ॥ ८९ ॥

dead child in her lap and Bhagwan Vasudev revived the untimely born, mighty child, burnt by the fire of the missile. He then said, "This child was born when the line was nearly extinct, therefore, his name shall be Parikshit. Parikshit married Madravati, your mother, who brought forth *you*, Janamejaya. You have two sons—Shatanik and Shankukarn, by our wife Bapushtama. Shatanik's wife Baidehi has given birth to a son—Ashwamedhdatta. I have told, O king, the history of the Paurav dynasty. This holy history should be heard by Kshatrias, Vaishyas and Shudras from the holy Brahmans. All who hear or read this history shall win heaven and shall be respected by men and gods. 87. Vyas made this holy Bharat. Those who hear this history shall be freed from sins and shall acquire heaven. Holy like the Vedas, good, increasing wealth, fame and life, this Mahabharat is worthy of being heard by good men. 89.

वैशम्पायनउवाच । इक्ष्वाकुवंशप्रभवो राजासीत्पृथिवीपतिः । महाभिषइतिख्यातः सत्यवाक्सत्यविक्रमः ॥ १ ॥ सोऽश्वमेधसहस्रेण राजसूयशतेनच । तोषयामासदेवेशं स्वर्गंलेभेततःप्रभुः ॥ २ ॥ ततःकदाचिद्ब्रह्माणमुपासाञ्चक्रिरेसुराः तत्रराजर्षयोह्यासन् सचराजामहाभिषः ॥ ३ ॥ अथगङ्गासरिच्छ्रेष्ठा समुपायात्पितामहम् । तस्यावासःसमुद्धूतं मारुतेनशशिप्रभम् ॥४॥ ततोऽभवन्नसुरगणाः सहसावाङ्मुखास्तदा । महाभिषस्तुराजर्षिर शङ्कोदृष्टवान्नदीम् ॥५॥ सोपध्यान्तोभगवता ब्रह्मणातुमहाभिषः । उक्तश्चजातोमर्त्येषु पुनर्लोकानवाप्स्यसि ॥ ६ ॥ सचिन्तयित्वानृपतिन्नृपानन्यांस्तपोधनान् । प्रतीपंरोचयामास पितरंभूरितेजसम् ॥ ७ ॥ महाभिषन्तुतंदृष्ट्वा नदीधैर्य्याच्चुयतंनृपम् । तमेवमनसाध्यायन्त्यु पावर्त्तत्सरिद्वरा ॥ ८ ॥ सातुविध्वस्त वपुषः कश्मलाभिहतान्नृप । ददर्शपथिगच्छन्ती वसून्देवान् दिवौकसः ॥ ९ ॥ तथारूपांश्च

अध्याय ९६ ॥

वैशम्पायनने कहा कि इक्ष्वाकु वंश में उत्पन्न महाभिष नामवाला सत्यवादी और सत्य पराक्रमी राजाथा उसने सहस्र अश्वमेध और सौ राजसूर्य यज्ञ करके देवराज को प्रसन्न किया इस से वह अंतकाल में स्वर्ग को गया एक समय देवतालोग ब्रह्माजीकी उपासनाकर रहेथे उससमय बहुतसे राजर्षि महाभिष सहित उस स्थानमें उपस्थितथे।३। फिर नदियों में प्रधान गंगा पितामह के सामने उपस्थित हुई उसका चन्द्र प्रकाश सदृश वस्त्र पवन से उड़ता देखकर देवताओं ने मुँहनीचे करलिये परन्तु राजर्षि महाभिष निःशंकचित्त से उसीतरह देखतारहा।५।इसलिये भगवान ब्रह्माने महाभिष को शापदेकर कहा तुम मर्त्य लोक में जन्मलोगे और कुछ काल पीछे फिर पुण्यलोक में आसकोगे।६। राजा महाभिषने राजाओं और तपोधनों का कुछ काल ध्यान करके तेजस्वी राजा प्रतीप के वीर्य से जन्मले

CHAPTER XCVI

Vaishampayan said, "There was in the family of Ikshwaku, a truthful and valiant king, named Mahabhish, who had gratified the king of gods by performing a thousand Ashwamedh and hundred Rajsuya sacrifices and consequently entered heaven. Once upon a time, when the gods were worshipping Brahma in the presence of many Rajarshis including Mahabhish, 3. Ganga entered the audience hall and her moon-white dress was uplifted by the wind. All the gods cast down their heads but the Rajarshi Mahabhish gazed on at her attentively. For this he was cursed by Brahma who said, "You will be born on the earth and shall return here after some time. 6. The king recounted the names of kings and ascetics and at length expressed a desire to be born in the house of Pratip. Ganga looked at the discomfiture of Mahabhish with

तान्दृष्ट्वा पप्रच्छसरितांवरा । किमिदंनष्टरूपाःस्थ कच्चित्क्षेमंदिवौकसाम् ॥ १० ॥ तामूचुर्वसवोदेवाःशप्ताःस्मोवैमहानदि। अल्पेऽपराधेसंरम्भाद्वशिष्ठेनमहात्मना । ११ । विमूढाहिवयंसर्वे प्रच्छन्नऋषिसत्तमम् । सन्ध्यांवशिष्ठमासीनं तमत्यभिसृताःपुरा। तेन कोपाद्वयंशप्ता योनौसम्भवतेतिह ॥ १२ ॥ नतच्छक्यंनिवर्त्तयितुं यदुक्तंब्रह्मवादिना। त्वमस्मान्मानुषीभूत्वा सृजपुत्रान्वसूनभुवि ॥ १६ ॥ नमानुषीणांजठरं प्रविशेमवयं शुभे । इत्युक्तातैश्च वसुभिस्तथेत्युक्त्वाब्रवीदिदम् ॥ १४ ॥ गङ्गोवाच। मर्त्त्येषुपुरुषश्रेष्ठः कोवःकर्त्ताभविष्यति ॥१५॥ वसवऊचुः । प्रतीपस्यसुतोराजा शान्तनुर्लोकविश्रुतः । भवितामानुषेलोके सनःकर्त्ताभविष्यति ॥ १६ ॥ गङ्गोवाच । ममाप्येवंमतंदेवा यथ मांवदतानघाः । प्रियंतस्यकरिष्यामि युष्माकञ्चैतदीप्सितम् ॥ १७ ॥ वसवऊचुः ।

नेकी अभिलाषा की गंगा राजा महाभिष को अधैर्य्य देखकर मनही मनमें उसका विचार करती चलीगई जातेहुए उसने स्वर्ग से गिरायेहुए वसु देवताओंको मनकी पीड़ा से दुःखी देखा ।१०। हेराजन् भागीरथीने उनको इसदशा में देखकर पूछा कि तुम क्यों गिराये जाते होदेवताओं का कोई अमंगलतो नहीं हुआ वसुओं ने कहा हे महानदी वसिष्ठने थोड़े दोषसे क्रोधित होकर, हमको शाप दिया है ऋषिश्रेष्ठ वसिष्ट छिपकर सन्ध्यो पासन कर रहेथे हम उनको लाँघके चले गये इससे क्रोधित होकर उन्होने हमको शाप दिया कितुम नरयोनिमें जन्मलो॥१२॥ब्रह्मज्ञानी महर्षिने जो कहाहै वह टलनहीं सकेगा इसलिये तुम पृथ्वी में मानवीवन कर हमको पुत्रवनाओ । हे शुभे हम मानवी के पेट में नहीं आयँगे गंगाने वसुओं की वातस्वीकार की और पूछा कि मर्त्य लोक में कौन से श्रेष्ठ पुरुष से तुम्हारा जन्महोगा॥१५॥वसुओंनेकहा कि पृथ्वीमें प्रतीपराजाके पुत्र शांतनु नाम वीनोंलो कमें प्रशंसनीय राजा होंगे हम चाहते हैं कि वोह हमारे जन्म दाताहों गंगाने कहा हे निष्पाप देवताओं तुम जैसा कहते हो वह मुझे स्वीकार है मैंने उस राजा शांतनु का

compassion and went away thinking about him. In the way she saw the heavenly Basus falling down and asked the reason. They replied, " Bashisht has cursed us for a trivial offence and by his curse we shall have to be born on the earth. 12. His word cannot be false. We therefore pray that you may be pleased to assume human shape to give us birth. Thus we will be saved the disgrace of entering the womb of a woman." She consented and said, " Who will be your father on earth ?" 15. The Vasus said, " We wish to become the sons of Shantanu, the son of king Pratip." Ganga agreed with them. The Vasus further requested her to throw them into water as soon as they should be born so that, they might not remain long on earth." Ganga said, " I shall do as you desire. But in order that my union with Shantanu, desirous of offspring, may

जातान्कुमारान् स्वानपसुप्रक्षेप्तुंत्वमर्हसि । यथानचिरकालंनो निष्कृतिःस्यात्त्रिलोकगे ॥ १८ ॥ गंगोवाच । एवमेतत्करिष्यामि पुत्रस्तस्यविधीयताम् । नास्यमोघःसङ्गमःस्यात् पुत्रहेतोर्मयासह ॥ १९ ॥ वसवऊचुः । तुरीयार्द्धंप्रदास्यामो वीर्यस्यैकैकशोवयम् । तेनवीर्य्येणपुत्रस्ते भवितातस्यचेप्सितः ॥ २० ॥ नसम्पत्स्यतिमर्त्येषु पुनस्तस्यतुसन्ततिः । दस्मादपुत्रःपुत्रस्ते भविष्यतिसवीर्यवान् ॥ २१ ॥ एवंतेसमयं कृत्वा गङ्गयावसवःसह । जग्मुःसंहृष्टमनसो यथासङ्कल्पमञ्जसा ॥ २२ ॥

इत्यादिपर्वणि सम्भवपर्वणि महाभिषोपाख्याने-
षणवतोऽध्यायः ॥ ९६ ॥

वैशम्पायनउवाच । ततःप्रतीपोराजासीत् सर्वभूताहितःसदा । निषसादसमावह्नी गंङ्गाद्वारगतोजपन् ॥ १ ॥ तस्यरूपगुणोपेता गङ्गास्त्रीरूपधारिणी । उत्तीर्यसलिला-

---

अनुष्ठान करने की प्रतिज्ञाकी है उसी को तुम भी चाहतेहो वसुओं ने कहा । हे तीनों लोक में जानेवाली जब हम तुम्हारेपुत्र होकर जन्मलें तब तुम हमको जल में फेंक देना कि सदा हमको मर्त्यलोक तें रहना न पडे॥१८॥गंगाने कहाकि तुम जैसा कहतेहो वही होगा परन्तु पुत्रार्थी शान्तुका मुझसे मिलना व्यर्थ नहो इसलिये ऐसा विधान करो कि मेरा एक पुत्र जीवित रहे वसुओं मे कहा कि हम में से हरएक अपने तेजका आठवां भाग देकर तुम्हारी और उसकी अभिलाषा पूर्ण करेंगे और एक पुत्र होकर जीतारहेगा परंतु मर्त्यलोक में उसका वंशनहीं रहेगा वह वीर्यवान् निःसंतान होगा वसु गंगा से ऐसा नियम करके उसी क्षण प्रसन्न चित्त सै मनमाने स्थान को गये ॥ २२ ॥

अध्याय ९७ ॥

वैशम्पायन ने कहा कि सब भूतों के हितकारी राजा प्रतीप बहुत वर्षतक गंगाके किनारे बसकर जप करते रहे॥१॥रूप गुणयुक्त अति लुभाने वाली स्त्री रूपिणी दिव्यरूपा मनस्विनी, गंगाजल से निकल कर राजर्षि के शालवृक्ष के समान दहनी जैंघा पर जावैठी

---

not become futile, you must so arrange as to leave a son." 19. The Vasus said, " Each of us shall impart an eighth part of his glory to produce a son who will live long on the earth but shall leave no issue." Having so arranged with Ganga, the Vasus left her with a light heart." 22.

CHAPTER XCVII

Vaishampayan said, " King Pratip stayed very long at the bank of the Ganges to perform his worship. 1. The beautiful and enchanting goddess Ganga came out as a woman and sat on the right knee of the Raja who asked her to express her desire. The

तस्माल्लोभनीयतमाकृतिः ॥ २ ॥ अधीयानस्यराजर्षेर्दिव्यरूपामनस्विनी । दक्षिणं शालशंकाश मूरुमेजेशुभानना ॥ ३ ॥ प्रतीपस्तुमहीपालस्ता मुवाचयशस्विनीम् । करोमिकिंतेकल्याणि प्रियंयत्तेऽभिकांक्षितम् ॥ ४ ॥ स्त्र्युवाच । त्वामहंकामयेराजन् भजमानांभजस्वमाम् । त्यागःकामवतीनांहि स्त्रीणांसद्भिर्विगर्हितः ॥ ५ ॥ प्रतीप उवाच।नाहंपरस्त्रियंकामाद् गच्छेयंवरवर्णिनि। नचासवर्णांकल्याणि धर्ममेतद्धिमेव्रतम् ॥ ६ ॥ स्त्र्युवाच । नाश्रेयस्यस्मिनागम्या नवक्तव्याचकर्हिचित् । भजन्तींभजमां राजन् दिव्यांकन्यांवरस्त्रियम् ॥७॥प्रतीपउवाच । त्वयानिवृत्तमेतत्तु यन्मांचोदयसि प्रियम् । अन्यथाप्रतिपन्नं मांनाशयेद्धर्मविप्लवः ॥ ८ ॥ आप्यदक्षिणमूरुंमे त्वमाश्लिष्टा वराङ्गने । अपत्यानास्नुषाणांच भीरुविद्धेयतद्वासनम् ॥ ९ ॥ सव्योरुःकामिनी भोग्यस्त्वयासचविवर्जितः । तस्मादहंनाचरिष्ये त्वयिकामंवराङ्गने ॥ १० ॥ स्नुषामे भवशुश्रोणि पुत्रार्थंत्वांवृणोम्यहम् । स्नुषापक्षंहिवामोरु त्वमागम्यसमाश्रिता ॥ ११ ॥

राजा प्रतीप ने उस स्त्री से कहा हे कल्याणी ! तुम्हारा क्या प्रियकार्य करूं ॥ ४ ॥ स्त्रीने कहा हे महाराज मैं तुम्हारी कामना करके आईहूँ तुममेरी कामना पूरी करो साधु लोग इच्छावती स्त्री को त्यागदेना दूषित समझते हैं प्रतीप ने कहा । हेसुन्दरी ! मेरा धर्मयुक्त व्रत यहहै कि मैं कामवश पराई स्त्री या दूसरे वर्णकी स्त्रीसे नहीं मिलता उस स्त्रीनेकहा हे महाराज मैं कुलक्षणा न मिलनेके योग्य और निंदित स्त्री नहींहूँ मैं प्रार्थनाकर रहीहूँ तुमभी मेरी कामना पूरीकरो॥७॥प्रतीपनेकहा कि तुम जिस प्रिय कार्यके लिये मुझे लालच देती हो उससे मैं निवृत्तहूं यदि इस समय उसके विरुद्ध आचरण करूंतो यह अधर्म मुझको नष्ट करेगा विशेष कर तुम मेरी दाहिनी जंघा पर बैठीहो । हे सुन्दरि ! पुरुषकी दहनी जंघा पुत्र,कन्या, और पुत्रवधुके बैठनेकी जगहहै तुम बायीं जंघापर नहीं बैठी इस लिये मैं तुमसे कामयुक्त आचरण नहीं करसक्ता तुम आकर मेरी उस जंघापर बैठीं जो पुत्रवधू की बैठनेकी जगहहै इसलिये तुम मेरीपुत्रवधूहो मैंने अपने पुत्रके लिये तुमको लेलिया११

woman said, " I love you. You must love me. The good donot disaord a woman full of desire." Pratip said, " Beautiful woman, I do not wish to possess a woman who belongs to another or, to a different caste." The woman replied, " O king, I am not a woman unworthy of you. I am a beautiful woman, the object of desire, a heavenly maid, and wishing to make you my lord." 7. Pratip said, " I am above the temptation. Dharm will destroy me if I act unlawfully. Besides you have occupied my right knee, the seat of a son, daughter, or, son's wife; while the seat of one's own wife is the left knee. I can not therefore, make you my wife. You may marry my son and I accept you as my son's wife."11. The woman said, " I agree to become your son's wife for, you are the

स्त्र्युवाच ॥ एवमप्यस्तुधर्मज्ञ संयुज्येयंसुतेनते । त्वद्भक्त्यातुभजिष्यामि प्रख्यातंभारतं कुलम् ॥ १२ ॥ पृथिव्यांपार्थिवायेच तेषांयूयंपरायणम् । गुणानहिमयाशक्या वक्तुं वर्षशतैरपि ॥ १३ ॥ कुलस्ययेवःप्रथितास्तत् साधुत्वमथोत्वमम् । समयेनेहधर्मज्ञ आचरेयंचयद्विभो । तत्सर्वमेवपुत्रस्तेन मिमांसितकर्हिचित् ॥ १४ ॥ एवंवसन्तीपुत्रेते वर्द्धयिष्याम्यहंरतिम् । पुत्रैःपुण्यैःप्रियैश्चैव स्वर्गंप्राप्स्यतितेसुतः ॥१५॥ वैशम्पायन उवाच । तथेत्युक्त्वातुसाराजंस्तत्रैवान्तरधीयत । पुत्रजन्मप्रतीक्षन्वै सराजातदधार यत् ॥ १६ ॥ एतस्मिन्नेवकालेतु प्रतीपःक्षत्रियर्षभः । तपस्तेपेसुतस्यार्थे सभार्य्यःकुरुनन्दन ॥ १७ ॥ तयोःसमभवत्पुत्रो वृद्धयोःसमहाभिषः । शान्तस्यजज्ञेसन्तान स्तस्माद्दासीत्सशान्तनुः ॥ १८ ॥ संस्मरंश्चाक्षयाँल्लोकान् विजातान्स्वेनकर्मणा । पुण्यकर्मकृदेवासीच्छान्तनुः कुरुसत्तमः ॥१९॥ प्रतीपःशान्तनुंपुत्रं यौवनस्थंततोऽब्रवीत् ।

स्त्री ने कहा । हे धर्मज्ञ तुम अपने पुत्रसे मेरा विवाह करना चाहते हो यह मुझ को स्वीकार है तुमपर भक्ति करके मैं इसवंश को बढाऊंगी पृथ्वीपर जितने राजा हैं तुम उनकी गतिहो तुम्हारे वंशमें जितने गुणहैं वह मैं सैकडों वर्षमेंभी पूरेनहीं करसक्ती ।१३। ऋषिवंश में जो प्रख्यातथे उनकी साधुता और श्रेष्टता कही नहीं जासकती हेधर्मज्ञ ! मेरी एक विनय स्वीकार करनीहोगी कि मैं जो कुछकरूं उसको कभी तुम्हारा पुत्र न रोंके इसी नियम से मैं तुम्हारे पुत्रसे प्रेम बढाऊंगी तुम्हारा पुत्र प्रियकार्य और पुत्र से स्वर्ग कीप्राप्ति करेगा ।१५। वैशम्पायनने कहा हे राजन् ! गंगा यह कहकर उसीस्थानमें लोपहुई राजानेपुत्र की इच्छा करके वही निश्चय किया और उसीसमय से क्षत्रियों में श्रेष्ठ कुरू कुलदीपक प्रतीप स्त्री सहित पुत्र के लिये तपकरने लगे बुढ़ापें में दम्पति से महात्मा महाभिषने जन्म लिया बूढ़ेराजा के शांत चित्तहोने पर उस सन्तानका जन्महुआ ॥१८॥ इसलिये उसकानाम शांतनु रक्खागया कुरूकुल श्रेष्ट शांतनु अपने कर्मसे अक्षयलोक जीतनेके लिये पुण्य कर्मोंका अनुष्ठान करने लगा फिरराजा प्रतीप अपने पुत्र शांतनु को तरुण

greatest monarch on earth and I cannot give the praise of your family its due even in a thousand years. There have been many virtuous kings in your family. 13. However, I make one condition. Your son shall not question my doings. On this condition I shall study to love your son who will get offspring and heaven, the result of good deeds. 15. *Vaishampayan* said, " Having so said, Ganga disappeared and the king became desirous of producing a son. He with his wife, practised asceticism to get a son. In her old age, Dampati, the wife of the king, gave birth to Mahabhish. The king had got the son in his old age. 18. When the child became young, the king said to him, " Formerly a woman had come to me desirng to do you good. Donot ask any questions about her name and

पुरास्त्रीमांसमभ्यागा च्छान्तनोभूतयेतव ॥ २० ॥ त्वामात्रजेद्यदिरहः सापुत्रवरवर्णिनी । कामयानाभिरूपाढ्या दिव्यस्त्रीपुत्रकाम्यया । २१ ॥ सात्वयानानुयोक्तव्या कासिकस्यासिचांगने । यच्चकुर्यान्नतत्कर्म सामपृष्टव्यात्वयानघ । मन्नियोगाद्भजन्तीं तांभजेथाइत्युवाचतम् ॥ २२ ॥ वैशम्पायनउवाच । एवंसन्दिश्यतनयं प्रतीपःशान्तनुं तदा । स्वेचराज्येऽभिषिच्यैनं वनंराजाविवेशह ॥ २३ ॥ सराजाशान्तनुर्द्धीमान् देवराजसमद्युतिः । बभूवमृगयाशीलः सततंवनगोचरः ॥ २४ ॥ समृगान्महिषांश्चैव विनिघ्नन्राजसत्तमः । गंगामनुचचारैकः सिद्धचारणसेविताम् ॥ २५ ॥ सकदाचिन्महाराज ददर्शपरमांस्त्रियम् । जाज्वल्यमानांवपुषा साक्षाच्छ्रियमिवापराम् ॥ २६ ॥ सर्वानवद्यांसुदतीं दिव्याभरणभूषिताम् । सूक्ष्माम्बरधरामेकां पद्मोदरसमप्रभाम् ॥२७॥ तांदृष्ट्वाहृष्टरोमाभूद्विस्मितोरूपसम्पदा । पिबन्निवचनेत्राभ्यां नातृप्यतनराधिपः

देखकर बोला हे शांतनु तुम्हारे मंगल के लिये पहले एक सुन्दरी नारी मेरेपास आईथी हे पुत्र । वह अनुपम रूपवाली कामिनी यदि पुत्रकी कामना से तुम्हारे पास एकान्त में आवे तौ तुम उससे यह न पूंछना कि तू कौन और किसकी बेटी है और जो कुछ कर्म वह करै वहभी उससे न पूंछना हे अनघ तुम मेरी इसआज्ञाका पालनकरना।२२।वैशम्पायनने कहा कि राजा प्रतीप शांतनु को यह आज्ञा देकर अपने राज्य पर अभिषिक्त कर के वनको गया इन्द्रके समान द्युतिमान श्रीमान राजाशांतनु वनमें जाकर सदा मृगया कियाकरताथा॥२४॥ एकसमय वह राजाओंमें श्रेष्ठ मृगको वधकर के शुद्ध आचरणवाला गंगाके सामने अकेला घूमरहाथा उससमय साक्षात् लक्ष्मीकेसमान कान्तिवाली अनिंदिता दिव्य आभूषणों से सजी शोभा देनेवाले दांतोंसे शोभित एक परम सुंदरी नारीको देखा ॥२७॥राजा शांतनुने पद्मोदर सदृश सुंदरी रमणीको पतला वस्त्रपहने हुये देखकर उस के रूपसे आश्चर्य माना और उसको रोमांच होगया उसके नेत्ररूपी दो चकवे रूप चन्द्र

parentage, when she again seeks you in private with the desire of offspring, neither you shall question her doings. It is my command and desire and you shall deal with her accordingly 22. *Vaishampayan* says that the king, having told this to his son, became a recluse. The wise king Shantanu, like Indra in glory, used to hunt the deer of the forest.24. One day as he was roaming along the bank of the Ganges after chase, he saw a woman, splendid as Lakshmi, faultless, decked with celestial ornaments, and of beautiful teeth.27. The king was much astonished at the beauty of her lotus like body shining through the fine clothes and could not restrain his desire to look at her as long as he could, The beautiful woman, too, struck by the arrow of love, could not turn her eyes from looking at the beautiful and manly features of the king. The king said to her in sweet

॥२८॥साचदृष्ट्वैवराजानं विचरन्तंमहाद्युतिम् । स्नेहादागतसौहार्दा नातृप्यतविलासिनी ॥ २९ ॥तामुवाचततोराजा सान्त्वयन्श्लक्ष्णयागिरा । देवीवादानवीवात्वं गन्धर्वी चाथवाप्सराः ॥ ३० ॥ यक्षीवापन्नगीवापि मानुषीवाशुभध्यमे । याचेत्वांसुरगर्भाभे भार्यामेभवशोभने ॥ ३१ ॥

इत्यादिपर्वणि सम्भवपर्वणि शान्तनूपाख्याने सप्तनवतोऽध्यायः ॥ ९७ ॥

वैशम्पायनउवाच । एतच्छ्रुत्वावचोराज्ञः सस्मितंमृदुवल्गुच । वसूनांसमयंस्मृत्वा याभ्यगच्छदनिन्दिता ॥ १ ॥ उवाचचैवराज्ञःसा ह्लादयन्तीमनोगिरा । भविष्यामि महीपाल महिषीतेवशानुगा ॥२॥ यत्कुर्यामहंराजन् शुभंवायदिवाशुभम् । नतद्वारयितव्यास्मिन् वक्तव्यातथापियम् ॥ ३ ॥ एवंहिवर्त्तमानेऽहं त्वयिवत्स्यामिपार्थिव । वारितावियियंचोक्ता त्यजेयंत्वामसंशयम् ॥ ४॥ तथेतिराज्ञासातूक्ता तदाभरतसत्तम ।

माके अमृतको पीकर तृप्त नहीं हुआ और बिलसिनी नारी भी राजाको अति उज्वलरूप से चमकते और घूमते देखकर स्नेह और प्रेममें फँसकर अपनी देखने की लालसा पूर्ण न करसकी राजाने उसको मीठी बातों से समझा कर कहा हे सुन्दरी । देवीकी समान कांतिवाली मैं तुमसे यह प्रार्थनाकरताहूँ कि तुम चाहे देवी या दानवी, गंधर्वी या अप्सरा पन्नगी या यक्षी मानवी या जो कुछहो मेरी भार्या बनो ॥ ३१ ॥

अध्याय ॥ ९८ ॥

वैशम्पायन ने कहा कि अनिंदिता गंगा राजाकी मीठी और मनोहर वाणी मन्द २ हँसी के साथ सुनकर और वसुओं के नियम को स्मरण करके राजा के सामने गई और बातों से उस के चित्तको प्रसन्न करती हुई बोली हे राजन् । मैं तुम्हारी रानी और वशी भूता हूंगी पर मेरा कार्य यदि अशुभभी हो तो तुम रोकने या अप्रिय बात कहने नहीं पावोगे ॥३॥हेराजन् यदि तुम ऐसे नियमसे मेरेसाथ रहसको तो मैं तुम्हारेसाथ रहूंगी

tones, " O beautiful woman, a goddess in splendour' I request you, whether yoube goddess or Domoness, Gandharvi or Apsara, Pannagi or Yakshi or human being, to become my wife.31.

CHAPTER XCVIII

Vaishampayan continued that having heard the Raja's sweet words the faultless Ganga remembered her promise to Vasus and coming forward cheered the heart of the king with the following speech:- " I become your queen, O king, on condition that you will never question my deeds whether right or wrong and never speak harshly with me ! 3. I shall live with you on this condition only and on your acting against it I shall leave you. The king consented and the pair began to live happily to gether. The king was very happy and ever tried to please her. He did not think

प्रहर्षमतुलंलेभे प्राप्यतंपार्थिवोत्तमम् ॥५॥ आसाद्यशांतनुस्तांच बुभुजेकामतोवशी । नप्रष्टव्येतिमन्वानो नसतांकिंचिदूचिवान् ॥ ६ ॥ सतस्याःशीलवृत्तेन रूपौदार्य्यगुणेन च । उपचारेणचरहस्तुतोष जगतीपतिः ॥ ७ ॥ दिव्यरूपाहिसादेवी गङ्गात्रिपथगामिनी । मानुषंविग्रहंकृत्वा श्रीमन्तंवरवर्णिनी ॥ ८ ॥ भार्य्योपनतकामस्य भार्य्या चोपनताभवत् । शांतनोर्नृपसिंहस्य देवराजसमद्युतेः ॥ ९ ॥ सम्भोगस्नेहचातुर्य्यैर्हावैश्चास्यमनोहरैः । राजानंरमयामास यथारेमेतथैवसः ॥ १० ॥ सराजारतिसक्तत्वा दुत्तमस्त्रीगुणैर्हृतः । सम्वत्सरानृतून्मासान् बुबुधेनबहून्गतान् ॥ ११ ॥ रममाणस्तया सार्द्धं यथाकामंनरेश्वरः । अष्टावजनयत् पुत्रांस्तस्याममरसन्निभान् ॥ १२ ॥ जातंजातंचसापुत्रं क्षिपत्यम्भसिभारत । प्रीणाम्यहं त्वामित्युक्त्वा गङ्गास्रोतस्यमज्जयत्

यदि तुमने रोका या अप्रिय वाणी कही तो निश्चय तुमको त्याग दूंगी राजाके यह मानने पर गंगाने उस श्रेष्ठ राजा को प्राप्त कर अपार आनन्द पाया राजा शांतनुभी उसको पाकर और उसके वशमें होकर बहुत सुखसे रहने लगा पूछना उचित न समझकर उस से कुछ पूछता नहीं था परन्तु उसकी शीलता इच्छा व्योहार सुन्दरता, उदारता, और एकांत सेवासे संतुष्ट रहनेलगा॥७॥ सुन्दरी दिव्यरूप त्रिपथगामिनी देवीगंगा शोभनीय मानवी शरीर धारण करके इन्द्रके समान द्युतिमान राजा शांतनुके सौभाग्य से उसका मनोर्थ सफल करने वाली प्यारीपत्नी हुई और सम्भोग स्नेह, चतुराई, अच्छे नाच और मनोहर हाव भाव से राजा का मन बहलाने लगी राजाभी उस से प्रेम करता था वह अच्छी स्त्रीका वशीभूत होकर क्रीड़ा में आसक्त रहने लगा और उस को महीने वर्ष और ऋतुबीतते नहीं मालूमहोतेथे॥११॥राजाने उसके साथ क्रीड़ा करतेहुए समय२ पर देवताओंकी समान आठपुत्र उत्पन्नकिये परन्तु जो पुत्र उत्पन्न होताथा उसको वह तुरन्त जलमें डालदेतीथी और यह कहकर उसको डुबादेतीथी कि तुमको प्रसन्न करतीहूं इस

it proper to ask questions about her previous life, but was content with her general good conduct, beauty, magnanimity and attendance on him in private. 7. The beautiful goddess Ganga, assuming the form of a woman, became the dear wife of the lion-hearted king *Shantanu* glorious like Indra. By her society, love, wisdom, elegant dancing, and heart-enchanting demeanour she captivated the heart of the king who loved her tenderly. The king did not notice the passing of months and years in the company of that beautiful woman. 11. She brought him forth eight god-like sons. But as soon as they were born she threw them, one by one, into water, saying, that she was doing this for their good. The king was much dissatisfied at this conduct of her, yet, feared to complain for the

॥ १३ ॥ तस्यतन्नप्रियंराज्ञः शान्तनोरभवत्तदा । नचतांकिञ्चनोवाच त्यागाद्भीतो महीपतिः ॥ १४ ॥ सयैनामष्टमेपुत्रे जातेप्रहसतीमिव । उवाचराजादुःखार्त्तः परीप्सन्पुत्रमात्मनः ॥ १५ ॥ मावधीःकस्यकासीति किंहिनत्सिसुतानिति । पुत्रन्निमुमहत्पापं सम्प्राप्तंतेसुगर्हितम् ॥ १६ ॥ स्त्र्युवाच । पुत्रकामनतेहन्मि पुत्रंपुत्रवतांवर । जीर्णऽस्तुममवासोयं यथासमयःकृतः ॥ १७ ॥ अहंगङ्गाजन्हुसुता महर्षिगणसेविता देवकार्य्यार्थसिद्ध्यर्थं मुषिताहंत्वयासह ॥ १८ ॥ इमेऽष्टौवसवोदेवा महाभागामहौजसः । वशिष्ठशापदोषेण मानुषत्वमुपागताः ॥ १९ ॥ तेषांजनयितानान्यस्त्वदृते भुविविद्यते । मद्विधामानुषीधात्री लोकेनास्तीहकाचन ॥ २० ॥ तस्मात्तज्जननीहेतो र्मानुषत्वमुपागता । जनयित्वावसूनष्टौ जितालोकास्त्वयाक्षयाः ॥ २१ ॥ देवानांसमय

प्रकार क्रमशः सात पुत्रों के जलमें डालदेने पर गंगाका यह निर्दई बर्ताव राजाके लिये बड़ा असंतोषदायी हुआ परन्तु इस भय से कि कहीं छोडकर चली न जाय उस से कुछ नहीं कहताथा आठवें पुत्र के जन्म होनेपर जब गंगा हँस रहीथी राजाने अतिदुःखीहोकर अपने पुत्रकी रक्षाके लिये उससे कहा कि पुत्रको न मारना तू कौन और किसकी बेटी है और क्यों पुत्रोंको मारडालती है और अनुचित और महत्पाप करतीहै ॥१६॥ स्त्रीने कहा हे पुत्र कामी तुम पुत्रवानों में श्रेष्ठ हुए तुम्हारे इस पुत्रको न मारूंगी पर मैंने जो नियम कियाथा उस के अनुसार तुम्हारे पास मेरे रहनेका समय बीतगया मैं महर्षियों से सेवित जाह्नवी गंगाहूं देवताओंके कार्य साधनेके लिये तुम्हारेपास रहीथी तुम्हारे पुत्र महातेजस्वी, महाभाग आठों वसु वसिष्ठजीके शाप से मनुष्य होकर जन्मेथे।१९। मर्त्यलोक में तुम्हारे सिवाय उनका जन्म दाता कोई नहीं था और मेरे विना कोई उनकी माताहोने योग्य भी नहीं थी इसलिये उनकी माता होने के लिये मैंने मानवी शरीर धारण किया था तुमने आठ वसुओं को जन्म देकर अक्षय लोक पाया मैंने वसुओं से यह नियम किया था कि

reason she would leave him. When Ganga was smiling at the birth of the eighth son, the king anxious for the safety of his son said, "Donot kill this son. Who art thou and whose daughter? Why do you kill the sons. Why do you commit this sin?"16. The waman said, "You have hereby become the foremost among those having sons. I shall not kill this son of yours, but shall live no longer with you as was our contract. I am Janhu's daughter Ganga. I lived with you to perform the work of the gods. Your sons were the eight Basus of great glory and fortune, born among human beings by the curse of Basisht.19. There was none in the world worthy of becoming their progenitor. I became a woman to give them birth. You have earned great merit by giving birth to the Basus. I had promised the Basus to throw them into the water

स्त्वेष वसूनांसंश्रुतोमया । जातंजातंमोक्षयिष्ये जन्मतोमानुषादिति ॥ २२ ॥ तत्ते शापाद्विनिर्मुक्ता आपवस्यमहात्मनः । स्वस्तितेऽस्तुगमिष्यामि पुत्रंपाहि महाव्रतम् ॥ २३ ॥ एषपर्यायवासोमे वसूनांसन्निधौकृतः । मतप्रसूतिंविजानीहि गङ्गादत्तमिमं सुतम् ॥ २४ ॥

इत्यादिपर्वणि सम्भवपर्वणि भीष्मोत्पत्तावष्टनवतोऽध्यायः ॥ ९८ ॥

शान्तनुरुवाच । आपवोनामकोन्वेष वसूनांकिञ्चदुष्कृतम् । यस्याभिशापात्तेसर्वे मानुषींयोनिमागताः ॥ १ ॥ अनेनचकुमारेण त्वयादत्तेनकिंकृतम् । यस्यचैवकृतेनायं मानुषेषुनिवत्स्यति ॥ २ ॥ ईशावैसर्वलोकस्य वसवस्तेचवैकथम् । मानुषेषूदपद्यन्त तन्ममाचक्ष्वजान्हवि ॥ ३ ॥ वैशम्पायन उवाच । एवमुक्तातदागङ्गा राजानमिदम ब्रवीत् । भर्त्तारंजाह्नवीदेवी शान्तनुंपुरुषर्षभ ॥ ४ ॥ गङ्गोवाच । यंलेभेवरुणःपुत्रं

जन्मलेतेही मैं उनको मानवी शरीर से मुक्त करूंगी इस लिये उनको जल में डालदिया और यह ऋषिके शाप से मुक्तहुए तुम इस महाव्रतको पालो मैंने तुम्हारेलिये वसुओं से एक पुत्र मांगाथा इससे हर एक वसुने आठवें भाग से इस पुत्रको उत्पन्न किया है तुम्हारा मंगलहो मैं जाती हूँ मेरेउत्पन्न कियेहुए इस पुत्रको गंगादत्त अर्थात् गंगा का दियाहुआ जानना ॥ २४ ॥

अध्याय ९९ ॥

शांतनुने कहा कि आपवनाम के कौनसे ऋषि हैं ? वसुओंने उनका क्या दोषकिया था कि उन सब ने ऋषिके शापसे मनुष्य शरीर धारणकिया और तुम्हारेदियेहुए इसपुत्र ने क्या दोष कियाथा जिसके फल से वह इस लोकमें रहेगा ? हे जान्हवी ! वसु सब लोकोंके ईश्वरहोकर क्यों मर्त्यलोकमें उत्पन्नहुए यह मुझसे कहो।३। वैशम्पायन जीने कहा कि देवी जान्हवी गंगाने पुरुष श्रेष्ठपति राजा शांतनुसे यह कहा कि हे भारत पूर्वकाल में

to set them free from the confinement of human body and they have by this time become free from the curse of the Rishi. Take care of this son. May you be happy. I am going away. I begged for you a son from the Basus and they have, each of them, given an eighth part of their being to produce a son. Call this son by the name of Gangadatta. 24

Chapter YCIX

Shantanu said, " Who was the Rishi and what fault of his did the Basus commit for which they were forced to be born on the earth ? Also, what sin was this son of yours guilty of, for which he will have to live here ? The Vasus are the lords of the worlds. Tell me the reason of their being born here," 3 Vaishampayan says that the goddess Ganga told that best of men, her husband,

पुराभरतसत्तम । वशिष्ठनामासमुनिः ख्यातआपवइत्युत ॥ ५ ॥ तस्याश्रमपदंपुण्यं मृगपक्षिसमन्वितम् । मेरोःपार्श्वेनगेन्द्रस्य सर्वर्त्तुकुसुमावृतम् ॥ ६ ॥ सवारुणिस्तप स्तपे तस्मिन्भरतसत्तम । वनेपुण्यकृतांश्रेष्ठः स्वादुमूलफलोदके ॥ ७ ॥ दक्षस्यदु- हितायातु सुरभीत्यभिशब्दिता । गांप्रजातातुसादेवी कश्यपाद्भरतर्षभ॥ ८ ॥ अनुग्र हार्थंजगतःसर्वकामदुहांवरा । तांलेभेगांतुधर्मात्मा होमधेनुंसवारुणिः ॥ ९ ॥ सा तास्मिंस्तापसारण्ये वसन्तीमुनिसेविते । चचारपुण्येरम्येच गौरपेतभयातदा ॥ १० ॥ अथतद्वनमाजग्मुः कदाचिद्भरतर्षभ । पृथ्वाद्यावसवःसर्वे देवादेवर्षिसेवितम् ॥ ११ ॥ तेसदारावनंतच्च व्यचरन्तसमन्ततः । रेमिरेरमणीयेषुपर्वतेषुवनेषुच ॥ १२ ॥ तत्रैक- स्याथभार्य्यातु वसोर्वासवविक्रम । सञ्चरन्तीवनेतस्मिन् गांददर्शसुमध्यमा ॥ १३ ॥ नन्दिनींनामराजेन्द्र सर्वकामधुगुत्तमाम्।सविस्मयसमाविष्टा शीलद्रविणसम्पदा॥१४॥

वरुणदेवके पुत्र वसिष्ठ मुनि आपव नाम से प्रसिद्धथे पर्वतोंमें श्रेष्ठ सुमेरु के समीप उन का पवित्र आश्रमथा जो मृग पक्षियों से गूँजताहुआ सब ऋतुओं में फलोंसे भराहुता था हे भारत श्रेष्ठ ! वही पुण्यवान वरुणपुत्र मीठेफल मूल जलयुक्त उस वन के आश्रम में तपस्या कियाकरते थे॥७॥एक समय सुरभि नामवाली देवी दक्षपुत्रीने जगत् पर कृपाकरने के लिये कश्यप से एक कन्या उत्पन्नकी धर्मात्मा वरुणपुत्र ने उस कन्याको लेकर हवन धेनु बनाया सुरभिकी कन्या गौ उन मुनियों से सेवित रमणीय उपवन में रहती हुई नि- र्भय चरने लगी॥१०॥हे भरत श्रेष्ठ ! एक समय पृथु आदि वसुगण देवर्षि से सेवित उस वनमें आकर अपनी स्त्रियोंके साथ फिरनेलगे और रमणीय पर्वत और निकुंजमें इधर उधर क्रीडा करने लगे । हे इन्द्रकी समान विक्रमवाले उन मेंसे एक वसुकी सुन्दरी स्त्रीने उस वन में फिरती हुई सुरभि की कन्या नन्दिनी को देखा । हे राजेन्द्र ! शील सम्पत से भरी

king Shantanu that the Rishi was Basisht, the son of Varun, also called Apav. His hermittage at Mount Sumeru resounded with the sounds of many a bird and quadruped. It was situated amidst flower and fruit bearing trees and the Rishi used to practice his asceticism there.7. Surbhi, the daughter of Daksh gave birth to a daughter for the good of the world. The righteous son of Barun made her his *havan dhenu* (cow to give butter etc for libations on fire). Surbhi's daughter, the cow roamed about freely in that forest.10. Once upon a time the Vasus with their wives came to the forest and rambled over the beautiful mountain and the vallies. One of Vasu's wives saw, Surbhi's daughter Nandini, roaming in the forest. She wondered at the mild looking, best of milch cows, having goodly teets of good milk, of pretty tale and voice, good

यवेवैदर्शयामास तांगांगोवृषभेक्षण । आपीनाश्चसुदोग्ध्रीञ्च सुवालविखुरां शुभाम् । उपपन्नांगुणैःसर्वैः शीलेनानुत्तमेनच ॥ १५ ॥ एवंगुणसमायुक्तां वसवेवसुनन्दिनी । दर्शयामासराजेन्द्र पुरापौरवनन्दन ॥ १६ ॥ द्यौस्तदातांतुदृष्ट्वैव गांगजेन्द्रेन्द्रविक्रम । उवाच राजंस्तांदेवीं तस्यारूपगुणान्वदन् ॥ १७ ॥ एषागौरुत्तमादेवी वारुणेरसितेक्षणा । ऋषेस्तस्यवरारोहे यस्येदंवनमुत्तमम् ॥ १८ ॥ अस्याःक्षीरं पिवेन्मर्त्तयःस्वादुयोवैसुमध्यमे । दशवर्षसहस्राणिसजीवेत् स्थिरयौवनः ॥ १९ ॥ एतच्छ्रुत्वातुसादेवी नृपोत्तमसुमध्यमा । तमुवाचानवद्याङ्गी भर्त्तारंदीप्ततेजसम् ॥ २० ॥ अस्तिमेमानुषेलोके नरदेवात्मजासखी । नाम्नाजितवतीनाम रूपयौवनशालिनी ॥ २१ ॥ उशीनरस्यराजर्षेः सत्यसन्धस्यधीमतः । दुहितापथितालोके मानुषे रूपसम्पदा ॥ २२ ॥ तस्याहेतोर्महाभाग सवत्सांगांममोप्सिताम् । आनयस्वामरश्रेष्ठ

हुई स्त्री नन्दनी ने गौ बल के समान आंखवाली सब काम धेनुओं में श्रेष्ठ बड़े थनवाली, अच्छा दूधवाली सुन्दर पूँछ और स्वरवाली शुभ लक्षण, सुशीला, और गुणवती देखकर आश्चर्य युक्त अपने पति द्यु नामवाले वसुको दिखायाहो वसुने सुरभिकी पुत्रीको देखकर अपनी प्रियदेवी से उसका रूप और गुणबतलाकर कहा हे सुन्दरी जिस ऋषिका यह उत्तम तपोवन है उसीवरुण पुत्र ऋषि के हवनकी गौ यह कालेनेत्र वाली देवी सुरभीकी पुत्री है । हे सुन्दरी जो मनुष्य इस नन्दनी का मीठा दूध पियेगा वह अटल यौवन पाकर दस सहस्र वर्ष तक जीता रहेगा । हे नृपोत्तम उस सुन्दरी स्त्री वसु पत्नीने यह सुनकर अपने तेजस्वी पतिसे कहा॥२०॥कि मर्त्यलोक में रूप यौवनवाली भूदेवकी पुत्री मेरी सहेली है वह बुद्धिमान सत्य प्रेमी राजर्षि उशीनरकी बेटी है इसलोकमें उसकारूप संपद प्रसिद्ध है हे महाभाग उसके लिये मुझे बछड़े सहित इस गौके लेनेकी अभिलाषा

natured and having all the qualities and showed her to her husband the Vasu, named Dew. He praised the beauty and the good qualities of the cow and said, "O beautiful one, "This black eyed daughter of Surbhi belongs to the Rishi who owns this hermitage in the forest. He who will drink the milk of this cow, will enjoy his youth for ten thousand years. The wife hearing this, said to her lord of great glory, "I have a playmate, a princess of great beauty, named *Jitwati*, the daughter of the righteous monarch *Usinar*. She is unrivalled there in the wealth of beauty. I wish to possess this cow with her calf to make a present of to my playmate. O best among gods, bring me the cow soon. My playmate will have perpetual youth and health by drinking her milk. O faultness fortunate one fulfil this desire of my heart." To please his love, the beautiful

त्वरितंपुण्यवर्द्धन ॥ २३ ॥ यावदस्याःपयःपीत्वा सासखीममानद । मानुषेषुभवत्ये का जरारोगविवर्ज्जिता ॥ २४ ॥ एतन्मममहाभाग कर्त्तुमर्हस्यनिन्दित । प्रियंप्रियतरं ह्यस्मान्नास्तिमेऽन्यत्कथञ्चन ॥२५॥ एतच्छ्रुत्वावचस्तस्यादेव्याः प्रियचिकीर्षया । पृथग्द्यौर्भ्रातृभिःसार्द्धं द्यौस्तदातांजहारगाम् ॥ २६ ॥ तयाकमलपत्राक्ष्यानियुक्तो द्यौस्तदानृप । ऋषेस्तस्यतपस्तीव्रं नशशाकनिरीक्षितुम् । हृतागौःसातदातेन प्रपातस्तु नतर्कितः॥२७॥अथाश्रमपदंप्राप्तः फलान्यादायवारुणिः । नचापश्यत्सगांतत्र सवत्सां काननोत्तमे॥२८॥ततःसमृगयामासवने तस्मिंस्तपोधनः । नाध्यगमच्चमृगयंस्तां गांमु-निरुदारधीः ॥ २९ ॥ ज्ञात्वातथापनीतां तांवसुभिर्दिव्यदर्शनः । ययौक्रोधवशंसद्यः शशापचवसूंस्तदा ॥ ३० ॥ यस्मान्मेवसवोजह्रुर्गां वैदोग्ध्रींसुवालधिम् । तस्मात्सर्वे जनिष्यन्ति मानुषेषुनसंशयः ॥ ३१ ॥ एवंशशापभगवान् वसूंस्तान्भरतर्षभ । वशं

है हे देवताओं में श्रेष्ठ शीघ्र उसगौ को लेआओ मेरी सहेली इस गौका दूध पीकर मर्त्यलोक में सदा युवा और रोग वर्जित रहेगी मेरा यह प्रिय कार्य आपके करने योग्य है इससे अधिक प्रिय मेरा कुछ और नहीं है॥२५॥ द्युनामवाले वसुने यह बात सुनकर अपनी प्रिय देवी का कार्य करने के लिये अपने भाइयों सहित कामधेनु को हरलिया हे राजन् ! वह उस समय अपनी कमल नेत्र वाली स्त्री के कहने में आकर उस ऋषि की कठोर तपस्या को अच्छी प्रकार न देखसका यह ध्यान बिलकुल उसके मन में न आया कि इस गौके हरनेसे वे गिराये जायँगे॥२७॥ फिर वरुण पुत्र ऋषि फल लेकर आश्रम में आये परन्तु बछड़ासहित उस गौको न देखा तब वह बुद्धिमान् तपोधन उस गौको बन में इधर उधर ढूँढने लगा देर तक ढूढने से भी उसका पता न लगा तब उसके दिव्य चक्षुसे जाना कि वसु उसको हर लेगये हैं और क्रोधयुक्त होकर उसीक्षण वसुओं को यह शाप दिया कि जिन वसुओं ने मेरी सुलक्षणा अच्छी पूँछवाली दुधारी काम धेनु हरलीहै वह निश्चय सबके सब मर्त्यलोकमें जन्म लेंगे॥३१॥ हे भरतकुल प्रदीप मुनियों में श्रेष्ठ

goddess, he took away the cow with the assistance of his brothers. He was so enchanted with the speech of his wife as not to think of the great ascetic power of the rishi. He did not, for a moment, consider of the fall they should have by stealing away the cow.27. At length the rishi came back to his hermittage with the fruit of the forest, but did not see the cow and her calf in the vicinity. The magnanimous rishi then searched for her in the wood but to no purpose. Then with the power of his *Yog* he knew that the Vasus had carried her away. The incensed rishi, thereupon, cursed the Vasus that they should be born on earth for having stolen his miltch cow of beautiful tail and good qualities.31.The rishi thus

क्रोधस्यसम्प्राप्त आपवोमुनिसत्तमः ॥ ३२ ॥ शप्त्वाच तान्महाभागस्तपसेवमनोदधे। एवंसशप्तवान्राजन् वसूनष्टौतपोधनः ॥ ३३ ॥ महाप्रभावोब्रह्मर्षिर्देवान् क्रोधसमन्वितः । अथाश्रमपदंप्राप्तास्ते वैभूयोमहात्मनः ॥३४॥ शप्ताःस्मइतिजानन्त ऋषिंतमुप चक्रमुः । प्रसादयन्तस्तमृषिंवसवः पार्थिवर्षभः॥३५॥ लेभिरेनचतस्मात्ते प्रसादमृषिसत्तमात् । आपवात्पुरुषव्याघ्र सर्वधर्मविशारदात् ॥ ३६ ॥ उवाच च सधर्मात्माशप्ता यूयंधरादयः । अनुसम्वत्सरात्सर्वे शापमोक्षमवाप्स्यथ ॥ ३७ ॥ अयन्तुयत्कृतेयूयं मयाशप्ताःसपत्स्यति । द्यौस्तदामानुषेलोके दीर्घकालंस्वकर्मणा ॥ ३८ ॥ नानृतं तच्चिकीर्षामि क्रुद्धोयुस्मान्यदब्रुवम् । नप्रजास्यतिचाप्येष मानुषेषुमहामनाः ॥ ३९ ॥ भविष्यति च धर्मात्मासर्वशास्त्रविशारदः । पितुःप्रियहितेयुक्तः स्त्रीभोगानवर्ज्जयिष्यति ॥ ४० ॥ एवमुक्त्वावसून्सर्वान् सजगाममहानृषिः । ततोमामुपजग्मुस्ते समेतावसव-

भगवान आपव वसुओं को यह शाप देकर तपस्यामें दत्त चित्त हुए हे राजन् क्रोधयुक्त महा प्रभावी ब्रह्मर्षि से आगें वसु देवता इस प्रकार शाप दिया जाना जानकर उन महात्मा के आश्रम में आकर उनकी उपासना करने लगे हे पृथ्वीनाथ वसुओं ने उस धर्मात्मा ऋषि आपवको प्रसन्नकरनेके लिये बहुत चेष्टाकी परन्तु सफल मनोरथ नहीं होसके ३५ इस के उपरान्त धर्मात्मा ऋषि ने कहा कि मैने पृथु आदि तुम सबको शाप दिया है वर्ष भर में तुम उसशापसे मुक्त होसको गे परन्तु तुमको जिसके हेतु से शाप दिया गया है वह द्यु नामवाला वसुही अपने कर्म के दोषसे दीर्घ काल तक मनुष्य लोक में वसेगा मैं ने जो क्रोध से शाप दिया है वह विरुद्धनहीं होसक्ता यह महात्मा द्यु नामक वसु मर्त्य लोक में सन्तानोत्पादन नहीं करेगा स्त्रीसे मिलना त्याग देगा और धर्मात्मा और शास्त्रों में पंडित होकर पिताके प्रियकार्य में सदा नियुक्त रहेगा ॥४०॥ महर्षि वसुओंसे यह बात कहकर चले गये और वसुओं ने मुझसे प्रार्थना पूर्वक कहा हे गंगे हमारे जन्म लेतेही

cursed them in anger and again engaged in his asceticism. The Vasus hearing of this curse went to the rishi's hermittage and prayed for forgiveness. They tried to please him in vain.35.At last the righteous man said, " I have cursed you all. You will all be released from its effect within a year but *Dew* who has been the cause of all this trouble to you, will remain there long. I can not recall what I have said in anger. *Dew* will not produce any offspring on earth. He will renounce the society of women and becoming a learned man will always obey his father. 40. The rishi went away after speaking this. Then all the Vasus requested *me* (Ganga) to throw them into water as soon as they should be born

स्तदा ॥ ४१ ॥ अयाचन्तचमांराजन् वरंतच्चमयाकृतम् । जातान्जातान्प्रक्षिपास्मान् स्वयंगंगेत्वमम्भसि ॥ ४२ ॥ एवंतेषामहंसम्यक् शप्तानांराजसत्तम । मोक्षार्थं मानुषाल्लोकाद्यथावत् कृतवत्यहम् ॥ ४३ ॥ अयं शापादृषेस्तस्य एकएवनृपोत्तम । घौराजन्मानुषलोके चिरंवत्स्यतिभारत ॥ ४४ ॥ वैशम्पायन उवाच । एतदाख्याय सादेवी तत्रैवान्तरधीयत । आदायचकुमारंतं जगामाथयथेप्सितम् ॥ ४५ ॥ सतुदेवव्रतोनाम गाङ्गेयइतिचाभवत् । द्युनामाशान्तनोःपुत्रः शान्तनोरधिकोगुणैः ॥ ४६ ॥ शान्तनुश्चापिशोकार्त्तो जगामस्वपुरंततः । तस्याहंकीर्त्तयिष्यामि शान्तनोरधिकान् गुणान् ॥ ४७ ॥ महाभाग्यञ्च नृपतेर्भारतस्य महात्मनः । यस्येतिहासोद्युतिमान् महाभारतमुच्यते ॥ ४८ ॥

इत्यादिपर्वणि सम्भवपर्वण्यापवोपाख्याने नवनवतोऽध्याय ॥ ९९ ॥

तुम हमें जल में डाल देना हे राजन् शाप से ग्रसित वसुओं को शाप से छोडाने के लिये मैंने यह कार्य किया था हे नृपोत्तम भारत उस ऋषि के शाप से यह द्यु नामक वसुही देरतक मनुष्य लोकमें रहेगा।४४।वैशम्पायनने कहा कि देवी गंगा यह कहकर लोप होगई और उस कुमार को लेकर मनमाने स्थान को गई वह द्यु नामक वसु शांतनुकी संतान होकर देवव्रत्त और गंगेयनामसे प्रसिद्ध हुआ और शांतनु सेभी अधिक गुणवान था फिरशांतनु ने शोक युक्त होकर अपने नगर में प्रवेश किया। हेमहाराज अब मैं उस महात्मा भारत शांतनु राजा के अनुपमगुण और महाभाग्य की कथा कहूँगा जिसका यह इतिहास महाभारत नाम से प्रसिद्ध हुआ है ॥ ४८ ॥

उपजह्रुर्वनान्तेषु धृतराष्ट्रेणचोदिताः ॥ ११ ॥ अथपारसवींकन्यां देवकस्यमहीपतेः । रूपयौवनसम्पन्नां सशुश्रुश्रावापगासुतः ॥ १२ ॥ ततस्तुवरयित्वा तामानीयभरतर्षभः । विवाहंकारयामास विदुरस्यमहामतेः ॥ १३ ॥ तस्यांचोत्पादयामास विदुरः कुरुनन्दनः । पुत्रान् विनयसम्पन्ना नात्मनःसदृशान्गुणैः ॥ १४ ॥

इत्यादिपर्वणि सम्भवपर्वणि विदुरपरिणये चतुर्दशाधिकशततोऽध्यायः ॥ ११४ ॥

वैशम्पायन उवाच । ततःपुत्रशतंजज्ञे गान्धार्य्यांजनमेजय । धृतराष्ट्रस्य वैश्यायामेकश्चापिसतात्परः ॥ १ ॥ पाण्डोःकुन्त्यांचमाद्र्यांच पुत्राःपंचमहारथाः । देवेभ्यः समपद्यन्त सन्तानायकुलस्यवै ॥ २ ॥ जनमेजय उवाच । कथंपुत्रशतंजज्ञे गान्धार्य्यां द्विजसत्तम । कियताचैवकालेन तेषामायुश्चकिंपरम् ॥ ३ ॥ कथंचैकःसवैश्यायां धृत-

को देवता समझ ने लगे धृतराष्ट्र की आज्ञा से मनुष्य गण सदा आलस रहित होकर वन में उनको लिये कामना और भोजन की सामग्री पहुँचानेलगे । ११ । इस गंगापुत्र भीष्म ने सुना कि महीपाल देवक के शूद्राणी के गर्भ से जन्मी हुई रूप और यौवन युक्त एक कन्या है उन्हों ने राजा देवक से वह कन्या मांगकर बुद्धिमान विदुर से उसका विवाह करदिया कुरुनंदन विदुर ने उस क्षत्रिय के वीर्य और शूद्राणी के गर्भ से जन्मी हुई कन्या से अपने समान गुण और नम्रता युक्त कई पुत्र उत्पन्न किये ॥ १४ ॥

अध्याय ॥ ११५ ॥

वैशम्पायन ने कहा कि हे जनमेजय धृतराष्ट्र के वीर्य से गांधारी के गर्भ में सौ पुत्र और वेश्याके गर्भमें एक पुत्रने जन्मलिया और पांडुके वंशकी रक्षाके लिये देवताओंने कुंती और माद्री के गर्भसे महारथी पाँचपुत्र उत्पन्नकिये जन्मेजयने पूछा कि हे द्विजश्रेष्ठ गांधारी के गर्भ से क्योंकर और कितने दिनों में सौपुत्र उत्पन्नहुये और उनकी आयु कितनीथी ।३।

The servants of Dhritrashtra, came to him incessantly with supplies of food.11. Bhishm heard that king Devak had a very beautiful daughter by a Shudra woman. He brought the girl and married her with Vidur. Vidur of the family of Kuru produced several children, like himself in virtue and humility, in the daughter of Kshatrya king born by a Shudra woman. 14.

CHAPTER CXV.

Vaishampayan said that Dhritrashtra had a hundred children by Gandhari and one by a Vaishya woman. And for the perpetuation of the line of Pandu, five sons were given to Kunti and Madri by gods. Janmejaya enquired how 100 sons were born to Gandhari and the time she took to give them birth.3. Also how Dhritrashtra had one son by the Vaishya woman and his behaviour with his

राष्ट्रसुतोऽभवत् । कथंचसदृशींभार्य्यां गान्धारींधर्मचारिणीम् । आनुकूल्येवर्त्तमानां धृतराष्ट्रोऽभ्यवर्त्तत ॥ ४ ॥ कथंचशप्तस्यसतः पाण्डोस्तेनमहात्मना । समुत्पन्नादैवतेभ्यः पुत्राःपञ्चमहारथाः ॥ ५ ॥ एतद्विद्वन्यथान्यायं विस्तरेणतपोधन । कथयस्तन मेतृप्तिः कथ्यमानेषुबन्धुषु ॥ ६ ॥ वैशम्पायन उवाच । क्षुच्छ्रमाभिपरिग्लानं द्वैपायनमुपस्थितम् । तोषयामासगान्धारी व्यासस्तस्यैवरंददौ ॥ ७ ॥ सावव्रेसदृशंभर्त्तुःपुत्राणांशतमात्मनः । ततःकालेनसागर्भं धृतराष्ट्रादथाग्रहीत् ॥ ८ ॥ सम्वत्सरद्वयंतन्तु गान्धारीगर्भमाहितम् । अप्रजाधारयामास ततस्तांदुःखमाविशत् ॥ ९ ॥ श्रुत्वाकुन्तीसुतंजातं बालार्कसमतेजसम् । उदरस्यात्मनः स्थैर्य्यमुपलभ्यान्वचिन्तयत् ॥ १० ॥ अज्ञातंधृतराष्ट्रस्य यत्नेनमहताततः । सोदरंघातयामास गान्धारीदुःखमूर्च्छिता ॥ ११ ॥ ततोजज्ञेमांसपेशी लोहाष्ठीलेवसंहता । द्विवर्षसम्भृतांकुक्षौ तामुत्सृष्टुंप्रचक्रमे ॥ १२ ॥

धृतराष्ट्रने वैश्याके गर्भ से क्योंकर एकपुत्र उत्पन्न किया धृतराष्ट्र अपनी प्यारी स्त्री गांधारी से कैसा व्यवहार किया करते थे महात्मा मृगरूपी मुनि के शापदेनेके पश्चात पांडुके पाँच महारथी पुत्र कैसे उत्पन्नहुये हे विद्वान् पंडित तपोधन यह सबकथा विस्तृतरूपसे यथारीति कहिये कुलका चरित्र सुनकर मैं तृप्तनहीं हुआ हूँ ।६। वैशम्पायन ने कहा कि एक समय भगवान् द्वैपायन भूखे और थके हुए गांधारी के पासआये और गांधारी ने उनको संतुष्ट किया उससे व्यासने गांधारी की प्रार्थना के अनुसार यह वर दिया कि उसके पति के समान वीर्यवान सौ पुत्र पैदाहोंगे गांधारी योग्य कालमें धृतराष्ट्रसे गर्भवतीहुई ।८। परन्तु दोवर्ष तक सन्तान नहीं हुई इससे वोह बडी दुःखी होनेलगी फिर यह सुनकर कि कुंती के सूर्य के समान पुत्रहुए हैं अपने गर्भको स्थिर देख चिन्ता युक्तहो अति मनः पीडा से धृतराष्ट्र के नजानते यत्नपूर्वक अपने पेटका आघात किया उससे वोह दोवर्ष का गर्भ

dear wife Gandhari. Also how five brave sons were born to Pandu when he himself was cursed by the Rishi in the guise of the deer. He asked Vaishampayan to inform him with all these things as he was very curious to know all about his forefathers.6. Vaishampayan said that the Rishi Vyas, tired and hungry once came to Gandhari and was gratified by the welcome she gave him. He gave her a boon of a hundred sons, powerful like her husband. At the proper time Gandhari became pregnant.8. But no child came, forth for two years. She was therefore very anxious. Having heard of the birth of Kunti's son, beautiful like the sun, she was much disturbed at the delay and without the knowledge of Dhritrashtra, she managed to miscarry. A piece of flesh like an iron ball came out of her womb. The Rishi Vyas knew this and at once came there and saw the mass of flesh. He then addressed

अथद्वैपायनोज्ञात्वा त्वरितःसमुपागमत् । तांसमांसमयींपेशीं ददर्शजयतांवरः ॥१३॥ ततोऽब्रवीत् सौबलेयीं किमिदंते चिकीर्षितम् । साचात्मनोमतंसत्यं शशंसपरमर्षये ॥ ॥ १४ ॥ गान्धार्युवाच । ज्येष्ठंकुन्तीसुतंजातं श्रुत्वारविसमप्रभम् । दुःखेनपरमेणेदमु दरंघातितंमया ॥ १५ ॥ शतंचकिलपुत्राणां वितीर्णमेत्वयापुरा । इयंचमेमांसपेशी जातापुत्रशतायवै ॥ १६ ॥ व्यास उवाच । एतमेतत्सौबलेयि नैतज्जात्वन्यथाभवेत् वितथंनोक्तपूर्वंमे स्वैरेष्वपिकुतोऽन्यथा ॥ १७ ॥ घृतपूर्णकुण्डशतं क्षिप्रमेवविधीयता म् । सुगुप्तेषुचदेशेषु रक्षाचैवविधीयताम् । शीताभिरद्भिरष्ठीलामिमांचपरिषिंचय ।१८ वैशम्पायन उवाच । सासिच्यमानात्वष्ठीला बभूवशतधातदा । अंगुष्ठपर्वमात्राणांगर्भा णां पृथगेवतु ॥ १९ ॥ एकाधिकशतंपूर्णं यथायोगंविशाम्पते । मांसपेश्यास्तदाराजन् क्रमशःकालपर्य्ययात् ॥ २० ॥ ततस्तांस्तेषुकुण्डेषुगर्भानवदधेतदा । स्वनुगुप्तेषुदेशेषु

कटी हुई लोहे के गेंदकी समान मांसके टुकडे के रूपमें भूमिपर गिरा गांधारी के उसे त्याग तेही जापकों में श्रेष्ठ द्वैपायन यह बात जानकर तुरन्त वहाँ पहुँचे और उस मांस के टुकडे को देखा गांधारी ने महर्षि से सब सच२ कहदिया कि कुंती के सूर्य के समान प्रकाशमान पुत्रका उत्पन्न होना सुनकर अति दुःखसे मैंने पेटमे चोटमारीहै आपने पहले मुझको वरदिया था कि सौ पुत्र उत्पन्न होंगे अब सौ पुत्रों के बदले यह मांसकी पोटली पैदा हुई है ।१६। व्यासजीने कहा हे सुबल पुत्रीजो मैंने कहाथा वही होगा उस के अतिरिक्त न होगा हँसी मैंभी मैनें कभी झूंठ नहीं बोला है फिर यह बात कैसे झूंठी हो सक्ती है अब घृत से सौ घडे भर कर यत्न से एकान्त मे रक्खो और ठंड जलसे इस मांस को धोओ ।१८। वैशम्पायनने कहा कि हे नरेश धोते२ वोह मांस बहुत भागोमें बटगया और उसकी संख्या सौ हुई हर एक टुकड़ा अँगुठे की पोरेकी बराबर था फिर वोह सब टुकडे घृत भरे घड़ो में डाल कर अच्छी तरह गुप्त स्थान में रखवाये गये भगवान व्यास से तब सुबलकन्या से कहा कि दो वर्ष पीछे यह सब घडे खोलना बुद्धि

Gandhari saying, " What have you done." Gandhari told the Rishi all that had passed in her mind at hearing the news of the birth of Kunti's son. She then said, " You had given me the boon that I shall bring forth a hunderd sons. But this mass of flesh has come out insted.16. Vyas replied, " My word shall never prove untrue. I never tell a lie even in jest. Now prepare 100 jars of ghee and put them in a secluded place. Wash this mass of flesh with cold water."18.When undergoing the process of washing it was divided in many small pieces until one hundred parts of it, as small as a thumb joint were detached. They were carefully preserved in the jars. Vyas then directed Ghandhari to open them after two years and went away to practice asceticism on the Hima-

रक्षांचव्यदधात्ततः ॥ २१ ॥ शशंसचैवभगवान् कालेनैतावतापुनः । उद्घाटनीयान्येतानि कुण्डानीतिच सौबलीम् ॥२२॥ इत्युक्त्वाभगवान् व्यासस्तथामति विधायच । जगामतपसेवीमान् हिमवन्तंशिलोच्चयम् ॥२३॥ जज्ञेक्रमेणचैतेन तेषांदुर्य्योधनोनृपः जन्मतस्तुप्रमाणेन ज्येष्ठोराजायुधिष्ठिरः ॥ २४ ॥ तदाख्यातन्तुभीष्माय विदुरायच धीमते । यस्मिन्नहनिदुर्द्धर्षो जज्ञेदुर्य्योधनस्तदा । तस्मिन्नेवमहाबाहुर्जज्ञेभीमोऽपि वीर्य्यवान् ॥ २५ ॥ सजातमात्रएवाथ धृतराष्ट्रसुतोनृप । रासभारावसदृशं रुरावच ननादच ॥ २६ ॥ तत्खराःप्रत्यभाषन्त गृध्रगोमायुवायसाः । वाताश्चप्रववुश्चापि दिद्दाहश्चाभवत्तदा ॥२७ ॥ ततस्तुभीतवद्राजा धृतराष्ट्रोऽब्रवीदिदम् । समानीयबहून् विप्रान् भीष्मंविदुरमेवच ॥ २८ ॥ अन्यांश्चसुहृदोराजन् कुरून्सर्वांस्तथैवच । युधिष्ठिरोराजपुत्रो ज्येष्ठोनःकुलवर्द्धनः । प्राप्तःस्वगुणतोराज्यं नतस्मिन्वाच्यमस्तिनः ॥ २९ ॥

मान भगवान द्वैपायन ! यह कहकर वोह सब गर्भ स्थापनकर फिर तप के लिये हिमाचल को चलेगये अनन्तर योग्य काल में उन टुकड़ो से पहले राजा दुर्योधन का जन्म हुआ परन्तु राजा युधिष्ठिर पहले जन्मलेने से श्रेष्ठथे।२४।यह बात बुद्धिमान बिदुर और धृतराष्ट्रने सुनी जिसदिन दुर्योधनका जन्म हुआ उसीदिन महाभुज भीमनेभी जन्म लियाथा। दुर्योधन जन्म लेतेही गधे के समान रेहकने और चिल्लाने लगा उसे सुनकर गृद्ध, गधे, सियार और कौवे कोलाहल मचानेलगे हवावेगसे चलनेलगी और दिशायें जलनेलगीं।२७।हे महाराज राजा धृतराष्ट्रसे भयखाकर भीष्म,विदुर,ब्राह्मण,मित्र और कौरवोंको बुलाकरबोले कि हमारे वंश बढाने वाले राजपुत्र युधिष्ठिर बड़े हैं वोह अपने ही गुण से राज्य को पासक्ते हैं इस विषय में मुझे कुछ कहना नहीं है।२९। परन्तु मेरेइस पुत्रने युधिष्ठिरसे पहले जन्म लिया है क्या इस से यह राजकुमार राजा होसकेगा इस विषय में जो निश्चयहो वह आप ठीक २ कहिये इस बात के कहने पर सियार और मांस खानेवाले कुटिलजंतु अमंगलकारी शब्द करने लगे हे महाराज चारों ओर यह शब्द अमंगल चिह्न

layas Duryodhan was the first to come out of his jar but Yudhishthir was born before and was older than him.24. Dhritrashtra and Vidur knew this. Duryodhan and Bhim were born on the same day. Duryodhan, as soon as he came on earth, began to bray like an ass. On hearing the cry vultures, asses, jackals and crows began to make a noise. The wind blew with force and the directions began to burn.27.King Dhrishtra, being afraid at this, called Bhishm, Vidur, the Brahmans, the friends, and the Kauravas together and said, "The glory of our family, prince Yudhishthir, is the eldest and will get the throne by virtue of his age. I have nothing more to say on this subject.29.This

अयंत्वनन्तरस्तस्मादपि राजाभविष्यति । एतद्विद्धितमेतथ्यं यदत्रभविताध्रुवम् ॥ ३० ॥ वाक्यस्यैतस्यनिधने दिक्षुसर्वासुभारत । क्रव्यादाःप्राणदन्घोराः शिवाश्चाशिवशंसिनः ॥ ३१ ॥ लक्षयित्वानिमित्तानितानि घोराणिसर्वशः । तेऽब्रुवन् ब्राह्मणा राजन् विदुरश्चमहामतिः ॥ ३२ ॥ यथेमानिनिमित्तानि घोराणिमनुजाधिप । उत्थितानिसुतेज्येष्ठे तानितेपुरुषर्षभ ॥ ३३ ॥ व्यक्तंकुलान्तकरणो भवितैषसुतस्तव । तस्यशान्तिःपरित्यागे गुप्तावपनयोमहान् ॥ ३४ ॥ शतमेकोनमप्यस्तु पुत्राणांतेमहीपते । त्यजैनमेकं शान्तिंचेत् कुलस्येच्छसिभारत । एकेनकुरुवैक्षेमं कुलस्यजगतस्तथा ॥ ३५ ॥ त्यजेदेकंकुलस्यार्थे ग्रामस्यार्थेकुलंत्यजेत् । ग्रामंजनपदस्यार्थे आत्मार्थेपृथिवींत्यजेत् ॥ ३६ सतथाविदुरेणोक्तस्तैश्च सर्वैर्द्विजोत्तमैः । नचकारतथाराजा पुत्रस्नेहसमन्वितः ॥ ३७ ॥ ततःपुत्रशतंपूर्णं धृतराष्ट्रस्यपार्थिव । मासमात्रेणसंजज्ञे कन्याचैकाशताधिका ॥ ३८ ॥

देखकर ब्राह्मणों और महामति विदुरने धृतराष्ट्र से कहा कि ।३१। हेपुरुष श्रेष्ठ महाराज आपके श्रेष्ठ पुत्र के जन्म लेतेही यह सब भयानक मंगल चिन्ह दीख पड़ते हैं इससे यह विदित होताहै कि आपका यह पुत्र कुलकी हानि करने वाला होगा इसको त्याग देनेसे ही कुलकी शांति होसक्ती है नहीं तो बड़ी हानि होगी हे महीपाल भारत यदि आप अपने कुलकी शांति चाहते हैं तो यही अच्छा होगा कि आप इस एक पुत्रको त्याग दीजिये तब आप के निन्नानवे पुत्र वचैंगे आप एकको त्याग कर इस वंश और जगत् का हित कीजिये ।३५। हे महाराज कहाहै कि कुलरक्षाके लिये एकको त्यागना, ग्रामकी भलाई के लिये कुल को त्यागना, देश की भलाई के लिये ग्राम को त्यागना, और अपनी भलाई के लिये संसार को त्यागना उचित है उन सब द्विजों और विदुर की वात राजा धृतराष्ट्र ने पुत्र के स्नेह से न मानी । ३७ । हे पृथ्वी नाथ

son of mine is born after Yudhishthir. Now I ask you all if he can become king." At this the jackals and other flesh eating animals raised a cry.31. Seeing these ominous signs the Brahmans with the wise Vidur, said to Dhritrashtra, "On seeing such bad omens at the birth of your eldest son, it is clear that he will be the destroyer of his family. The family can be saved by discarding him. If you care for the safety of your family you had better discard one son. You will still have ninety nine sons left. Discard one son for the good of the family and the country.35. It is said that it is better to discard one for the sake of a family, to discard a family for the sake of a village, a village for the country and all things for self." For the love of his son Dhritrashtra did not mind the advice of Vidur and the Brahmans.37. Within a month Dhrishtra had 100 sons and one daughter. When Gandhari was distressed in

गान्धार्य्या क्लिश्यमानायामुदरेण विवर्द्धता । धृतराष्ट्रंमहाराजं वैश्यापर्य्यचरत् किल ॥ ३९ ॥ तस्मिन्सम्वत्सरेराजन् धृतराष्ट्रान्महायशाः । जज्ञेधीमांस्ततस्तस्यां युयुत्सुःकरणोनृप ॥ ४० ॥ एवंपुत्रशतंजज्ञे धृतराष्ट्रस्यधीमतः । महारथानां वीराणां कन्याचैकाशताधिका । युयुत्सुश्चमहातेजा वैश्यापुत्रःप्रतापवान् ॥ ४१ ॥

इत्यादिपर्वणि सम्भवपर्वणि गान्धारीपुत्रोत्पत्तौ
पञ्चदशाधिकशतोऽध्यायः ॥ ११५ ॥

अनन्तर महीने भरमें धृतराष्ट्र के सौ पुत्र और एक कन्या ने जन्म लिया गांधारी जब बढ़ते हुए गर्भकी पीड़ा से कातरथी उसी वर्ष उस वैश्याके गर्भ से धृतराष्ट्र के अतियश युक्त बुद्धिमान युयुत्सु नामक एक पुत्र ने लिया वैश्या के क्षत्रिय के वीर्य्य से जन्म लेने के हेतु वोह पुत्र करनां कहाजाताहै इसप्रकार बुद्धिमान धृतराष्ट्रसे महारथी वीर सौपुत्र और एक कन्या और महातेजस्वी युयुत्सु ने जन्म लिया था ॥ ४१ ॥

her mind by the continuation of her pregnancy another son, the glorious Yuyutsu was born to Dhrishtra by a Vaishya woman. He was called Karan by his being born of a Vaishya mother and Kshatrya father. Thus Dhritrashtra had hundred brave sons and one daughter besides the glorious Yuyutsu. 41.

जनमेजय उवाच ॥ धृतराष्ट्रस्यपुत्राणा मादितःकथितंत्वया । ऋषेःप्रसादात्तु शतं नचकन्याप्रकीर्त्तिता ॥ १ ॥ वैश्यापुत्रोयुयुत्सुश्च कन्याचैकाशताधिका । गांधार राजदुहिता शतपुत्रेतिचानघ ॥ २ ॥ उक्तामहर्षिणा तेन व्यासेनामित तेजसा । कथं त्विदानींभगवन् कन्यांत्वंतुब्रवीषिमे ॥ ३ ॥ यदिभागशतं पेशी कृतातेनमहर्षिणा । नप्रजास्यातिचेद्भूयः सौबलेयीकथञ्चन ॥ ४॥ कथन्तुसम्भवस्तस्या दुःशलायावदस्व मे । यथावदिहविप्रर्षे परंमेऽत्रकुतूहलम् ॥ ५ ॥ वैशम्पायन उवाच । साध्वयंप्रश्नउद्दिष्टः पाण्डवेयब्रवीमिते । तांमांसपेशींभगवान् स्वयमेवमहातपाः ॥ ६ ॥ शीताभिरद्भिरासिच्य भागंभागमकल्पयत् । योयथाकल्पितो भागस्तं तंधात्र्यातथानृप । घृतपूर्णेषु

अध्याय ॥ ११६ ॥

जन्मेजय ने कहा कि हे अनघ ऋषि की कृपा से धृतराष्ट्रके सौ पुत्रों काजन्म लेना आपने कहा परन्तु ऋषि की प्रसन्नता से कन्या के उत्पन्न होने की कोई कथा आपने नहीं कही आप धृतराष्ट्रके सौ पुत्रों से अधिक एक वैश्या के गर्भ से जन्म लियेहुए पुत्र युयुत्सु और गांधारी के गर्भ से जन्म ली हुई एक कन्या के जन्म की कथा कह चुके परन्तु अति तेजस्वी महर्षिव्यास ने कहा था कि गांधारी के सौपुत्र उत्पन्न होंगे अब आपने क्यों कर गांधारीके गर्भ से सौ पुत्र और एक कन्याकी बात कही।३। यदि महर्षिने उस मांसको सौटुकडों में बांटा और सबल पुत्री फिर गर्भवती नहीं हुई तो क्योंकर दुःशला की उत्पत्ति हुई हे विप्र वर इस विषय को सुनने के लिये मेरी बडी इच्छा है आप यथावत् कहें।५। वैशम्पायन ने कहा कि हे पांडव आपने अच्छा प्रश्न किया है मैं आपको इसका उत्तर देता हूं भगवान व्यास ने स्वयं ठंडे जल से उन मांस के टुकड़ोंको धुलवा कर अलग २ करने की कल्पना की। हे महाराज ! वोह ज्यों २ बांटनेलगे वैसेही धात्री

CAAPTER CXVI

Janmejaya said, " You described the birth of the hundred sons of Dhritrashtra by the grace of the Rishi but of no daughter. You now say that besides the hundred sons one Yuyutsu was born of a Vaishya woman and a girl by Gandhari. The great glorious Rishi Vyas had said that a hundred sons would be born of Gandhari, but now you speak of a hundred sons and one daughter.3. If the Rishi divided the flesh into hundred parts and the daughter of Subal did not conceive again, then, how *Dushala* could be born of her ? I have a great desire to know this. Please tell me of it in detail."5. Vaishampayan replied, " You have put a good question, O Pandav. I shall explain it to you. "Vyas was himself dividing it into parts which were beings put, one by one, into the jars containing butter.

कुण्डेषु एकैकंप्राक्षिपत्तदा ॥ ७ ॥ एतस्मिन्नन्तरेसाध्वी गान्धारीसुदृढव्रता । दुहितुः स्नेहसंयोगमनुध्याय वराङ्गना ॥ ८ ॥ मनसाचिंतयद्देवी एतत्पुत्रशतंमम । भविष्यतिनसन्देहो नव्रवीत्यन्यथामुनिः ॥ ९ ॥ ममेयंपरमातुष्टिर्दुहिता मेभवेद्यदि । एकाशताधिकावाला भविष्यतिकनीयसी ॥ १० ॥ ततोदौहित्रजाल्लोकादवाप्योऽसौपतिर्मम अधिकाकिलनारीणां प्रीतिर्ज्जामातृजा भवेत् ॥ ११ ॥ यदिनाम ममापिस्याद्दुहितैका शताधिका । कृतकृत्याभवेयंवै पुत्रदौहित्रसंवृता ॥ १२ ॥ यदिसत्यंतपस्तप्तं दत्तंवाप्यथवाहुतम् । गुरवस्तोषितावापि तथास्तुदुहितामम ॥ १३ ॥ एतस्मिन्नेवकालेतु कृष्णद्वैपायनःस्वयम् । व्यभजत्सतदापेशीं भगवानृषिसत्तमः । गणयित्वाशतं पूर्णमंशानामाह सौवलीम् ॥ १४ ॥ व्यास उवाच । पूर्णपुत्रशतंत्वेतन्न मिथ्यावागुदाहृता ॥

उन्हें घृत के घड़ों में छोडने लगी उस समय कठोर व्रत करने वाली सती सुन्दरी गांधारी देवी कन्या स्नेहकी आलोचना कर मन से यह सोचने लगी कि इस में सन्देह नहीं इन मांस के टुकडों से सौ पुत्र पैदाहों गे क्यों कि मुनिकी बात कभी झूंठी नहीं होती परन्तु यदि सौपुत्रोंसे अधिक एक छोटी कन्याभी होतो मेरे हृदयको बड़ा संतोष मिले।१०। और इस में मेरे पति द्रौहित्र से मिलने वाले पुण्य लोक कोभी पावें विशेष कर नारी मात्रको दामाद से बडी प्रीति होती है यदि सौ पुत्रों से अधिक मेरी एक पुत्रीभी होवे तो मैं पुत्र और नातियों से घेरी जाकर कृतार्थ होऊं यदि मैंने सच्ची रीति से तप, दान या हवन कियाहो अथवा गुरुओंको प्रसन्न कियाहो तो मुझे एक कन्याभी मिले।१३। उस समय ऋषिश्रेष्ठ भगवान द्वैपायन स्वयं उन मांस के टुकड़ों को बांटरहेथे वह पूर्ण सौभाग्य गिनकर गांधारी से बोले कि लो तुम्हारे सौ बेटेहुए मैंने तुमसे झूंठ नहीं कहा

by the midwife. At this occasion Gandhari felt a desire to have a daughter. She said within herself, "There is no doubt that hundred sons will be born out of these pieces for, the Muni never tells a lie. How good it would be if I had a daughter besides them.10. My husband would not then be deprived of the place in heaven which is obtainable to those who have daughter's children. Besides, women in general have a great love for a son-in-law. So if I could get one daughter over and above the hundred sons I would be perfectfully happy, being surrounded by sons and daughter's children, If I have ever been charitable, practised asceticism, performed sacrifices or attended upon the elders then may I get a daughter.13. The good Rishi, Dwaipayan, as he was himself dividing the pieces of flesh, after having counted hundred parts, adressed Gandhari saying. "You have got now hundred sons. I did not

दौहित्रयोगायभाग एकःशिष्टःशतात्परः ॥ १५ ॥ एषातेसुभगाकन्या भविष्यतियथेप्सिता । ततोऽन्यंघृतकुम्भञ्च समानाय्यमहातपाः ॥ १६ ॥ तंचापिप्राक्षिपत्तत्र कन्या भागंतपोधनः ॥ १७ ॥ एतत्तेकथितंराजन् दुःशलाजन्मभारत । ब्रूहिराजेन्द्रकिम्भूयो वर्त्तयिष्यामितेऽनघ ॥ १८ ॥

इत्यादिपर्वणि सम्भवपर्वणि दुःशलोत्पत्तौ षोडशाधिकशततोऽध्यायः ॥ ११६ ॥

जनमेजय उवाच । ज्येष्ठानुज्येष्ठतांतेषां नामानिचपृथक्पृथक् । धृतराष्ट्रस्यपुत्राणामानुपूर्व्याप्रकीर्त्तयेः ॥ १ ॥ वैशम्पायन उवाच । दुर्य्योधनोयुयुत्सुश्च राजन्दुःशासनस्तथा । दुःसहोदुःशलश्चैव जलसन्धःसमःसह ॥ २ ॥ विन्दानुविंदौदुर्द्धर्षः सुबाहुर्दुष्प्रधर्षणः । दुर्मर्षणोदुर्मुखश्च दुष्कर्णःकर्णएवच ॥ ३ ॥ विविंशतिर्विकर्णश्च शलः

था दैव संयोग से सौभागोंसे अधिक एक भाग बचरहा है तुम्हारी इच्छानुसार इस भाग से एक सुन्दरी कन्या होगी अनन्तर महातपोधन ने दूसरे एक घृत के घड़े को मँगाकर उस में कन्या के भाग को छोड दिया हे अनघ भारत वंश श्रेष्ठ दुःशलाकी जन्म कथा आप से कह चुका । हे राजेन्द्र कहिये अब क्या कहना होगा ॥ १८ ॥

अध्याय ॥ ११७ ॥

जनमेजयनेकहा कि धृतराष्ट्रके बडे छोटेके क्रमसे सब लड़कों के अलग२नाम आद्योपान्त कहिये वैशम्पायन ने कहा कि हे महाराज दुर्योधन, युयुत्सु, दुःशासन दुःसह, दुःशल, जलसंध, सम, सह, विंद, अनुविंद, दुर्धर्ष, सुबाहु, दुष्प्रदर्षण, दुर्मर्षण, दुर्मुख, दुष्कर्ण,

---

tell a lie. You have also, over and above, one piece left. According to your wish a beautiful daughter will be born to you. The rishi then ordered for another jar of butter to be brought and therein put the piece of flesh.17. I have now told you the story of Dushala's birth. Let me know what more am I to say to you.18.

CHAPTER CXVII

Janmejaya requested Vaishampayan to tell him the names of the sons of Dhritrashtra in the order of their birth. Vaishampayan recounted their names as follows:—Duryodhan, Yuyutsu, Dashsan Dussah, Dushal, Jalsandh, Sam, Sah, Bind, Anubind, Durdharsh Subahu, Dushpradharshan, Durmsarahn, Durmukh, Dushkarn, Karn, 3.

सत्त्वः सुलोचनः । चित्रोपचित्रौ चित्राक्षश्चारुचित्रः शरासनः ॥ ४ ॥ दुर्मदोदुर्विगाहश्च विवित्सुर्विकटाननः । ऊर्णनाभःसुनाभश्च तथानन्दोपनन्दकौ ॥ ५ ॥ चित्रबाणश्चित्रवर्मा सुवर्मादुर्विमोचनः । अयोबाहुर्महाबाहुश्चित्राङ्गश्चित्रकुण्डलः ॥ ६ ॥ भीमवेगोभीमबलो बलाकीबलवर्द्धनः । उग्रायुधःसुषेणश्च कुंडधार महोदरः ॥ ७ ॥ चित्रायुधोनिषंगीच पाशीबृन्दारकस्तथा । दृढवर्मादृढक्षत्रः सोमकीर्त्तिरनूदरः ॥ ८ ॥ दृढसन्धोजरासन्धः सत्यसन्धःसदःसुवाक् । उग्रश्रवाउग्रसेनः सेनानीर्दुष्पराजयः ॥ ॥ ९ ॥ अपराजितःकुण्डशायी विशालाक्षोदुराधरः । दृढहस्तःसुहस्तश्च वातवेगसुवर्चसौ ॥ १० ॥ आदित्यकेतुर्बह्वाशी नागदत्तोग्रयाय्यपि । कवचीक्रथनःकुण्डी कुण्डधारोधनुर्द्धरः ॥ ११ ॥ उग्रभीमरथौवीरौ वीरबाहुरलोलुपः । अभयोरौद्रकर्माच तथा दृढरथाश्रयः ॥ १२ ॥ अनाधृष्यःकुण्डभेदी विरावीचित्रकुण्डलः । प्रमथश्चप्रमाथीच दीर्घरोमश्चवीर्य्यवान् ॥ १३ ॥ दीर्घबाहुर्महाबाहुर्व्यूढोरः कनकध्वजः । कुण्डाशीवि-

कर्ण, ।३। विविंशति,विकर्ण,शल,सत्व,सुलोचन,चित्र,उपचित्र, चित्राक्ष,चारुचित्र,शरासन, दुर्मद,दुर्विगाह,विवित्सु,विकटानन,ऊर्णनाभ,सुनाभ, नन्द, उपनंद, चित्रबाण, चित्रवर्मा सुवर्मा,दुर्विमोचन,अयोबाहु,महाबाहु,चित्रांग, चित्रकुंडल ।६। भीमवेग, भीमबल, बलाकी बलवर्धन,उग्रायुध,सुषेण,कुंडधार,महोदर,चित्रायुध,निषंगी,पाशी, बृन्दारक, दृढवर्मा, दृढ़क्षेत्र,सोमकीर्ति,अनूदर,।८।दृढ़संध,जरासंध,सत्यसंध,सद सुवाक,उग्रश्रवा,उग्रसेन,सेनानि दुष्पराजय, । ९ । अपराजित,कुंडशाई,विशालाक्ष, दुराधर, दृढहस्त,सुहस्त,बातवेग,सुवर्चा, आदित्यकेतु, बह्वाशी, नागदत्त, अग्रययी, कवची, क्रथन, कुंडी, कुंडधार, धनुर्द्धर, उप, भीमरथ वीर,वीरबाहु,अलोलुप,अभय,रौद्रकर्मा,दृढरथ, ।१२। अनाद्दश्य,कुंडभेदी,विरावी, चित्रकुंडल, प्रमथ, प्रमाथी, दीर्घरोम, वीर्यवान, दीर्घबाहु, महाबाहु, व्यूढोर, कनकध्वज,

Bibinshati, Bikarn, Shal, Satwa, Sulochan, Chtira, Upchitra Chitraksh,Charuchitra,Sharasan,Durmad,Durbigah,Vivitsu,Vikatanan, Urnnabh, Sunabh, Nand, Upnand, Chitravan, Chitravarma, Suvarma, Durvimochan, Ayobahn, Mahabahu, Chitrang, Chitrakundal,6. Bhimveg, Bhimbal, Balaki, Balbardhan, Ugrayudh, Sushen, Kundadhar Mahodar, Chitrayudh, Nishangi, Pashi, Brindarak, Drirhvarma, Drirhkshetra, SomKirti, Anudar,8. Drirhsandh, Jarasandh, Satyasandh, Sadasuvak, Ugrashrava, Ugrasen, Senani, Dushparajaya.9. Aparajit, Kundshayi, Bishalaksh, Duradhar, Drirhahast, Sahasta, Vatveg, Suvarcha, Adityaketu, Bahuashi, Nagdatt, Agrayayi, Kabachi, Krathan, Kundi, Kundadhar, Dhanurdhar, Ugra, Bhimrath,Vir,Virvahu, Alolup, Abhaya, Roudrakarma, Drirharath, (12) Anadhrishya, Kundbhedi, Biravi, Chitrakundal, Pramath, Pramathi, Viryavan, Dirghrom

रजाश्चैव दुःशलाचशताधिका ॥ १४ ॥ इतिपुत्रशतंराजन् कन्याचैव शताधिका । नामधेयानुपूर्व्येण विद्धिजन्मक्रमंनृप ॥ १५ ॥ सर्वेत्वतिरथाःशूराः सर्वेयुद्धविशारदाः। सर्वेवेदविदश्चैव सर्वेसर्वास्त्रकोविदः ॥ १६ ॥ सर्वेषामनुरूपाश्च कृतादारामहीपते । धृतराष्ट्रेणसमये परीक्ष्यविधिवन्नृप ॥ १७ ॥ दुःशलांचापिसमये धृतराष्ट्रोनगाधिपः। जयद्रथायप्रददौ विधिनाभरतर्षभ ॥ १८ ॥

इत्यादिपर्वणि सम्भवपर्वणि धृतराष्ट्रपुत्रनाम कथने
सप्तदशाधिकशतोऽध्यायः ॥ ११७ ॥

जयमेजय उवाच । कथितो धार्त्तराष्ट्राणामार्षः सम्भवउत्तमः । अमनुष्योमनुष्याणां भवताब्रह्मवादिना ॥ १ ॥ नामधेयानिचाप्येषां कथ्यमानानिभागशः। त्वत्तः श्रुतानिमेब्रह्मन् पाण्डवानांचकीर्त्तय ॥ २ ॥ तेहिसर्वे महात्मानो देवराजपराक्रमाः ।

कुंडाशी, विरजा, यह सौ पुत्र और कन्या दुःशला है हे महाराज धृतराष्ट्र के सौपुत्रों के और कन्या दुःशलाका नाम कहचुका ।१५। हे महाराज इन नामोंके क्रम के अनुसार इन के जन्म का क्रमभी जानना वे सब महारथी शूर युद्ध में दक्ष वेद में पंडित, और अस्त्र चलाने में निपुणथे । हे महीपाल धृतराष्ट्र ने परीक्षाद्वारा योग्य कन्यायों का निश्चय कर उचित समय में यथा रीति उन सबों का विवाह करदिया हे भरत कुल प्रदीप अनन्तर महाराजा धृतराष्ट्र ने योग्य काल में जयद्रथ को दुःशला नाम्नी कन्या सम्प्रदान करदी ॥ १८ ॥

अध्याय ॥ ११८ ॥

जन्मेजय ने कहा कि हे ब्रह्मवादी आप मनुष्य धृतराष्ट्र के पुत्रों के श्रेष्ठ अलौकिक आर्ष जन्म की कथा और उनके अलग२ नाम भी कह चुके हे ब्राह्मण वोह आपसे सुन लिया अब पांडवों के चरित्रकी कथा कहिये ।२। आपने अंशावतरणमें कहाहै कि पांडवगण

Dirghvahu, Mahabahu, Vyudhor, Kanakdhwaj, Kundashi, Viraja and a daughter, named Dushala. 15. The above names are given in the order of their birth. They were all warriors of renown, learned in the Vedas and well-skilled in the use of arms. Dhritrashtra selected worthy girls to be married to them. He gave his daughter Dushala to king jayadrath. 18.

CHAPTER CXVIII.

Janmejaya said, "You have told me the story of the extraordinary birth of the sons of Dhritrashtra and their names. Now tell me of the deeds of the Pandavas. 2. You have already said they were all glorious like Indra and were born of the portions of gods.

त्वयेवांशावतरणे देवभागाःप्रकीर्त्तिताः ॥ ३ ॥ एतदिच्छाम्यहं श्रोतुमतिमानुषकर्मणाम् । तेषामाजननं सर्वं वैशम्पायनकीर्त्तय ॥ ४ ॥ वैशम्पायन उवाच । राजापाण्डुर्महारण्ये मृगव्यालनिषेविते । चरन्मैथुनधर्मस्थं ददर्शमृगयूथपम् ॥ ५ ॥ ततस्तांच मृगींतंच रुक्मपुंखैःसुपात्रिभिः । निर्विभेदशरैस्तीक्ष्णैः पाण्डुःपंचभिराशुगैः ॥ ६ ॥ सचराजन्महातेजा ऋषिपुत्रस्तपोधनः । भार्य्ययासहतेजस्वी मृगरूपेणसङ्गत ७॥ ॥ संसक्तश्चतयामृग्या मानुषीमीरयन्गिरम् । क्षणेनपतितोभूमौ विललापाकुलेन्द्रियः ॥ ८ ॥ मृग उवाच । कामयन्युपरीताहि बुद्ध्याविरहिताअपि । वर्ज्जयन्तिनृशंसानि पापेष्वपिरतानराः ॥ ९ ॥ नविधिंग्रसतेप्रज्ञा प्रज्ञान्तुग्रसतोविधिः । विधिपर्य्यागतानर्थान् प्राज्ञोनप्रतिपद्यते॥१०॥शश्वद्धर्मात्मनांमुख्ये कुलेजातस्यभारत । काललोभाभिभूतस्य कथंतेचलितामतिः ॥ ११ ॥ पाण्डुरुवाच ॥ शत्रूणांयावधेवृत्तिः सामृगाणांवधेस्मृ

सबमहात्मा और इन्द्र के समान पराक्रमी थे और देवताओं के अंशों से उत्पन्न हुये थे मैं उन अलौकिक कर्म करने वाले पांडवों की जन्म से लेकर आद्योपान्त सम्पूर्ण कथा सुना चाहता हूं हे वैशम्पायन आप उसे कहिये ।४। वैशम्पायनने कहा हे महाराज राजा पांडुने मृगों से भरे एक बडे वन में घूमते हुए मैथुन करते हुए एक दल पति मृग को देखा और सोने की पूंछवाले शोभित सुन्दर पर वाले नोकदार और तेज चलने वाले पाँच वाणों से उस मृग और मृगीको मारा ।६। हेमहाराज कोई बडे तेजस्वी तपोधन ऋषि कुमार मृगका स्वरूप लेकर स्त्रीके साथ उस प्रकार मिले थे वोह उस मृगी से लिपटे हुए ही वाण लगने से क्षण भरमें धरती पर गिरकर मनुष्यों की वोली में विकल चित्त से पांडु से वोले ।८। कि काम क्रोध युक्त बुद्धि हीन जन भी ऐसा निष्ठुर कार्य नहीं करता परन्तु मानवी बुद्धि देवका पारनहीं पासक्ती देवही मानवीबुद्धि से बढकर होता है सो देव विषय को बुद्धिमान जनभी नहीं समझ सक्ते हे भारत तुम सदासे धर्मयुक्त प्रधान वंश में जन्म लेकर क्यों काम के लोभ में आये और क्योंकर तुम्हारा चित्त ऐसा डग

I wish to hear all about them."4. Vaishampayan said that king Pandu roaming in a forest full of deer saw a master stag coupling with its mate He shot the pair with five gold tailed, beautiful feathered and sharp pointed arrows.6. Now a certain Rishi's son had assumed the form of a deer to meet with his wife. He fell down at once by the wound and with a distressed heart spoke to Pandu like human beings saying 8. " No person will do such a cruel deed even under the influence of anger or lust however senseless he may be. But a man's wisdom cannot penetrate God's works which is above human understanding. You have always been just and are born of a noble family. How did you become so

ता । राज्ञांमृगनमांमोहात्त्वंगर्हयितुमर्हसि ॥ १२ ॥ अच्छद्मनामायया च मृगाणांवध इष्यते । सएवधर्मोराज्ञान्तु तद्धित्वं किंनुगर्हसे ॥ १३ ॥ अगस्त्यःसत्रमासीनश्चका रमृगयामृषिः । आरण्यान्सर्वदैवत्यान् मृगानप्रोक्ष्यमहावने ॥ १४ ॥ प्रमाणदृष्टध र्मेण कथमस्मान् विगर्हसे । अगस्त्यस्याभिचारेण युष्माकञ्चवपाहुता ॥ १५ ॥ मृगउवाच ॥ नरिपून्वैसमुद्दिश्य विमुञ्चंतिनराःशरान् । रन्ध्रएषांविशेषेण वध कालःप्रशस्यते ॥ १६ ॥ पाण्डु रुवाच ॥ प्रमत्तमप्रमत्तंवा विबृतंघ्नन्तिचौजसा । उपायैर्विविधैस्तीक्ष्णैः कस्मान्मृग विगर्हसे ॥ १७ ॥ मृगउवाच ॥ नाहंघ्नन्तंमृगान राजन् विगर्हेचात्मकारणात् । मैथुनन्तुप्रतीक्ष्यंमे त्वयेहाद्यानृशंस्यतः ॥ १८ ॥ सर्व

मगाया पांडुने कहा कि हे मृग राजा लोग शत्रुके नाश करने में जैसा किया करते हैं मृगके मारने मैंभी वैसा करते हैं इससे तुम्हें मोहसे मुझको ऐसा लाँछन नहीं करना चाहिये छिपकर और कौशल से मृग वध करना राजाओं का धर्म है तुम क्यों फिर इस विषय में निंदाकररहेहो।१३।ऋषि अगस्त्यने यज्ञकर सम्पूर्ण बनमें सब देवोंके उद्देश्य में सम्पूर्ण मृगों को मथनकर मृगयाकीथी उन्हों ने अभिचार कर्म के लिये तुम्हारी बसा से हवनाकियाथा प्रमाणिक धर्मके अनुसार तुम मुझ से मारे गये हो फिर क्यों मेरी निंदा करते हो मृग ने कहा कि मनुष्य लोग शत्रुको भली भांति न देखकर बांण नहीं चलाते विशेषकर जिससमय शत्रु से दोषहोता है वही समय शत्रु के वध करने का सुंदर अवसर कहाहै।१६। पांडुने कहा कि हे मृग चाहे मृग प्रमत्तहों वा अप्रमत्तहों लोग नाना कठोर उपायों से खुलाखुली उन को मारते हैं इस लिये तुम क्यों निंदा करते हो मृग ने कहा कि हे महाराज तुम ने मृग मारागहै इस लिये मैं अपने लिये तुम्हारी निंदा नहीं करता परन्तु तुमको इससमय निष्ठुर व्यवहार न करके मेरे मैथुनकाल तक ठहरारहना

blind by avarice?" Pandu replied, " Kings behave in the chase of the deer in the same way as they do when destroying an enemy. You should not therefore taunt me in this way. It is the duty of a king to kill the deer artfully from a hiding place. Why do you raise such objections ?13. Rishi Agastya when performing his sacrifice to please the gods killed all the deer in the forest and made libations in the fire by their blood. You are killed by me according to the prevailing practice. Why do you decry my deed?" The deer replied, " People donot kill an enemy without examining him well. The best time for killing an enemy is that when he is doing evil."16. Pandu said, " Whether the deer be mad or otherwise, people kill them in various ways. Why do you think so badly of my work?" The deer replied, " You have killed a deer, O king. I donot, therefore, say anything against it on my own

भूतहितेकाले सर्वभूतेप्सितेतथा । कोहिविद्वान्मृगंहन्याश्चरन्तंमैथुनंवने ॥ १९ ॥ अस्यांमृग्याञ्चराजेन्द्र हर्षान्मैथुनमाचरन् । पुरुषार्थफलंकर्त्तुं तत्त्वयाविफलीकृतम् ॥ ॥ २० ॥ पौरवाणांमहाराज तेषामक्लिष्टकर्मणाम् । वंशेजातस्यकौरव्य नानुरूपमिदं तव ॥ २१ ॥ नृशंसंकर्मसुमहत् सर्वलोकविगर्हितम् । अस्वर्ग्यमयशस्यं चाप्यधर्मिष्ठंच भारत ॥ २२ ॥ स्त्रीभोगानांविशेषज्ञः शास्त्रधर्मार्थतत्त्ववित् । नार्हस्त्वंसुरसंकाश कर्त्तुमस्वर्ग्यं मीदृशम् ॥ २३ ॥ त्वयानृशंसकर्त्तारः पापाचाराश्च मानवाः । निग्राह्याः पार्थिवश्रेष्ठ त्रिवर्गपरिवर्जिताः ॥ २४ ॥ किंकृतंतेनरश्रेष्ठ मामिहानागसंघ्नता । मुनिंमूलफलाहारं मृगवेशधरंनृप ॥ २५ ॥ वसमानमरण्येषु नित्यंशमपरायणम् । त्वयाहंहिंसितो यस्मात्तस्मात्वामप्यहंशये ॥ २६ ॥ द्वयोर्नृशंसकर्त्तारमवशं काममोहि

चाहिये था सब लोगोंके प्रिय और सब के हितयुक्त ऐसे समय में क्या कोई विद्वान जनभी वन में मैथुन करते हुए मृगको मारसक्ता है हे राजेन्द्र मैं आनंदसे इस मृगी से संतान पैदाकरने के लिये लिपटाहुआ था तुम ने वोह व्यर्थ कर दिया महाराज तुमने शुद्ध कर्म करने वाले कुरु वंशियों में जन्म लियाहै सो यह कार्य तुम्हारे योग्य नहीं हुआहै।२१। हे भारत यह वडा निष्ठुर कर्म स्वर्गनाशी यश नासी, धर्म नाशी, और सब लोकों के लिये अनुचित हुआहै हे देवोपम तुनने शास्त्र जाननेवाले धर्मार्थ तत्वों के जाननेवाले और स्त्री से मिलने के सुखको अनुभव करनेवाले होकरभी जोयह स्वर्गनाशी कार्य कियाहै वह तुम्हारे योग्य नहींथा हे नरेशोंमेंश्रेष्ठ जो लोभ निष्ठुर कार्य करनेवाले पापाचारी और धर्मार्थ काम से रहित होते हैं तुम्हीं उनको दण्डदेतेहो।२४।हे महाप्राज्ञ मैं मृग के स्वरूप में फल मूल पर जीनेवाला मुनिहूं मुझको विना अपराध मारकर तुमको क्या लाभहुआ मैं शमशीलहोकर नित्य वनमें रहता हूं तिसपरभी तुमने विना दोष मारा इस लिये तुमको शाप देताहूं कि

account. The thing is, you have been cruel. You should have waited a little. Will any one kill a deer in such state which is dear and beneficial to all the living beings. You have rendered useless, O king, all my labour for producing an offspring. You are born, O king, in the family of virtuous Kauravas. You have not done this deed worthy of yourself;21. This cruel deed of yours will destroy your glory and your hope for heaven. Being a learned man you ought to know what a pleasure there is in a woman's embrace. This act of yours was not worthy of you. You punish those, O king, who are sinners and do cruel deeds.24. I am a Muni living on fruits and roots in the disguise of a deer. What profit did you earn in killing me without fault. I lived peacefully in the forest and you have killed me without any fault. I therefore curse you that as you have done a cruel act to man and wife you will die in a like

तम् । जीवितान्तकरोभाव एवमेवागमिष्यति ॥ २७ ॥ अहंहिकिन्दमोनाम तपसा भावितोमुनिः व्यपत्रपन्मनुष्याणां मृग्यां मैथुनमाचरम् ॥ २८ ॥ मृगोभूत्वामृगैःसार्द्धं चरामिगहनेवने । नतुतेब्रह्महत्येयं भविष्यत्यविजानतः ॥ २९ ॥ मृगरूपधरंहत्वा मामेवंकाममोहितम् । अस्यतुत्वंफलंमूढ प्राप्स्यसीदृशमेवहि ॥ ३० ॥ प्रियया सहसंवासं प्राप्यकामविमोहितः । त्वमप्यस्यामवस्थायां प्रेतलोकंगमिष्यसि ॥ ३१ ॥ अन्तकालेहिसंवासं ययागन्तासिकांतया । प्रेतराजपुरंप्राप्तं सर्वभूतदुरत्ययम् । भक्त्यामति मतांश्रेष्ठ सैवत्वानुगमिष्यति ॥ ३२ ॥ वर्त्तमानःसुखेदुःखं यथाहंप्रापितस्त्वया । तथात्वांचसुखंप्राप्तं दुःखमभ्यागमिष्यति ॥ ३३ ॥ वैशम्पायन उवाच । एवमुक्त्वासु दुःखार्त्तो जीवितात्सव्यमुच्यत । मृगःपाण्डुश्चदुःखार्त्तः क्षणेनसमपद्यत ॥ ३४ ॥

इत्यादिपर्वणि सम्भवपर्वणि पाण्डुमृगशापेऽष्टादशाधिकशततोऽध्यायः ॥ ११८ ॥

तुमने जिस प्रकार स्त्री पुरुष से कठिन व्यवहार कियाहै ऐसेही तुमभी जब काम युक्त होकर विवशहोगे जीवनाशी दशा प्राप्तकरोगे।२७।मैं किन्दमनाम तपस्वी मुनि हूं मनुष्योंकी लज्जा से बचने के लिये मृगीसे मिलरहाथा तुम्हारे यह न जानने से कि मैं मृगका स्वरूप लेकर घने वनमें चराकरता हूँ मुझको मारडालने के कारण तुमको ब्रह्महत्या का पापनहोगा अरे मूर्ख जैसा तूने मृगके स्वरूपमें मुझको इसप्रकार मारडाला ऐसाही फल तुझको भीहोगा ।३०। तू कामसे मोहित होकर प्यारी से मिलते ही इसी दशामें प्रेतलोक को सिधारेगा हे बुद्धिमान तुम अन्तकाल में जिस स्त्री से मिलोगे वोहभी सब लोगों के लंघन न करने योग्य प्रेत लोक में भक्ति पूर्वक तुम्हारे साथ जायगी मुझको जिस प्रकार सुखपाने के समय तुमसे दुःख मिला वैसेही तुमभी दुःख पाओ गे वैशंपायनने कहा कि मृगने यहबात कहकर अतिदुःखसे प्राणछोडा राजा पांडुभी क्षणभर में दुःख के समुद्रमें डूबे ॥ ३४ ॥

---

state.27. I am an ascetic named Kindam. I had assumed the form of a deer to hide myself from the shame of being seen by men. You did not know me in this guise and therefore you shall not be chargeable with the sin of killing a Brahman. But you will be punished for this deed all the same.30. You will die the moment you will embrace your dear one. The woman too will go with you to the other world. As you have given me trouble at the time when I was happy, so you will meet your death in a state of bliss." Vaishampayan says that the deer died of the wounds after saying this, leaving Pandu in a great distress.34.

वैशम्पायन उवाच । तंव्यतीतमतिक्रम्य राजास्वमिववान्धवम् । सभार्य्यः शोकदुःखार्त्तःपर्य्यदेवयदातुरः ॥ १ ॥ पाण्डुरुवाच । सतामपिकुलेजातैः कर्मणावत दुर्गतिम् । प्राप्नुवन्त्यकृतात्मानः कामजालविमोहिताः ॥ २ ॥ शश्वद्धर्मात्मनाजातो बालएव पितामम । जीवितान्तमनुप्राप्तः कामात्मैवेति नःश्रुतम् ॥ ३ ॥ तस्यकामात्मनक्षेत्रेराज्ञः संयतवाग्ऋषिः। कृष्णद्वैपायनः साक्षाद्भगवान्मामजीजनत् ॥ ४ ॥ तस्याव्यसनेबुद्धिः सञ्जातेयंममाधमा । त्यक्तस्यदेवैरनयान् मृगयांपरिधावतः ॥ ५ ॥ मोक्षमेवव्यवस्यामिबन्धोहि व्यसनंमहत् । स्वर्वृत्तिमनुवर्त्तिष्ये तामहंपितुरव्ययाम् ॥ ६ ॥ अतीवतपसात्मानं योजयिष्याम्य संशयम् । तस्मादेकोऽहमेकाकी एकैकस्मिन् वनस्पतौ । चरन्भैक्ष्यं मुनिर्मुण्डश्चरिष्याम्याश्रमानिमान् ॥ ७ ॥ पांशुना समवच्छन्नः

अध्याय ॥ ११९ ॥

वैशम्पायन ने कहा कि राजा पांडु अपने मित्रसमान उस ऋषि को छोड़ कर स्त्रियों सहित शोक और दुख से पीडित विकल होकर विलाप करने लगा उसने कहा हाय बुरी आत्मा वाले जन अच्छे वंशमें उत्पन्न होकर भी कामके फंदे में फँसकर अपने कर्मके दोष से कुगति प्राप्त करते हैं मैंने सुनाहै कि मेरे पिता विचित्र वीर्य धर्मात्मा शांतनु से उत्पन्न होकर कामवशहोने से ही बाले पनमें परलोकको सिधारेथे।३। उस कामयुक्त राजाके क्षेत्र में साक्षात् भगवान ऋषि सत्यवादी कृष्ण द्वैपायन ने मुझे जन्म दिया ऐसे मनुष्य का पुत्र होने पर भी मैं बुरी नीति से केवल वनही में घूमरहाहूँ आज मेरी बुरी बुद्धि व्यसन में लिप्त हुई सो देवों ने मुझे त्यागदिया क्योंकि पुत्रके विना देखे मैं स्वर्ग नहींपासक्ता।६। अब मैं मोक्षमार्ग का पथ लूंगा पुत्रोत्पादनादि सांसारिक बंधन अति दुःखका कारण हैं सो मैं ब्रह्मचारी बनकर अपने जन्मदाता व्यास जीके से कर्म करूंगा निःसंदेह मैं अपने चित्तको कठोर तपमें नियुक्त करूंगा और भार्या आदि त्यागकर अकेला शिर मुँडा-

CHAPTER CXIX.

Vaishampayan said, that king Pandu leaving the Rishi like a dead friend, making his wives also the partners of his distress, fell into an agony of grief. He said, " Alas ! a bad natured man, even if born in a good family, brings ruin upon himself by his evil deeds. I hear that my father Vichitravirya, the son of the virtuous Shantanu, died in the prime of life by his over-indulgence in luxuries.3. The virtuous and truthful Rishi Dwaipayan gave me birth. Being the son of such an illustrious father I have been thus wasting my time in the wilderness. My evil genius has led me into this trouble. The gods, too, have abandoned me, for, without an offspring my way to paradise will be obstructed.6.I shall now tread on the way to salvation. The worldly ties have been the cause of

शून्यागारकृतालयः। वृक्षमूलनिकेतोवा त्यक्तसर्वप्रियाप्रियः ॥ ८ ॥ नशोचन्नप्रहृष्यं श्चतुल्यनिन्दात्मसंस्तुतिः। निराशीर्निर्नमस्कारो निर्द्वन्द्वोनिष्परिग्रहः ॥ ९ ॥ नचाप्य वहसन्कांश्चिन्न कुर्वन्भ्रकुटीकचित्। प्रसन्नवदनोनित्यं सर्वभूतहितेरतः ॥ १० ॥ जङ्गमाजङ्गमंसर्वं मविहिंसंश्चतुर्विधम् स्वासुप्रजास्विव सदासमःप्राणभृतःप्रति ॥ ११ ॥ एकंकालञ्चरन्भैक्ष्यं कुलानिदशपञ्चवा। असम्भवेवाभैक्ष्यस्य चरन्नशनान्यपि। अल्पमल्पञ्चभुञ्जानः पूर्वालाभे नजातुचित् ॥ १२ ॥ अन्यानविचरन् लोभाद्लाभे सप्तपूरयन्। अलाभेयदिवालाभे समदर्शीमहातपाः ॥ १३ ॥ वास्यैकंतक्षतोवाहुं चन्दनेनैकमुक्षतः। नाकल्याणंनकल्याणं चिन्तयन्नुभयोस्तयोः ॥ १४ ॥ न जिजी-

कर मुनि हो आश्रमोंमें रहकर किसी वृक्ष से भीख मांगकर जीवन बचाऊंगा सब प्रिय और अप्रिय को छोड़कर देहमें धूल लगाकर खाली घर में वा पेडकी छायामें बसूंगा हर्ष और शोक को त्याग दूंगा और अपनी निंदा और प्रशंसा को समान समझूंगा अशीस व प्रणामकी इच्छा न करूंगा और बिना बखेड़ा किसी से कुछ दान न लेकर दिन बिताऊंगा किसी पर न तो हँसूंगा न भौं चढाऊंगा सदा प्रसन्नमुख होकर सब भूतों के हित में लगा रहूंगा।१०। अंडज, स्वेदज, जरायुज, उद्भिज्य चारप्रकार के स्थावर जंगम प्राणियों पर हिंसा प्रकट नहीं करूंगा अपनी प्रजाकी समान सब भूतों पर तुल्य दृष्टि रक्खूंगा नित्य पांच वा दश घरों में एकहीबार भीख मांगूगा उन से भीख न मिले तो विना भोजनही दिन बिताऊंगा स्वल्प भोजन किया करूंगा यदि एकबार में न मिले तो फिर कभी भीख न मांगूंगा सात वा दश घरमें मांगने पर यदि भीख न मिले तो लोभ से दूसरे घर में नहीं जाऊंगा चाहै लाभहो या नहीं मैं सबको समान समझूंगा और कठोर तपकरूंगा।१३। बसूलीसे यदि मेरा कोई एक हाथकाटे और दूसरा चंदनसे मेरेहाथ

trouble to me. I shall become a Brahmachari to follow the example of my progenitor Vyas. I shall leave wives and all and shall shave my head to live in a hermitage. I shall live on fruits entirely. Keeping myself aloof from all worldly love and hatred, I shall besmear my body with dust and shall live in an empty cottage or under the shadow of a tree. I shall neither feel pleasure nor pain. I shall not be pleased by praise nor be displeased by the contrary. I shall not wish for respect. I shall not accept gifts from the people. I shall neither laugh at any one nor frown. I shall always do good to other beings with a good face.10.I shalldo no harm to the four kinds of creation, viz, those born of eggs, sweat and jarayu (membrne) and the vegetables. I shall have an equal regard for all beings. I shall beg daily at five or ten doors and shall pass the day without food if I donot get anything from them. I shall

विषुवत् किञ्चिन्नमुमूर्षुवदाचरन् । जीवितंमरणञ्चैव नाभिनन्दन्नचाद्विषन् ॥ १५ ॥ याःकाश्चिज्जीवताशक्याः कर्त्तुमभ्युदयक्रियाः । ताःसर्वाःसमतिक्रम्य निमेषादिव्यवस्थिताः ॥ १६ ॥ तासुचाप्यनवस्थासु त्यक्तसर्वेन्द्रियक्रियः । सम्परित्यक्तधर्मार्थः सुनिर्णिक्तात्मकल्मषः ॥ १७ ॥ निर्मुक्तःसर्वपापेभ्यो व्यतीतःसर्ववागुराः । नवशेकस्याचित्तिष्ठन् सधर्मामातरिश्वनः ॥ १८ ॥ एतयासततंवृत्त्याचरन्नेवं प्रकारया । देहंसंस्थापयिष्यामि निर्भयंमार्गमास्थितः ॥ १९ ॥ नाहंसुकृपणेमार्गे स्ववीर्य्यक्षयशोचिते । स्वधर्मात् सततोपेतश्चरेयं वीर्य्यवर्ज्जितः ॥ २० ॥ सत्कृतोऽसत्कृतोवापि योऽन्यंकृपणचक्षुषा । उपैतिवृत्तिंकामात्मा सशुनांवर्त्ततेपथि ॥ २१ ॥ वैशम्पायन उवाच । एवमुक्त्वासदुःखार्त्तो निश्वासपरमोनृपः । अवेक्ष्यमाणःकुन्तीञ्च माद्रीञ्च

को सुगंधियुक्त करै तो दोनोंमेसे किसी को न तो हित और न अहितकी इच्छा करूंगा जीवन और मृत्यु से सुखी और दुःखी न हूंगा चेतनयुक्त जन निमेष आदि काल के नियम से जो सर्व फलदाई मंगलयुक्त कार्य कर सक्ते हैं मैं सम्पूर्ण रूपमे चित्तके पाप को धोकर उन सब क्रियाओं को कर धर्मार्थ त्याग और अनित्य फल देनेवाली सब इन्द्रियों की क्रियाओं को त्यागदूंगा और अविद्या आदि सबप्रकारके जालको छोड़कर सब पापोंसे बचकर वायुका गुण धारणकरूंगा किसी के वश नहीं हूंगा।१८। सदा ऐसी रीति से चलकर निर्भयपथको आश्रयकरके देह छोड़ूंगा वीर्य वर्जित होकर आत्मतत्वरूपी धर्म से सदा अलग रहकर अपने वीर्यनाशी कुमार्ग पर कभी पांव न रक्खूंगा काम रहित होने परभी जो कोई कामयुक्त होकर दीन के समान फिर काम में फँसताहै वोह चाहै सुकार्य करै वा कुकार्य अवश्यही कुत्ते कासा कार्य करताहै अर्थात् जूंठा चाटने वाला है ।२१। वैशम्पायन ने कहा कि अनन्तर राजा अतिदुःखी होकर यह सबबातैं कहकर लम्बीसांस

---

not eat much and if I donot receive anything at all shall never beg again. I shall not go abegging at other doors if I donot get from the seven or ten houses. I shall pay equal regard to all either any benefit accrues to me from them or not. I shall observe severe penances.13. If one cut one hand of mine with an axe and another perfume the other with sandal, I shall neither take the one for my enemy,nor, the other for my friend. Whether I live or die, I shall express neither pleasur nor pain. I shall do with a pure mind all the good acts leading to heaven, done by living beings. I shall tear the net of ignorance, and being free from sins I shall take the properties of the air—will not be subject to any one.18. Always living in this way I shall die fearlessly. I shall never place my foot in the wrong way which is detrimental to mental faculties. He who having no desire falls in the net of desires acts like a dog

समभाषत ॥ २२ ॥ कौशल्याविदुरःक्षत्ता राजाचसहबन्धुभिः । आर्य्यासत्यवती भीष्मस्तेच राजपुरोहिताः ॥ २३ ॥ ब्राह्मणाश्चमहात्मानः सोमपाःशंसितव्रताः । पौर वृद्धाश्चयेतत्र निवसन्त्यस्मदाश्रयाः । प्रसाद्यसर्वेवक्तव्याः पाण्डुःप्रव्रजितोवनम् ॥२४ निशम्यवचनं भर्तुर्वनवासेधृतात्मनः । तत् समंवचनंकुन्ती माद्रीचसमभाषताम् । २५ अन्येपिह्याश्रमाःसन्ति येशक्याभरतर्षभ । आवाभ्यांधर्मपत्नीभ्यां सहतप्तुंतपोमहत् ॥ ॥ २६ ॥ शरीरस्यापिमोक्षाय स्वर्ग्यंप्राप्यमहाफलम् । त्वमेवभविताभर्त्ता स्वर्गस्यापि नसंशयः ॥ २७ ॥ प्रणिधायेन्द्रियग्रामं भर्तृलोक परायणे । त्य क्त्वाकाममुखेद्य वां त यावोविपुलंतपः ॥ २८ ॥ यदिचावांमहाप्राज्ञ त्यक्ष्य सित्वंविशाम्पते । अद्यै वांप्रहास्यावो जीवितंनात्रसंशयः ॥ २९ ॥ पाण्डुरुवाच ॥ यदिव्यवसितं ह्येतद्यवयोर्धर्मसंहितम् । स्वबृत्तिमनुवर्त्तिष्ये तामहंपितुरव्ययाम् ॥ ३० ॥

ले कुंती और माद्रीकी ओर देखकर बोला कि कौशल्या, विदुर बन्धु सहित राजा धृतराष्ट्र आर्या सत्यवती, भीष्म, राजपुरोहित, व्रतशील, सोमपीनेवाले महात्मा ब्राह्मणलोग और जितने नगरके वृद्धजन मेरेआश्रयहैं उन सबको प्रसन्न करके कहना कि पांडु संन्यासी होकर बनको गया।२४। कुंती और माद्री बनबासका संकल्प ठानेहुए पतिकावचन सुनकर यथायोग्य वाक्य बोली हे भारत श्रेष्ठ और बहुत आश्रम हैं जिनको आश्रयकर आप दोनों धर्म पत्नियों के साथ कठोर तपस्या करसकेंगे और इस में संदेह नहीं कि देह छोड़ने के लिये महाफलको पाकर स्वर्ग प्राप्त करेंगे हम दोनों भी पति के साथ सब इन्द्रियोंको रोककर कामना और सुखको त्यागकर कड़ी तपस्या करेंगी।२८। हे महाप्राज्ञ पृथ्वीनाथ आप हमको छोड़देंगेतो निःसंदेह हम आजही प्राण छोड़ेंगी पांडुने कहा कि यदि तुम्हारा यह निश्चय धर्मानुसार होतो मैं अपने पिताकी अव्यय वृत्तिको आश्रय कर

whether he be doing good or evil.21.Vaishampayan said that the king, with a heavy heart and heaving long sighs was revolving upon such topics when turning towards Kunti and Madri he said, " Kaushalya, Vidur, King Dhritrashtra with other relations the virtuous Satyavati, Bhishm, royal priests, good Brahmans and the old citizens having regard for me must be informed by you that I have become a Sanyasi to roam, in the wood."24.Kunti and Madri, resolved on living in the forest, having heard this from the king, said, " There are many other ways in which you can practice severe penances along with both your wives, and be sure to gain heaven. Both of us, having checked our senses and desires and leaving worldly enjoyments, shall practice asceticism in your company 28.We shall certainly die, O king, to day, if you will leave us." Pandu said, " If your purpose be really true, I shall still

त्यक्त्वाग्राम्यसुखाहारं तप्यमानोमहत्तपः । वल्कलीफलमूलाशी चरिष्यामिमहावने । ॥ ३१ ॥ अग्नौजुह्वन्नुभौ कालावुभौ कालावुपस्पृशन् । कृशः परिमिताहारश्चीरचर्मजटाधरः ॥ ३२ ॥ शीतवातातपसहः क्षुत्पिपासानवेक्षकः । तपसादुश्चरेणेदं शरीरमुपशोषयन् ॥ ३३ ॥ एकान्तशीलोविमृषन् पक्वापक्वनवर्त्तयन् । पितॄन्देवांश्चवन्येन वाद्भिरद्भिश्च तर्पयन् ॥ ३४ ॥ वानप्रस्थजनस्यापि दर्शनंकुलवासिनाम् । नाप्रियाण्याचरिष्यामि किम्पुनर्ग्रामवासिनाम् ॥ ३५ ॥ एवमारण्यशास्त्राणा मुग्रमुग्रतरंविधिम् । कांक्षमाणोऽहमास्थास्ये देहस्यास्य समाप्तनात् ॥ ३६ ॥ वैशम्पायन उवाच । इत्येवमुक्त्वाभार्य्येते राजाकौरवनन्दनः । ततश्चडामणिंनिष्कमङ्गदे कुण्डलानिच ॥ ३७ ॥ वासांसिचमहार्हाणि स्त्रीणामाभरणानिच । प्रदायसर्वविप्रेभ्यः पाण्डुःपुनरभाषत ॥ ३८ ॥ गत्वा

लूंगा ग्राम के भोजन और सुख छोड़ कर वल्कल पहिन कर फल और मूल खाता हुआ भारी तप करके घने वनमें घूमूंगा चीर, चर्म, और जटा धारण कर नियमित भोजन कर भूख प्यास पर ध्यान न रखकर सर्दी गर्मी सहकर अंगको दुवला वना कर दोनों समय नहाकर अग्निहोत्र करता हुआ कठोर तपस्यासे इस शरीर को सुखादूंगा । ३३ । अकेला रहकर कच्चा पक्का कंदमूल आदि खाकर वाण प्रस्थके योग्य शास्त्रकी चर्चा करता हुआ वन के फल जल और वाणी से पितर और देवोंका तर्पण करूंगा ग्राम वासियोंकी वाततो दूररही एकही जगह रहते हुए वाण प्रस्थोंकाभी अप्रिय कार्य न करूंगा जबतक यह देह न छूटेगी तब तक योंही सब नियमों को कठोर विधियों से पालन करताहुआ जीवितरहूंगा ।३६। वैशम्पायननेकहा कि कौरव नंदन राजा पांडुदोनो स्त्रियों से यह बात कहकर मणि, कुंडल, मूल्यवान वस्त्र और स्त्रियोंके आभूषण आदि सब वस्तु ब्राह्मणों को देकर साथियों से बोलेकि तुम हास्तिनपुर में जाकर कहना कि कुरुनंदन पांडु अर्थ, काम

follow the practice of my father. Leaving the food and luxuries of the villages I shall wear the barks of trees and shall practice severe penances eating fruits and roots of the forests. Having equipped myself with a piece of cloth, leather and long hair I shall eat the food prescribed. I shall not care for hunger and thirst; bearing heat and cold, I shall make my body lean. Twice a day I shall bathe and offer libations to fire. I shall wither my body by severe penances.33.Living alone, eating ripe and uncooked fruits and meditating upon the books proper to the life of a Banaprasth, I shall please the gods and *pitris* by offerings of the fruits of the forest, water and words. I shall do nothing displeasing even to the neighbouring ascetics, nothing to say of the villagers. As long as I live, I shall follow the hard rules of the people living in forests."36. Vaishampayan said that king Pandu of the Kaurav family having

नागपुरंवाच्यं पाण्डुःप्रव्रजितोवनम् । अर्थकामंसुखंचैव रतिंचपरमात्मिकाम् ॥ ३९ ॥ प्रतस्थेसर्वमुत्सृज्य सभार्य्यःकुरुनन्दनः । ततस्तस्यानुयातारस्ते चैवपरिचारकाः ॥ ॥ ४० ॥ श्रुत्वाभरतसिंहस्य विविधाःकरुणागिरः । भीममार्तस्वरंकृत्वा हाहेतिपरिचुक्रुशुः ॥४१ ॥ उष्णमश्रुविमुंचन्तस्तं विहायमहीपतिम् । ययुर्नागपुरंतूर्णं सर्वमादायतद्वनम् ॥ ४२ ॥ तेगत्वानगरंराज्ञो यथावृत्तंमहात्मनः । कथयांचक्रिरेगत्वास्तद्वनं विविधंददुः ॥ ४३ ॥ श्रुत्वातेभ्यस्ततःसर्वं यथावृत्तंमहावने । धृतराष्ट्रोनरश्रेष्ठः पाण्डुमेवान्वशोचत ॥ ४४ ॥ नशय्यासनभोगेषु रतिंविन्दतिकर्हिचित् । भ्रातृशोकसमाविष्टस्तमेवार्थं विचिन्तयन् ॥ ४५ ॥ राजपुत्रस्तुकौरव्य पाण्डुर्मूलफलाशनः । जगाम सहपत्नीभ्यां ततोनागशतंगिरिम् ॥ ४६ ॥ सचैत्ररथमासाद्य कालकूटमतीत्यच । हिमवन्तमतिक्रम्य प्रययौगन्धमादनम् ॥ ४७ ॥ रक्ष्यमाणोमहाभूतैः सिद्धैश्चपरमर्षि

सुख, और परम प्रियस्त्रियोंके मिलने के सुख सबको त्यागकर प्रव्रज्या आश्रय लेकर स्त्रियों के संग बनको गया है अन्तर उन के साथी नौकर उस भरत वंशके सिंहरूपी नरेशकी करुणा युक्त बातें सुनकर अति दुःखितहो कोलाहल से हाहाकार करते हुए रोने लगे ॥ ४१ ॥ और राजाको छोड़ कर शोक से आंसू गिराते हुए विना विलम्ब हास्तिनपुर में जा पहुँचे धृतराष्ट्र उनके मुखसेबन की सब घटनाओं को सुनकर पांडके लिये बडाशोक करने लगे वोह भाई के शोकसे विकल होकर उन्हीं बातों को शोच२ सेज आसन और भोग आदि किसीसे सुखनहीं पाते हैं हे कौरववंशी ।४५। इधर राजकुमार पांडुफल मूलखाते हुए दोनों स्त्रियों के साथ नागशत पर्वत को गये और उस चैत्र रथपर चढकर कालकूट वर्वत को पीछे छोडकर हिमाचलके रास्ते गंधमादन में जा पहुँचे हेमहाराज वोह महाभूत सिद्ध और परम ऋषियोंसे रक्षित होकर सम भूमि औररूखे स्थानों में

said this to the two wives divested of all the jewellery and precious clothing of himself and women and gave all to the Brahmans. He then said to his companions, " You may go to Hasthinpur and there report that Pandu, the pride of the Kuru dynasty, leaving all the worldly enjoyments has become a *Sanyasi* and the women have followed him to the woods. His followers and servants hearing such heart-rending words of the lion-hearted prince of the Bharat dynasty, raised a great cry of grief41.and shedding tears of sorrow returned to Hastinpur with the message. King Dhritrashtra was very sorry for Pandu when he heard this. He reflected upon the words of his brother and could not feel any pleasure in the worldly affairs.45 On the other hand prince Pandu, eating fruits and roots, followed by the two women, reached mount *Nagshat*. Ascending *Chaitrarath* and leaving behind mount *Kalkut*, he reached Gandamadan through the Himalayas. The

भिः । उवाससमहाराज समेषुविषमेषुच ॥ ४८ ॥ इन्द्रद्युम्नसरःप्राप्य हंसकूटमतीत्य-च । शतशृङ्गेमहाराज तापसःसमतप्यत ॥ ४९ ॥

इत्यादिपर्वणि सम्भवपर्वणि पाण्डुचरिते ऊनविंशत्य-
धिकशततोऽध्यायः ॥ ११९ ॥

वैशम्पायन उवाच । तत्रापितपसिश्रेष्ठे वर्त्तमानःसवीर्य्यवान् । सिद्धचारणसंघानां बभूवप्रियदर्शनः ॥ १ ॥ शुश्रूषुरनहंवादी संयतात्माजितेन्द्रियः । स्वर्गंगन्तुंपराक्रांतः स्वेनवीर्य्येण भारत ॥ २ ॥ केषाञ्चिदभवद्भ्राता केषांचिदभवत्सखा । ऋषयस्त्वपरेचैनं पुत्रवत् परिपालयन् ॥ ३ ॥ सतुकालेनमहताप्राप्य निष्कल्मषंतपः । ब्रह्मर्षिसदृशः पाण्डुर्बभूवभरतर्षभ ॥ ४ ॥ अमावास्यान्तु सहिताऋषयः शंसितव्रताः । ब्रह्माणंद्रष्टुकामास्ते सम्प्रतस्थुर्महर्षयः ॥५॥सम्प्रयातानृषीन्दृष्ट्वा पाण्डुर्वचनमब्रवीत् ।

जाकर बसे अंतमें इन्द्रद्युम्न तालपर पहुँचकर हँसकूट को पीछे छोडकर शतशृंग नामक पहाडपर कठोर तपकरने लगे ॥ ४९ ॥

अध्याय १२० ॥

वैशम्पायन ने कहा कि हे भारत ! वीर्यवान पांडु उस स्थानमें बडी अच्छी तपस्यामें सदा नियुक्त रहकर सिद्ध चारणों के अति प्रियबने वोह शुश्रु सेवक अहंकार वर्जित संयत आत्मा जितेन्द्रिय होकर अपने वीर्य से स्वर्गको प्राप्तकरने योग्य पराक्रमी बने कोई२ऋषि उनको भाई और दूसरे मित्र समझने लगे और दूसरे ऋषि उनको पुत्रवत् पालने लगे हे भरत श्रेष्ठ अनन्तर पांडु बहुत दिनों तक विनाकलंक तपोबल संचित कर ब्रह्मर्षि समान बने।४। एकसमय अमावस्या तिथिमें ब्रह्मर्षि लोग भगवान स्वयम्भू के दर्शनके लिये एकत्र होकर ब्रह्मलोक में जारहे थे उस समय पांडु उन ऋषियों को जाते हुए देखकर बोले कि

great man being protected by ascetics and Rishis began to live on the level surface. Leaving behind Hanskoot, he then practiced severe penances on mount Shatshrang in the vicinity of lake *Indradyumn*. 49.

CBAPTER CXX.

आरुहेमांममश्रोणिंनेष्यामित्वां विहायसा ॥ ५ ॥ प्रबोधयैतान् संसुप्तान्मातरंचपरन्तप। सर्वानेवगमिष्यामि गृहीत्वावोविहायसा ॥ ६ ॥ भीम उवाच । माभैस्त्वंपृथुसुश्रोणि नैषकश्चिन्मयिस्थिते । हिंसितुकक्षनुयात् रक्षइतिमेनिश्चितामतिः । अहमेनंहनिष्यामि प्रेक्ष्यन्त्यास्तेसुमध्यमे ॥ ७ ॥ नायंप्रतिबलोभीरु राक्षसापसदोममसोढुंयुधिपरिस्पन्द मथवा सर्वराक्षसाः ॥ ८ ॥ पश्यबाहूसुवृत्तौमे हस्तिहस्तनिभाविमौ । ऊरूपरिघसङ्का शौसंहतंचाप्युरोमहत् ॥ ९ ॥ विक्रमंमेमयेन्द्रस्य साद्यद्रक्ष्यसिशोभने । मावमंस्थाः पृथुश्रोणिमत्वा मामिहमानुषम् ॥ १० ॥ हिडिम्बोवाच । नावमन्येनरव्याघ्रत्वामहं देवरूपिणम् । दृष्टप्रभावस्तुमया मानुषेष्वेराक्षसः ॥ ११ ॥ वैशम्पायन उवाच । तथा सञ्जल्पतस्तस्य भीमसेनस्यभारत । वाचं शुश्रावताक्रुद्धोराक्षसः पुरुषादकः । १२ । अवेक्षमाणस्तस्याश्च हिडिम्बो मानुषंवपुः । स्रग्दामपूरितशिखं समग्रेन्दुनिभाननम्

वोह करें । हेवीर ! मैं अपनी जातिके बल वीर्य रखनेके हेतु जहां चाहे जासक्तीहूं आप मेरी कमरपर चढ लें मैं आपको आकाश में लेजाऊं । हेशत्रुनाशी ! आप इन सोतीहुई माता और भाइयोंको जगावें मैं सबको लेकर आकाश मार्गसे जाऊंगी।६।भीमसेनने कहा हे सुन्दरी तुमभय मतखाओ मुझ को निश्चय जान पडता है कि मेरेलिये वह राक्षस बड़ा तुच्छ है वोह मुझको नहीं मार सकेगा हे सुन्दरी तुम देखलो तुम्हारे सामनेही मैं उस को नष्ट करताहूं उस नीच राक्षसका क्या कहना है जितने राक्षस हैं यदि सबभी आवें तो मेरे साथ लड़कर नाश से नहीं बचैंगे ।८। हस्ती की सूंड़की समान यह दोभुजलोहे के मुद्गर समान दो जांघ, और बड़े तथा कड़े दांतो को देखो हे सुन्दरी ! तुम आज मेरे महेन्द्र समान विक्रमको देखोगी तुम मुझको मनुष्य मानकर कम न समझना ।१०। हिडिंबानेकहा कि हे नरव्याघ्र आप देवरूपी हैं मैं आपका अनादर नहींकरती पर मनुष्य पर राक्षसका जितना प्रभाव है वोह मैं देखचुकीहूं । वैशम्पायन ने कहा कि हे भारत ! भीमसेन हिडिंबा से यह बातेंकर रहेथे कि मनुष्य के खानेवाले हिडिंबने क्रोध पूर्वक आकर वोह बातें सुनलीं।१२।और देखा कि हिडिंबाने सुन्दर मनुष्यका स्वरूपलियाहै उस

shall take you on my back to the skies. Please awaken the sleeping mother and brothers, I shall take them all."6.Bhimsen replied,"Have no fear, beautiful one. I believe the demon is powerless against me. I shall destroy him in your sight. If all the Rakshashes were to encounter me they could not escape destruction by my hand.8. These two arms like elephant's trunk, the two thighs like iron clubs and large hard teeth of mine are trustworthy. You will witness my Indra like prowess to day. Donot think little of me because I am a human being."10.Hidimba replied you are like a god.I donot honour you the less. But I have witnessed the superiority of the

॥ १३ ॥ सुभ्रूनासाक्षिकेशान्तं सुकुमारनखत्वचम् । सर्वाभरणसंयुक्तं सुसूक्ष्माम्बरवाससम् ॥ १४ ॥ तांतथामानुषंरूपं बिभ्रतीं सुमनोहरम् । पुंस्कामां शङ्कमानश्च चुक्रोधपुरुषादकः ॥१५॥ संक्रुद्धोराक्षसस्तस्या भगिन्याः कुरुसत्तम । उत्फाल्यविपुलेनेत्रेततस्तामिदमब्रवीत् ॥ १६ ॥ कोहिमेभोक्तुकामस्य विघ्नंचरति दुर्मतिः । नबिभेषिहिडिम्बेकिंमत्कोपाद्विप्रमोहिता ॥ १७ ॥ धिक्त्वामसति पुंस्कामेममविप्रियकारिणी । पूर्वेषांराक्षसेन्द्राणां सर्वेषामयशस्करि ॥ १८ ॥ यानिमानाश्रिताकार्षीर्विप्रियं सुमहन्मम । एषतानद्यवैसर्वान् हनिष्यामित्वयासह ॥ १९ ॥ एवमुक्त्वाहिडिम्बांस हिडिम्बोलोहितेक्षणः । वधायाभिपपातैनान् दन्तैर्दन्तानुपस्पृशन् ॥ २० ॥ तमापतन्तंसंप्रेक्ष्य भीमःप्रहरतांवरः । भर्त्सयामासतेजस्वी तिष्ठतिष्ठतिचाब्रवीत् ॥ २१ ॥ वैशम्पायन उवाच । भीमसेनस्तुतंदृष्ट्वा राक्षसंप्रहसन्निव । भगिनींप्रतिसंक्रुद्धमिदं

के केशोंमें फूलहार लगे हैं मुंह पूर्ण चन्द्रमा सा शोभायमानहै भौं, नाक, नेत्र, और केश सब सुशोभित हैं नख और त्वचा कोमल हुए हैं और सुन्दर पतला वस्त्र तथा सम्पूर्ण आभूषणोंसे सबशरीर बनाठनाहै।१४।उसको ऐसे सुन्दर मानवी रूप में देखकर पुरुष चाहने वाली जानकर बडा कोपाविष्ट हुआ । हे कुरुश्रेष्ठ ! तब क्रोध के मारे अपनी बडी लाल आंखेखोलकर बहिनसे बोला।१६।कि मैं भोजन चाहता हूं किसको ऐसी कुमतिहुई कि मेरी उस इच्छा में विघ्न डाला चाहता है हिडिंबे क्या तू मोहित होगई मेरे क्रोध से भय नहीं खाती तू पुरुष की चाह से मेरे अप्रिय काम में हाथ डालती है तुझ पर धिक्कार है तुझ से पहिले श्रेष्ठ राक्षसोंके यशरूपी चन्द्रमापर कलंकके धब्बे लगे तू जिसके भरोसे मेरा अप्रियकरने पर उद्यतहुई है आज मैं अभी तेरे सहित उसका काम पूराकिये देताहूं १९। राक्षस हिडिंब आंखे लालकर हिडिंबासे उसप्रकार कहकर दांतपीसताहुआ पांडवोंके वधके लिये दौड़ा मारनेमें दक्ष तेजस्वी भीमसेनने उसको आते देखकर लांछन के साथ कहा कि ठहरजा ।२१। वैशम्पायनने कहा कि भीमसेन उस राक्षस को बहिन पर क्रोधित देखकर

demoniac power over that of human beings." Vaishampayan said that Bhimsen was talking thus with Hidimba when the cannibal reached near enough to hear them and saw that Hidimba was transformed into a beautiful woman, her hair adorned with flowery garland, face radiant like the full moon, eyebrows, nose and eyes all adorned and soft body adorned with fine clothes and ornaments.14. Seeing her in such a beautiful womanly garb and knowing her to be in love he was very angry and with his eyes red with anger he said to his sister." I desire food. Who has come foolishly between me and my desire ? Are you infatuated, Hidimba ? Do you not fear my anger ? Has love prompted you to do against my pleasure ? Fie on you. You have dishonoured my predecessors. I shall kill you a s

वचनमब्रवीत् ॥ २२ ॥ किन्ते हिडिम्बएतैर्वा सुखसुप्तैःप्रबोधितैः । मामासादयदुर्बुद्धे तरसात्वंनराशन ॥ २३ ॥ मय्येवप्रहरैहित्वं नस्त्रियंहन्तुमर्हसि । विषेषतोऽनपकृते परेणापकृतेसति ॥ २४ ॥ नहीयंस्ववशाबाला कामयत्यद्यमामिह । चोदितैषाह्यनङ्गेन शरीरान्तरचारिणा ॥ २५ ॥ भगिनीतवदुर्वृत्तरक्षसां वैयशोहर । त्वन्नियोगेनचैवेयं रूपंममसमीक्ष्यच ॥ २६ ॥ कामयत्यद्यमां भीरुस्तवनैषापराध्यति । अनङ्गेनकृते दोषे नेमांगर्हितुमर्हसि ॥ २७ ॥ मयितिष्ठतिदुष्टात्मन्न स्त्रियंहन्तुमर्हसि । संगच्छस्व मयासार्द्धमेकेनैको नराशन । २८ ॥ अहमेकोगमिष्यामि त्वामद्ययमसादनम् । अद्य मद्बलनिष्पिष्टं शिरोराक्षसदीर्य्यताम् ॥ २९ ॥ कुञ्जरस्येवपादेन विगिष्पष्टं बलीयसः । अद्यगात्राणितेकंकाः श्येनागोमायवस्तथा ॥ ३० ॥ कर्षन्तुभुविसंहृष्टा निहतस्यमयामृधे । क्षणेनाद्यकरिष्येऽहमिदं वनमराक्षसम् । पुरायद्दूषितंनित्यं त्वयाभक्षय

हँसतेहुए बोले अरे कुमति मनुष्य खानेवाले तुझे हिडिंबा से क्या प्रयोजन है और इन सब सुख से सोये हुए भाइयों के जगाने की क्या आवश्यकता है तू तुरन्त मेरे पास आ और मुझको मार स्त्रीको मारना तुझे नहीं सोहता विशेष एक के दोषसे दूसरे को मारना ठीक नहीं है।२४।इसबालाने आज अपने वश में रहकर मेरीकामना नहीं की है किंतु कामदेव ने इस के शरीर में घुसकर इस ओर झुकाया है । अरे दुराचारी राक्षस तेरी बहिन ने तेरे कहने से यहां आकर मेरा रूप देखकर मेरी कामना की इस लिये यह अबला तेरी दोषी नहीं होसक्ती कामदेवनेही यह दोष किया है अतएव तुझे इस सुन्दरी को लांछन नहीं करनाचाहिये।२७।मेरेरहते तू इस नारीको नहीं मारसकेगा तू अकेलाहै अकेले मेरेही साथ लड़ मैं अकेला ही आज तुझको यमराज का पाहुना बनाऊंगा आज तेरा शिर मेरे भुजबल से पीसा जाकर ऐसा चूर होजायगा कि मानों बलवंत हाथी के पैर से कुचल गया आज रणभूमि में तेरे मारेजाने पर गृद्ध और गीदड आनन्दसे नीचे उतर कर तेरे शरीर को खींचेंगे पहिले तूने सदा मनुष्य खाकर जिसबन को दूषित कियाथा आज मैं

well as him for whose sake you are ready to do what I do not like."19. Having so said, the demon gnashed his teeth and ran towards the Pandavas to kill them. The valliant Bhim seeing him advance stopped him with reproach.21.Vaishampayan said that Bhim seeing the demon angry with his sister said to him smiling, "What for, O foolish cannibal, are you angry with Hidimba and what have you to do with my sleeping brothers ? Come aud kill me. It is not proper for you to kill a woman for the fault of anothor.24. This young woman his acted by love and not of her own accord. She came here by your permission and fell in love with me.You can not therefore blame her,O worst of demons 27. You shall not be able to kill her as long as I live. We shall fight a duel together and I alone shall kill you.

तानरान् ॥ ३१ ॥ अद्यत्वांभगिनीरक्षः कृष्यमाणंमयाऽसकृत् । द्रक्ष्यत्यद्रिप्रतीकाशं सिंहेनेवमहाद्विपम् ॥ ३२ ॥ निराबाधास्त्वयिहते मयाराक्षसपांसन । वनमेतच्चरिष्यन्ति पुरुषावनचारिणः ॥ ३३ ॥ हिडिम्ब उवाच । गर्ज्जितेनवृथाकिंते कत्थितेनचमानुष । कृत्वैतत्कर्मणासर्वं कत्थेथामाचिरंकृथाः ॥ ३४ ॥ बलिनंमन्यसे यच्चाप्यात्मानंसपराक्रमम् । ज्ञास्यस्यद्यसमागम्य मयात्मानंबलाधिकम् ॥ ३५ ॥ नतावदेतान् हिंसिष्ये स्वपन्त्वेतेयथासुखम् । एषत्वामेवदुर्बुद्धे निहन्म्यद्याप्रियम्बदम् ॥ ३६ ॥ पीत्वातवासृगगात्रेभ्यस्ततः पश्चादिमानपि । हनिष्यामिततःपश्चादिमां विप्रियकारिणीम् ॥ ३७ ॥ वैशम्पायन उवाच । एवमुक्त्वाततोबाहुं प्रगृह्यपुरुषादकः । अभ्यद्रवतसंक्रुद्धो भीमसेनमरिन्दमम् ॥ ३८ ॥ तस्याभिद्रवतस्तूर्णं भीमोभीमपराक्रमः । वेगेनप्रहितंबाहुं निजग्राहहसन्निव ॥ ३९ ॥ निगृह्यतंबलाद्भीमो विस्फुरन्तंचकर्षह ।

क्षणभर में उस बनको राक्षससे खालीकर दूंगा ।३१।सिंह जिसप्रकार गजपर चढजाताहै वैसेही आज पर्वत वत तुझको तेरी बहिन के सामने मैं बार २ खीचूंगा अरे ! राक्षस कुल में अधम तेरेमारे जाने से इस वन के रहनेवाले लोग विनाबाधा इस वनमें रहेंगे हिडिंब ने कहा अरे मनुष्य तेरे इस व्यर्थ गर्जन और व्यर्थ बातों से क्या होना है जैसा कहरहा है वैसा कर दिखा और अपनीबडाई प्रकटकर देरमतकर।३४।तू अपने को बली और पराक्रमी समझता है पर तू अपना बल और पराक्रम मुझ से मिलने से समझ सकेगा मैं इस समय उनको नहीं मारूंगा वे सुख से सोतेरहें अरे कुबुद्धि पहिले मैं तेरे समान कडीबात कहने वालेकोही नष्टकरूंगा पहले तेरी देह से रक्त पीऊंगा फिर उनको मारूंगा और इस अप्रिय करने वाली को भी मारडालूंगा । ३७ । वैशम्पायन ने कहा कि नर मांस खाने वाला राक्षस यह बात कह कर हाथ बढाकर क्रोधसे शत्रुनाशी भीमसेन पर दौडा भीम पराक्रमी भीमने हँसतेहुए उसी क्षण दौडतेहुए उस राक्षसके वेगसे चलायेहुए हाथों को पकड लिया ॥ ३९ ॥ वोह बलपूर्वक उन

Thy head shall be crushed by my arms as if it were under an elephant's foot. Beasts of prey will devour thy carcass when thou art slain. I shall clear to day the forest which thou hast long infested.31. As a lion attacks an elephant, I shall drag your body, huge like a mountain, in the sight of thy sister. The people of the forest will live safely when thou art killed." Hidimb said, " Cease your useless talk and prove your boasted superiority. You think yourself strong and valliant. But you will know your worth when you will meet me. I shall not kill them at present. Let them sleep with ease. I shall kill a boaster like you, first. I shall drink first the blood of thy body. I shall kill them next along with this wicked woman.37. Vaishampayan said that with these words the cannibal attackedBhim,

तस्माद्देशाद्धनूंष्यष्टौ सिंहःक्षुद्रमृगंयथा ॥ ४० ॥ ततःसराक्षसःक्रुद्धः पाण्डवेनबलार्दितः । भीमसेनंसमालिंग्य व्यनदद्भैरवंरवम् ॥ ४१ ॥ पुनर्भीमोबलादेनं विचकर्षमहाबलः । माशब्दःसुखसुप्तानां भ्रातॄणांमेभवेदिति ॥ ४२ ॥ अन्योऽन्यंतौसमासाद्य विचकर्षतुरोजसा । हिडिम्बोभीमसेनश्च विक्रमंचक्रतुःपरम् ॥ ४३ ॥ बभञ्जतुस्तदा वृक्षांल्लताश्चाकर्षतुस्तदा । मत्ताविवद्विपंरब्धौ वारणौषष्टिहायनौ ॥ ४४ ॥ तयोःशब्देनमहता विबुद्धास्तेनरर्षभाः । सहमात्राच ददृशुर्हिडिम्बामग्रतः स्थिताम् ॥ ४५ ॥

इत्यादिपर्वणि हिडिम्बवधपर्वणि हिडिम्बभीमयुद्धे
चतुष्पंचाशदधिकशततोऽध्यायः ॥ १५४ ॥

वैशम्पायन उवाच । प्रबुद्धास्तेहिडिम्बाया रूपंदृष्ट्वातिमानुषम् । विस्मिताःपुरुषव्याघ्रा बभूवुःपृथयासह ॥ १ ॥ ततःकुन्तीसमीक्ष्यैनां विस्मितारूपसम्पदा । उवा-

फैलायेहुए हाथों को थांभकर तथा उसको इसप्रकार खींच के कि जैसे सिंह छोटेमृग को पकडता है वहांसे आठ धनु अर्थात् ३२ हाथकी दूरीपर लेगया अनन्तर राक्षस बलपूर्वक पांडव भीमसेन से पीडित होकर उनको कसकर लिपटगया और बडे शब्द से चिल्लाने लगा उस शब्द को सुनकर सोतेहुए भाई जाग न उठें इसलिये महाबली भीमसेनने फिर उसे बल पूर्वक पकडा तब हिडिंब और भीमसेन दोनों एकदूसरेपर विक्रम प्रकाश करते हुए बल से एक दूसरेको पकडनेलगे।४३।वे दोनों साठवर्षके क्रोधित गजोंके समान वृक्षों को तोडने और लताओं को उखाडने लगे उन के उस बडे कोलाहल से नर श्रेष्ठ पांडवोंने मातासहित जागकर सामने खडी हिडिंबाको देखा ॥ ४५ ॥

अध्याय १५५ ॥

वैशम्पायननेकहा कि कुन्ती और पुरुष श्रेष्ठ पांडवोंने जागकर हिडिंबाका अलौकिक रूप देखकर अचरज माना फिर कुंती उसकी ओर भलीभांति देखकर रूपकी शोभा से

the destroyer of enemies, with outstretched arms. The valliant Bhim at once caught hold of the outstretched arms and dragged him at a a distance of thirty two yards as a lion carries a deer. The demon being held forcibly by the Pandava Bhimsen began to pull and roar with all his might. In order that his cries might not awaken the sleeping brothers, Bhim caught hold of him again with force. A furious combat then ensued and both began to show their valour. Both began to break down trees and creepers like full grown elephants. Their noise awakened the sleeping Pandavas who saw Hidimba standing before them. 45.

CHAPTER CLV

Vaishmpayan said that Kunti and the Pandavas were astonished at the extraordinary beauty of Hidimba. Having gazed towards her

चमधुरंवाक्यं सान्त्वपूर्वमिदंशनैः ॥ २ ॥ कस्यत्वंसुरगर्भाभे कावासिवरवर्णिनि । केनकार्य्येणसम्प्राप्ता कुतश्चागमनंतव ॥ ३ ॥ यदिवास्यवनस्यत्वं देवतायदिवाप्सराः। आचक्ष्वममतत्सर्वं किमर्थंचेहतिष्ठसि ॥ ४ ॥ हिडिंबोवाच । यदेतत्पश्यसिवनं नीलमेघनिभंमहत्।निवासोराक्षसस्यैष हिडिम्बस्यममैवच ॥६॥ तस्यमारक्षसेन्द्रस्य भगिनींविद्धिभाविनि । भ्रात्रासम्प्रेषितामार्य्ये त्वांसपुत्रांजिघांसितुम् ॥ ६ ॥ क्रूरबुद्धेरहंतस्य वचनादागतात्विह । अद्राक्षंनवहेमाभं तवपुत्रंमहाबलम् ॥ ७ ॥ ततोऽहंसर्वभूतानांभावे विचरताशुभे । चोदितातवपुत्रस्य मन्मथेनवशानुगा ॥ ८ ॥ ततोबुद्धो मयाभर्ता तवपुत्रोमहाबलः । अपनेतुंचयतितो नचैवशकितोमया ॥ ९ ॥ चिरायमाणांमांज्ञात्वा ततःसपुरुषादकः । स्वयमेवागतो हन्तुमिमान् सर्वांस्तवात्मजान् ॥१०॥

अचरज मानकर शांत और मीठी बातोंमें धीरे२ बोली।२।कि ऐ देवकन्या समान सुन्दरी तुम कौनहो ऐ वर वर्णिनी तुम किसकी स्त्रीहो तुम किस काम के लिये और कहांसे यहां आई हो यदि तुम इस वनकी देवी वा अप्सराहो तो मुझसे कहो कि क्यों यहां खडीहो।४ हिडिंबाने कहा कि नीले बादलकी भांति जो यह बड़ा वन देखते हैं यह हिडिंब नामक राक्षस के और मेरेबसने का स्थानहै मैं उस राक्षसनाथ हिडिंबकी बहिन हूं मेरेभाई ने आपकी और आपके पुत्रोंकी हिंसाकरने के लिये मुझे भेजाथा।६।ऐ आर्ये मैंने उस कुटिल बुद्धि भाईकी बातसे यहां आकर कच्चे सुवर्णकी समान अंगवाले आपके महाबली पुत्रको देखा मैं आप के पुत्रको देखतेही उस मन्मथ के वश में होगई जो सब जीवों के मन के मन्दिरों में फिरा करते हैं मैंने मदनबाण को मन से निकालना चाहा पर किसी प्रकार समर्थ नहींहुई।८। अतएव आप के महाबली पुत्रको मैंने मनही मन में भर्तामाना अनन्तर वोह राक्षस मुझको जिस काम के लिये भेजाथा उस में देर देखकर आप के

for a short time and wondered at her beauty. Kunti spoke to her in soft words, saying, "Who are you, O girl of godlike beauty, whose wife, and what for have you come hither? If you are an apsara or the goddess of the forest, why you are standing here."4. Hidimba replied, "The forest that you see extended like a blue cloud is the home of my brother, the Rakshas Hidimb and myself.6. My brother had sent me to kill you and your sons.I came hither by my brother's order and saw your son of body like gold. I was overpowered by love at first sight. I wanted to extricate the shaft from my mind but, could not succeed.8. Then I resolved to make your son my husband. The demon at my delay came himself and has been dragged at a short distance by your son. Look, yonder are the man and demon trying their strength.12 Vaishamayan said that on hearing her, Yudhishthir, Arjun, Nakul and Sahdev went to the place where the two were fighting.

सतेनममकान्तेन तवपुत्रेणधीमता । बलादितौविनिष्पिष्य ह्यपनीतोमहात्मना ॥ ११ ॥ विकर्षन्तौमहावेगौ गर्ज्जमानौपरस्परम् । पश्यैवंयुधिविक्रान्ता वेतौचनरराक्षसौ ॥ १२ वैशम्पायनउवाच । तस्याःश्रुत्वैववचनमुत्पपात युधिष्ठिरः । अर्जुनोनकुलश्चैव सहदेव श्चवीर्य्यवान् ॥ १३ ॥ तौतेददृशुरासक्तौ विकर्षन्तौपरस्परम् । कांक्षमाणौजयंचैव सिंहाविवबलोत्कटौ ॥ १४ ॥ अथान्योन्यंसमाश्लिष्य विकर्षन्तौपुनःपुनः । दावाग्नि धूमसदृशं चक्रतुःपार्थिवंरजः ॥ १५ ॥ वसुधारेणुसंवीतौ वसुधाधरसन्निभौ । बभ्रा जतुर्य्यथाशैलौ नीहारेणाभिसंवृतौ ॥ १६ ॥ राक्षसेनतदाभीमं क्लिश्यमानंनिरीक्ष्यच उवाचेदंवचः पार्थःप्रहसञ्छनकैरिव ॥ १७ ॥ भीममाभैर्महाबाहो नत्वांबुध्यामहेवय-म् । समेतंभीमरूपेण रक्षसाश्रमकर्षिताः ॥ १८ ॥ साहाय्येऽस्मिस्थितः पार्थपातयि

इन पुत्रोंको नष्ट करनेके लिये स्वयम् आगया और मेरे प्रिय धीमान् महात्मा वोह पुत्र बल पूर्वक खींचकर उसको यहांसे लेगये हैं देखिये वोह मनुष्य और राक्षस दोनों युद्धमें विक्रम देखाकर ललकारतेहुए एक दूसरे को वेगसे पकडरहे हैं ।१२। वैशम्पायन ने कहा कि उसकी बात यह सुनकर वीर्यवन्त युधिष्ठिर, अर्जुन, नकुल और सहदेव एकायक उठकर उस युद्धस्थल के निकट गये उन्होंने देखा कि राक्षस और भीमदोनों जय की आशा से एक दूसरेको पकडकर अतिबली सिंह समान खैंचरहे हैं।१४।और वे एक दूसरे से लिपटकर बार २ खिंचके दावाग्नि के धुएंकी नाई धुएं उठा रहे हैं तथा पर्वतवत धुएं से ढके जाकर हिम से ढके पर्वतकी भांति दिखाई देते हैं।१६।अनन्तर अर्जुन भीमसेन को राक्षससे पीडितहोते देखकर हँसतेहुए धीरे से बोले कि हे महाभुज भीम आप भय न खावें हम थके मांदे थे सो नहीं जानसके कि आप ऐसे घोररूप राक्षस से भिडगये हैं । हेपार्थ मैं आपको सहारा देनेको खड़ाहोगया हूं मैही इस राक्षस को नष्ट करूंगा

They saw that the Rakshas and Bhim were both pulling each other with force to gain victory. Smoke went out of their bodies by the friction and the two looked like a mountain covered with smoke.16.Arjun seeing Bhim in trouble with the Rakshas said to him smiling, "Have no fear, Bhim. We were tired and could not know in our sleep that you were engaged in battle with such a fell demon.I amhere ready to help you.I shall destroy him.NakulandSahdev will protect mother."19. Bhim said, "You need not mix yourself in this matter. Donot fear. When once the demon comes under my power he shall not escape death."Arjun said, " Donot spare long this ill-natured Rakshas. We should not stay here long. It will be day-break in a short time. The Rakshases are very powerful just at day break. 22.Finish his work soon and donot dally.Cease fighting with this cannibal.He may use his cunningness at any time.Show the power of your arms.Vaishmpayan

ष्यामिराक्षसम् । नकुलःसहदेवश्च मातरंगोपयिष्यतः ॥ १९ ॥ भीम उवाच । उदासीनोनिरीक्षस्वन कार्य्यःसंभ्रमस्त्वया । नजात्वयंपुनर्जीवेन्मद्बाह्वन्तरमागतः ॥२०॥ अर्जुन उवाच । किमनेनचिरंभीम जीवतापापरक्षसा । गन्तव्येनचिरंस्थातुमिह शक्यमरिन्दम ॥ २१ ॥ पुरासंरज्यतेप्राची पुरासन्ध्याप्रवर्त्तते।रौद्रेमुहूर्तेरक्षांसि प्रबला निभवन्त्युत ॥ २२ ॥ त्वरस्वभीममाक्रीड जहिरक्षोविभीषणम् । पुराविकुरुतेमायां भुजयोःसारमर्पय ॥ २३ ॥ वैशम्पायन उवाच । अर्जुनेनैवमुक्तस्तु भीमोरोषाज्ज्वलन्निव । बलमाहारयामास यद्वायोर्जगतःक्षये ॥२४॥ ततस्तस्याम्बुदाभस्य भीमो रोषात्तुरक्षसः । उत्क्षिप्याभ्रामयद्देहं तूर्णशतगुणंतदा ॥ २५ ॥ भीम उवाच । वृथा मांसैर्वृथापुष्टो वृथावृद्धोवृथामतिः । वृथामरणमर्हस्त्वं वृथाद्यनभविष्यति ॥ २६ ॥

नकुल और सहदेव माताकी रक्षाकरेंगे।१९।भीमने कहा कि तुम्हारे इसमें मिलनेका कुछ काम नहीं देखो मत घबराओ जब यह राक्षस मेरेदोनोंहाथों के नीचे दबगया है तब कभी जीता नहीं रहेगा अर्जुन ने कहा कि हे भीम इस पापात्मा राक्षस का देर तक जीवित रखने का क्या प्रयोजन है यहां अब अधिक रहने का काल नहीं है थोडी देर पूर्व दिशा लाल और प्रातः सन्ध्या का काल आजायगा रौद्र मुहूर्त्त में अर्थात् ब्राह्म मुहूर्त्त के पूर्व दो घडी तक राक्षस प्रबलहोते हैं । २२ । अतएव हे भीम आप शीघ्र पूर्ण कार्य कीजिये अब इसे लेकर न खेलिये इस मांसभोजी को त्यागदीजिये इससेपीछे वोह माया फैलासक्ताहै सो भुजबल प्रकटकीजिये । वैशम्पायन ने कहा कि भीमने अर्जुन की इसबात से क्रोधितहोकर प्रलयकालिक वायुका बल संचय किया और उसीक्षण कोप प्रकटकर बादलके रंगवाली उस राक्षसकी देहको सौवारसे भी अधिक उठाकर ऊपर घुमाया।२५।और उसकानाम लेकर कहा कि तू मांस से व्यर्थ पुष्ट और बृद्धहुआहै तेरीबुद्धि भी व्यर्थ है सो तू व्यर्थ मृत्यु अर्थात् जिस बाहुयुद्धमें मरनेसे स्वर्ग नहीं मिलता उस

said that hearing this from Arjun, Bhim collected in himself strength like that of the wind on the last day of the world.And giving vent to anger circled the cloudy body of the demon a hundred times round his head.25. And calling him by his name he said,"You have uselessly fattened your body with flesh. Thy wisdom is also useless. So you will die a useless death(people dying in battle without weapons donot attain heaven))by my hands.I shall make this forest free from danger. You will no longer eat human flesh." Arjun said, "I am ready to help you, if you find it difficult to cope with him. Kill him at once or let me finish the work. You are tired with work and must disengage yourself. Vaishampayan said that on hearing this, Bhimsen in great anger, brought the Rakshas to ground with great force and crushed him to death like a brute. At his last moment the Rakshas

क्षममद्यकरिष्यामि यथावनमकण्टकम् । नपुनर्मानुषानहत्वा भक्षयिष्यासिराक्षस ।२७।
अर्जुन उवाच । यदित्वामन्यसेभारं त्वामिमंराक्षसंयुधि । करोमितवसाहाय्यं शीघ्रमे
षनिपात्यताम् ॥ २८ ॥ अथवाप्यहमेवैनं हनिष्यामि वृकोदर । कृतकर्मापरिश्रान्तः
साधुतावदुपारम ॥ २९ ॥ तस्यतद्वचनंश्रुत्वा भीमसेनोऽत्यमर्षणः । निष्पिष्यैनंबला
द्भूमौ पशुमारममारयत् ॥ ३० ॥ समाश्र्यमाणोभीमेन ननादविपुलंस्वनम् । पूरयं
स्तद्वनंसर्वं जलार्द्रइवदुन्दुभिः ॥ ३१ ॥ बाहुभ्यांयोक्रयित्वातं बलवान्पाण्डुनन्दनः ।
मध्येभङ्क्त्वा महाबाहुर्हर्षयामास पाण्डवान् ॥३२॥ हिडिम्बंनिहतंदृष्ट्वा संहृष्टास्तेत-
रास्विनः । अपूजयन्नरव्याघ्रं भीमसेनमरिन्दमम् ॥ ३३ ॥ अभिपूज्यमहात्मानं भीमं
भीमपराक्रमम् । पुनरेवार्जुनोवाक्यमुवाचेदं वृकोदरम् ॥ ३४ ॥ नदूरंनगरंमन्ये व-
नादस्मादहं विभो । शीघ्रंगच्छामभद्रंते ननोविद्यात्सुयोधनः ॥ ३५ ॥ ततःसर्वेतथे-
त्युक्त्वा मात्रासहमहारथाः । प्रययुःपुरुषव्याघ्रा हिडिम्बाचैवराक्षसी ॥ ३६ ॥
इत्यादिपर्वणि हिडिम्बवधपर्वणि हिडिंबवधेपंच पंचाशदधिकशततोऽध्यायः ॥१५५॥

केही योग्य है इससे तू व्यर्थ मृत्युको प्राप्तकरेगा।२६। हे राक्षस आज मैं इस बनको शांति युक्त और निष्कंटक करूंगा तू फिर मनुष्यमारकर नहीं खासकेगा।२७।अर्जुन ने कहा कि यदि आपने इसराक्षसको युद्ध में भार समझाहो तो मैं आपकी सहायताकरूं आप इसका तुरन्त अंतकीजिये । हे वृकोदर ! अथवा कहिये तो मैंही इसका काम पूराकरूं आप कार्य करके थकगये हैं अब निवृत्तहोना ठीकहै।२९।वैशम्पायनने कहा कि भीमसेन ने उनकी उसबातको सुनकर क्रोधितहो बलसे राक्षसको मिट्टी पर पीसकर पशुकी भांति नष्ट किया राक्षस ने मरने के समय जल से भीगेहुए नगाडे कीभांति घोर शब्द से चिल्लाकर उस वन को पूरितकिया।३१।बलवन्त महाभुज पांडुनन्दन ने राक्षसको हाथों से पकडकर उस के मझिले भाग को तोडकर पांडवों को आनन्दित किया बलशाली पांडुपुत्रों ने हिडिंब को नष्टहोते देखकर प्रसन्न चित्त से नर श्रेष्ठ शत्रुनाशी भीमसेनकी बड़ी प्रशंसाकी।३३। अनन्तर अर्जुन महात्मा भीम पराक्रमी वृकोदरका आदरकर बोले कि हे विभो मुझ को जान पडताहै कि इस बनसे नगर बडी दूर नहीं है चलिये हम उस स्थान में शीघ्र जायँ तभी सुयोधन हमारा समाचार नहीं पावे गा । अनन्तर कुन्ती और महारथी पुरुषोत्तम पाण्डव गण उसपर सम्मतहो वहांसे चलने लगे और हिडिंबाभी उनके संग चली॥३६॥

filled the forest with a sound resembling that of a wet drum. The brave son of Pandu pleased the Pandavas by breaking the middle part of his body. The brave Pandavas cheerfully praised the work of Bhimsen, the best of men and destroyer of enemies. Arjun, then, said, "I think the city is not far off. Let us hasten to the city in order to escape being seen by Suyodhan's men. All having agreed to this proposal, proceeded in that direction and Hidimba followed them.

भीमसेन उवाच । स्मरन्तिवैरंरक्षांसि मायामाश्रित्यमोहिनीम् । हिडिम्बेव्रजपन्थानं त्वमिमंभ्रातृसेवितम् ॥ १ ॥ युधिष्ठिर उवाच । क्रुद्धोऽपिपुरुषव्याघ्र भीम मास्मस्त्रियंवधीः । शरीरगुप्त्यभ्यधिकंधर्मं गोपायपाण्डव ॥ २ ॥ वधाभिप्रायमायान्तमवधीस्त्वंमहाबलम् । रक्षसस्तस्यभगिनी किंनःक्रुद्धाकरिष्यति ॥ ३ ॥ वैशम्पायन उवाच । हिडिम्बातुततः कुन्तीमभिवाद्यकृताञ्जलिः । युधिष्ठिरन्तुकौन्तेयमिदं वचनमब्रवीत् ॥ ४ ॥ आर्य्येजानासि यद्दुःखमिह स्त्रीणामनङ्गजम् । तदिदंमामनुप्राप्तं भीमसेनकृतंशुभे ॥ ५ ॥ सोढंतत्परमंदुःखं मयाकालप्रतीक्षया । सोयमभ्यागतः कालो भवितामेसुखोदयः ॥ ६ ॥ मयाप्युत्सृज्यसुहृदः स्वधर्मंस्वजनंतथा । वृतोऽयंपुरुषव्याघ्रस्तव पुत्रःपतिःशुभे ॥ ७ ॥ वीरेणाहंतथातेन त्वयाचापियशस्विनी । प्रत्याख्या

अध्याय १५६ ॥

भीमसेन ने हिडिंबा को पीछे आते देखकर कहा कि राक्षसगण मोहिनी माया धारणकर पहिलीशत्रुताको स्मरण किये रहते हैं सो तेराभाई जिस पथ में गयाहै तूभी उसी पथमें जा युधिष्ठिर ने यह सुनकर कहा कि हेपुरुष व्याघ्र भीम तुम क्रोधितभी हुएहोतो स्त्री को मत मारो । हेपांडव ! शरीरसे धर्म बड़ाहै धर्म को पालनकरो जब तुम ने उस महाबली राक्षस को जो हमको मारने आया था मारडाला तब उसकी बहिन क्रोधकर हमारा क्या करलेगी ।३। वैशम्पायन ने कहा कि अनन्तर हिडिंबाने कुंती और युधिष्ठिर को प्रणामकर कुंती से कहा कि ऐ आर्ये तुम जानतीहो कि स्त्रियों को अनंग से कितना दुःखहोता है । ऐ शुभे ! उस अनंग के द्वारा मैं भीमसेन से सताई जाती हूं ।५। मैंने कालकी ओर देखकर उस गहरे दुःख को सह लिया अब सुखका समय आपहुँचाहै ऐ शुभे मैंने स्वधर्म मित्रों और स्वजनों को छोड़कर आपके पुरुष श्रेष्ठ पुत्रको पतिके पद पर बैठाया है । हेसुन्दरी यशस्विनी मैं सच कहती हूं कि यदि यह वीर या आप मेरी

CHAPTER CLVI

Seeing Hidimba follow, Bhimsen said, "The Rakshases are deceivers and often remember the old enmity. So you must follow the path of your brother." Yudhishthir interrupted him and said, "Donot kill a woman even if you are angry. Dharm is superior to one's body and must be kept. When you have killed the Rakshas who had come to kill us, we donot fear his sister's anger. Vaishampayan said that, then, Hidimba with a bow to Yudhishthir and Kunti addressed the latter as follows:-You know well good woman, how much trouble does love give to women. I am distressed by Bhimsen through love. I bore the sight of death (brother's) hoping to get relief now. Having renounced my Dharm, friends and kinsmen, I have resolved

तानजीवामि सत्यमेतद्ब्रवीमिते ॥ ८ ॥ तदर्हसिकृपांकर्त्तुं मयित्वंवरवर्णिनि । मत्वा मूढेतितन्मांत्वं भक्तावानुगतेतिवा ॥ ९ ॥ भर्त्रानेनमहाभागे संयोजयसुतेनह । तमुपादायगच्छेयं यथेष्टंदेव रूपिणम् । पुनश्चैवानयिष्यामि विस्रम्भंकुरुमेशुभे ॥ १० ॥ अहंहिमनसाध्याता सर्वान्नेष्यामिवःसदा । वृजिनात्तारयिष्यामि दुर्गेषुविषमेषुच ॥ ॥ ११ ॥ पृष्ठेनवोवहिष्यामि शीघ्रंगतिमभीप्सतः । यूयंप्रसादंकुरुत भीमसेनोभजेतमाम् ॥ १२ ॥ आपदस्तरणेप्राणान्धारयेद्येन तेनवा । सर्वमाबृत्यकर्त्तव्यं तंधर्ममनुवर्त्तता ॥ १३ ॥ आपत्सुयोधारयति धर्मंधर्मविदुत्तमः । व्यसनंह्येवधर्मस्य धर्मिणामापदुच्यते ॥ १४ ॥ पुण्यंप्राणान्धारयति पुण्यंप्राणदमुच्यते । येनयेनाचरेद्धर्मं तस्मिन्नगर्हानविद्यते ॥ १५ ॥ युधिष्ठिर उवाच । एवमेतद्यथात्थत्वं हिडिम्बेनात्रसंशयः ।

बात को न सुनोगी तो मैं न जीऊंगी इस लिये आप चाहैं मूढ समझकर वा भक्त अथवा कृपापात्र जानकर मुझपर कृपा दिखावें।९।और अपनेपुत्र मेरेपति भीमसेनसे मुझे मिलावें मैं इस देवरूपी पति को लेकर जहां मन चाहे चलीजाऊं और फिर लेआऊंगी । हे शुभे आप मेरा विश्वासकरें आप के स्मरणकरतेही मैं आकर आपलोगों को मनमाने स्थान में लेजाऊंगी।१०।और जाने के अयोग्य कठिन स्थानमेंभी विपत आनेपर उस से बचाऊंगी यदि आप कहीं शीघ्र जाना चाहें तो उसीक्षण पीठपर चढाकर लेजाऊंगी आप प्रसन्नहोवें कि भीमसेन मुझसे प्रीति करे।१२।विपतसे बचनेके लिये जिस उपाय सेभी होसके अपनी रक्षा करनी चाहिये और एक धर्मकी शरणलेकर सब दशा सहलेनी चाहिये धर्मशील जनों के लिये विपदही धर्मकी रोकनेवाली है जो जन विपतकालमेंभी धर्मकी रक्षा करते हैं वही धार्मिकोंमें श्रेष्ठहैं प्राण रखनेही के लिये पुण्य और प्राण देनेवालाभी पुण्यही को पण्डितों ने बतलाया है इस लिये हर किसी मना कियेहुए कर्म को करके प्राण बचाना चाहिये उससे निंदा नहीं होती।१५।युधिष्ठिरने कहा हे सुन्दरि हिडिंबे इस में सन्देह नहीं

to make your son my husband. I speak the truth when I say I shall cease to live if you and your son will not grant my request. Have mercy upon me, whether you regard me as a fool, a true lover or pitiable. Let your son Bhimsen be my dear husband. I shall take him wherever I like. Believe me, I shall bring him again. I shall take you all to the place you desire to reach. I shall bring you out safely, when you are in danger, though it be an impregnable place. Again, if you want to reach a place soon, I shall take you on my back. Be pleased to allow Bhimsen to love me. We must protect self from ill by every possible means. One must endure all for Dharm. Misery is the only test of Dharm. (Those, who are firm on their Dharm in misery, are really good.) The learned say that one must do good to preserve life and

स्थातव्यंतुत्वयासत्ये यथाब्रूयांसुमध्यमे ॥ १६ ॥ स्नातंकृतान्हिकंभद्रे कृतकौतुकमङ्गलम् । भीमसेनंभजेथास्त्वं प्रागस्तगमनाद्रवेः ॥ १७ ॥ अहःसुविहरानेन यथाकामं मनोजवा । अयंत्वानयितव्यस्ते भीमसेनःसदानिशि ॥ १८ ॥ वैशम्पायन उवाच । तथेतितत्प्रतिज्ञाय भीमसेनोऽब्रवीदिदम् । शृणुराक्षसिसत्येन समयंतेवदाम्यहम् १९ यावत्कालेनभवति पुत्रस्योत्पादनंशुभे । तावत्कालंगमिष्यामि त्वयासहसुमध्यमे ॥ ॥ २० ॥ वैशम्पायन उवाच । तथेतितत्प्रतिज्ञाय हिडिम्बाराक्षसीतदा । भीमसेन मुपादाय सोर्द्धमाचक्रमेततः ॥ २१ ॥ शैलशृङ्गेषुरम्येषु देवतायतनेषुच । मृगपक्षिविघुष्टेषु रमणीयेषुसर्वदा ॥ २२ ॥ कृत्वाचरूपंपरमं सर्वाभरणभूषिता । संजल्पन्तीसुमधुरं रमयामासपाण्डवम् ॥ २३ ॥ तथैववनदुर्गेषु पुष्पितद्रुमवल्लिषु।सरःसुरमणीयेषु पद्मोत्पलयुतेषुच ॥ २४ ॥ नदीद्वीपप्रदेशेषु वैदूर्य्यसिकतासुच । सुतीर्थवनतोयासु त

जो तुम ने कहा सबठीक है पर तुम ने जैसा कहा तुमको उसी सत्य में आवद्ध रहना पडेगा । हेभद्रे ! भीमसेन के नहाकर आह्निक कर लेने और कौतुकमंगल करचुकने से सूर्यास्तके पूर्वतक तुम उनको साथ रखसकोगी हे मन के वेग के समान चलनेवाली दिन को भीमसेन से मनमाना विहारकरके नित्यरात्रिको यहां लादेना।१८। वैशम्पायन ने कहा कि भीमसेनने इसपर सम्मतहोकर हिडिंबासे कहा कि हे निशाचरि मैं सत्य करके तुम से एक नियम करताहूं सुनो हेसुन्दरि ! जब तक तुम्हारे पुत्र न होगा मैं तब तक तुमसे मिलूंगा ।२०। वैशम्पायननेकहा कि अनन्तर राक्षसी हिडिंबा यह मानकर भीमसेनको ले उसी क्षण आकाश मार्ग को चली गई फिर मनके समान तेज चलनेवाली वोह राक्षसी परम मनोहर रूप धारणकर सब भूषणोंसे सजकर मीठीबोली बोलती हुई समय २ पर नानास्थानों में भीमसेनके साथ आनन्द करनेलगी कभी सुन्दर पहाडकी चोटीपर कभी मृग पक्षियों के शब्द से गूंजतेहुए मनोहर देवमन्दिर में, कभी बन दुर्ग में, कभी फूले वृक्षोंसे सुहावनी जगह कभी नीले व लाल पद्मसे सुशोभित सुन्दर सरोवर में, वैदूर्य मणि और नदी के वालू से पूरित द्वीप में, कभी सुन्दर बन और अमृत समान जल

that the doing of good is the source of life. Life should be preserved even at the risk of having to do a thing that is prohibited. This course is unblamable." Yudhishthir said, "What you say is true. But you shall have to abide by the promise you have given. Bnimsen will remain with you from morniug, after finishing his ablutions and libations to fire, till sunset. You will take him where you like during day time; but at night fall you must bring him hither. Vaishampayan said that having consented to this Bhim said to Hidimba, "I propose to you yet another condition, viz, I shall have connection with you till you have a son, and you will have to abide by this condition." Vaishmpayan

थागिरिनदीषुच ॥ २५ ॥ काननेषुविचित्रेषु पुष्पितद्रुमवल्लिषु । हिमवद्गिरिकुंजेषु गुहासुविविधासुच ॥ २६ ॥ प्रफुल्लशतपत्रेषु सरःस्वमलवारिषु । सागरस्यप्रदेशेषु मणिद्वीपचितेषुच ॥ २७ ॥ पल्वलेषुचरम्येषु महाशालवनेषुच । देवारण्येषुपुण्येषु तथा पर्वतसानुषु ॥ २८ ॥ गुह्यकानांनिवासेषु तापसायतनेषुच । सर्वर्तुफलरम्येषु मानसेषुसरःसुच ॥ २९ ॥ बिभ्रतीपरमंरूपं रमयामासपाण्डवम् । रमयन्तीतथाभीमं तत्र तत्रमनोजवा ॥ ३० ॥ प्रजज्ञेराक्षसीपुत्रं भीमसेनान्महाबलम् । विरूपाक्षंमहावक्त्रंशंकुकर्णंविभीषणम् ॥ ३१ ॥ भीमनादंसुताम्रोष्ठं तीक्ष्णदंष्ट्रंमहाबलम् । महेष्वासंमहावीर्यं महासत्त्वंमहाभुजम् ॥ ३२ ॥ महाजवंमहाकायं महामायमरिन्दमम् । दीर्घघोणंमहोरस्कं विकटोद्धद्धपिण्डिकम् ॥ ३३ ॥ अमानुषंमानुषजं भीमवेगंमहाबलम् ।

सुशोभित अच्छे तीर्थ पहाड़ी नदीमें।२५।कभी फूलवाले पौधों और लताओंसे सुहावने बन में, कभी हिमाचल के कुञ्ज में, कभी कन्दरा के भीतर, कभी खिले कमलों से सोहते हुए जलभरे ताल में, कभी सुवर्ण से भरे सागर खण्डमें, कभी मनोहर नगर और उपबन में, कभी देवोंके पवित्र बन में, कभी पहाडकी कन्दरा में ।२८।कभी गुह्यकोंकी बास भूमि में, कभी तपस्वियों के स्थान में, कभी सदा फल फूलयुक्त मनमोहन मानसरोवर में, क्रीडाकर पाण्डव भीमसेन को आनन्द देनेलगी ।३०।फिर उस राक्षसीने भीमसेन से भीमाकार बड़ाभारी अति बलवीर्यवन्त बड़ाचापधारी महान् सत्ववान् बड़े हाथवाला अति वेगवान, बड़ा मायारचनेवाला, शत्रुनाशी, अमनुष्य, परमनुष्य वीर्य से उत्पन्न एक पुत्र उत्पन्न किया उस पुत्रकी आंखैं बड़ी विकट, मुँह बडाभारी, कान शंख के समान,स्वर अति भयानक, होठों का रंग तांबेकी भांति, दांतकटीले, नाक लम्बी, छाती चौडी और पिंडली टेढ़ीथीं।३३। वोह कुमार सम्पूर्ण पिशाच और राक्षसोंमें बडाविक्रमी

said that she took Bhimsen with her and flew into theair The Rakshas woman, of movements swift like the mind assumed a heart enchanting shape decked herself in ornaments and talking in a sweet tone she enjoyed Bhimsen's company in different places. They were, at times, on the summit of a beautiful mountain, in a gods' temple ringing with the sounds of birds and animals, in a forest fortress, amidst flower trees, on a lake decked with blue or red lotus, on an island full of gems and the river sand, in a beautiful forest, by a mountain river having water like nectar, in a forest full of beautiful fruit trees and creepers, in a cave of the Himalayas, on the Ocean full of gold and jewels, in a beautiful orchard, in a forest consecrated to gods, in the habitataions of Guhyaks and hermits, or by the lake Mansarowar always decked with heartenchanting fruits and flowers. In time she gave birth to a son of large body. His eyes were very wonderful,

यःपिशाचाननीत्यान्यान् बभूवातीवराक्षसान ॥३४॥ बालोऽपियौवनंप्राप्तो मानुषेषु विशाम्पते । सर्वास्त्रेषुपरंवीरः प्रकर्षमगमद्बली ॥ ३५ ॥ सद्यो हिगर्भाराक्षस्यो लभं तेप्रसवन्तिच । कामरूपधराश्चैव भवन्तिबहुरूपिकाः ॥ ३६ ॥ प्रणम्यविकचःपादा-वगृह्णात् सपितुस्तदा । मातुश्चपरमेष्वासस्तौच नामास्यचक्रतुः ॥ ३७ ॥ घटोहास्यो-त्कचइतिमाता तंप्रत्यभाषत । अब्रवीत्तेननामास्य घटोत्कचइतिस्मह ॥ ३८ ॥ अनु-रक्तश्चतानासीत् पाण्डवानसघटोत्कचः । तेषाञ्चदयितो नित्यमात्मनित्योबभूवह ॥ ॥ ३९ ॥ संवाससमयोजीर्ण इत्याभाष्यततस्तुतान् । हिडिम्बासमयंकृत्वा स्वांगतिं प्रत्यपद्यत ॥ ४० ॥ कृत्यकालउपस्थास्ये पितृनितिघटोत्कचः । आमन्त्यरक्षसांश्रेष्ठः

हुआ हे राजन् ! उस बलवान वीर पुत्रने बालकहोने परभी यौवन प्राप्तकिया और उसने मनुष्य लोक में प्रचलित सम्पूर्ण अस्त्रों में बड़ी उन्नति की राक्षसी जिस दिन गर्भवती होती है उसी दिन प्रसव करती है और प्रसवकिया हुआ बालकभी जन्म लेतेही मन-मानारूप धारण करसक्ताहै ।३६। कमर, गर्दन, मुख, कान और केश इन सब अंगोंके वेढबहोने परभी अनेक प्रभायुक्त और बडाचापधारी हिडिंबा कुमार जन्म लेतेही प्रणाम कर पिता और माताके पाओंपर गिरा उन्होंनेभी उसका नाम रखदिया उस बालक के घटकी समान उत्कच अर्थात् खडेकेश थे सो हिडिंबाने उसको देखकर कहा कि इसके उत्कच घटकी भांति हैं इसलिये भीमसेनने उसका नाम घटोत्कच रक्खा।३८।घटोत्कच स्वाधीन होने परभी पांडवों का बड़ा प्रेमी था पांडव लोगभी उस से बडा स्नेह करतेथे फिर हिडिंबा ने नियमानुसार काम कर यह कह के कि पति के साथ रहने का काल बीता पांडवों से सम्भाषणकर अपनारूप लेलिया।४०।राक्षसोंमें श्रेष्ठ घटोत्कचभी पितरों

---

mouth large, ears like a conch, voice dreadful, lips of the colour of copper, teeth sharp, nose long, breast broad, and the joints of his feet were crooked and high. He became the most vlliant of the Rakshases. Although a child he was very powerful and was dexterous in the use of weapons prevalent among mankind. A Rakshas woman gives birth the very day she conceives and the child becomes at once full grown and can assume any form. Although his waist, neck, mouth, ear and hair were deformed, yet the son of Hidimba was of dignified appearance. Soon after birth he prostrated himself before his father and mother. He was named Ghatotkach by Bhimsen because the hair or *otkach* on his head resembled a *ghat* or pitcher. Ghatotkach, though independent, loved the Pandavas. Hidimba, according to her promise, bade the Pandavas farewell and retook her real form. Having

प्रतस्थेचोत्तरांदिशम् ॥ ४१ ॥ सहिसृष्टोमघवता शक्तिहेतोर्महात्मना । कर्णस्याप्रतिवीर्य्यस्य प्रतियोद्धामहारथः ॥ ४२ ॥

इत्यादिपर्वणि हिडिम्बवधपर्वणि घटोत्कचोत्पत्तौ षट्पंचाशदधिकशतोऽध्यायः ॥ १५६ ॥

वैशम्पायन उवाच । तेवनेनवनंगत्वा घ्नन्तोमृगगणान्बहून् । अपक्रम्यययुराजंस्त्वरमाणा महारथाः ॥ १ ॥ मत्स्यांस्त्रिगर्त्तान्पञ्चालान् कीचकानन्तरेणच । रमणीयान्वनोद्देशान् प्रेक्षमाणाःसरांसिच ॥ २ ॥ जटाःकृत्वात्मनःसर्वेवल्कलाजिनवाससः । सहकुन्त्यामहात्मानो बिभ्रतस्तापसंवपुः ॥ ३ ॥ क्वचिद्वहन्तोजननीं त्वरमाणा महारथाः । क्वचिच्छन्देनगच्छन्तस्तेजग्मुः प्रसभंपुनः ॥ ४ ॥ ब्राह्मंवेदमधीयानां वेदाङ्गानिचसर्वशः । नीतिशास्त्रञ्चसर्वज्ञा ददृशुस्तेपितामहम् ॥ ५ ॥ तेऽभिवाद्यमहात्मानं

से यह कहकर कि काम आने पर आपहुँचूंगा सम्भाषण कर उत्तरकी ओर गया महात्मा महेन्द्रने विरुद्ध वीर्य वर्जित कर्ण को एक पुरुष मारनेवाली शक्ति के लिये इस महारथी घटोत्कच को विरोधी योद्धा बनाया था ॥ ४२ ॥

अध्याय १५७ ॥

वैशम्पायन ने कहा कि अनन्तर वे महारथी महात्मा वीर पांडवगण जटाधारी होकर मृगचर्म और वल्कल पहिन कर माताकुंती सहित तपस्वीका वेष लेकर वन २ घूमने लगे रास्ते में मत्स्य, त्रिगर्त, पांचाल और कीचक देशोंके सुन्दर बन खण्ड और नानाप्रकार की लताओं को देखने लगे कहीं २ शीघ्रताके लिये कुंती को उठालेतेथे और कहीं २ सहज चाल में सुख से चलकर फिर शीघ्र चलते थे एक समय वे सम्पूर्ण वेद वेदांग और नीतिशास्त्र पढरहे थे कि उन्हों ने पितामह व्यासजी को देखा महात्मा कृष्ण

proimsed to come at the time of need, Ghatotkch, too, left the Pandavas and went Northward. Ghatotkach became a prey to the missile given by Mahendra to Karan.

CHAPTER CLVII.

Vaishmpayan said that the Pandavas assumed the garb of hermits with long locks of hair, deer skin, and clothes made of the barks of trees. They wandered from forest to forest hunting the deer. They saw in their way the beautiful scenery in the countries of Matsya, Trigart, Panchal, and Kichak. Sometimes they took up Kunti when they had to go faster, otherwise they walked slowly. Once, when they were engaged in the study of the Vedas, Vedangas and Philosophy, they saw their grand father, the Rishi Vyas. On seeing the great Rishi, the Pandavas with their mother. paid respect and stood

कृष्णद्वैपायनंतदा । तस्थुःप्राञ्जलयःसर्वे सहमात्रापरन्तपाः ॥ ६ ॥ व्यास उवाच । मयेदंव्यसनंपूर्वं विदितंभरतर्षभाः । यथातुतैरधर्मेण धार्त्तराष्ट्रैर्विवासिताः ॥ ७ ॥ तद्विदित्वास्मिसम्प्राप्तश्चिकीर्षुः परमंहितम् । नाविषादोऽत्रकर्त्तव्यः सर्वमेतत्सुखायवः ॥ ८ ॥ समास्तेचैवमेसर्वे युष्मचैवनसंशयः । दीनतोबालतश्चैव स्नेहंकुर्वन्ति मानवाः ॥ ९ ॥ तस्मादभ्यधिकःस्नेहो युष्मासुममसाम्प्रतम् । स्नेहपूर्वंचिकीर्षामि हितंवस्तन्निबोधत ॥ १० ॥ इदंनगरमभ्याशे रमणीयंनिरामयम् । वसतेहप्रतिच्छन्ना ममागमनकाङ्क्षिणः ॥ ११ ॥ वैशम्पायन उवाच । एवंसतान्समाश्वास्य व्यासःसत्यवतीसुतः । एकचक्रामभिगतः कुन्तीमाश्वासयत्प्रभुः ॥ १२ ॥ व्यास उवाच । जीवत्पुत्रिसुतस्तेऽयंधर्मनित्योयुधिष्ठिरः । धर्मेणपृथिवींजित्वा महात्मापुरुषर्षभः । पृथिव्यांपार्थिवान्सर्वान् प्रशासिष्यतिधर्मराट् ॥ १३ ॥ पृथिवीमखिलांजित्वा सर्वांसागरमेखलाम्।

द्वैपायन के देखतेही शत्रुनाशी पांडवगण मातासहित उनको प्रणामकर दोनोंहाथ जोड कर उन के सामने खडेहुए व्यासजीने कहा कि हे राजगण मैं पहलेही से जानताहूं कि धृतराष्ट्र के पुत्रोंने अधर्मसे तुमको निकाला है इसी लिये तुम्हारे परम मंगलके निमित्त यहां आयाहूं तुम उस विषय में दुःखी मतहो यह सब तुम्हारे सुख के लियेही होरहे हैं इस में संदेह नहीं कि धृतराष्ट्र के पुत्र और तुम लोग दोनोंपक्ष मेरेस्नेह के पात्र हो पर जो पक्ष दीन और बालकहोता है मानवगण उसपरही स्नेह प्रकट करते हैं सुनो इसी से मैं तुम्हारा हितकार्य करना चाहताहूं वोह सामने सुन्दर विनारोगका नगर दीख पडता है वहां हमारे लौटनेकी बाट देखतेहुए छिपकर बसे रहना । वैशम्पायन ने कहा कि सत्यवती पुत्र धर्मात्मा प्रभु व्यास पांडवों को भलीभांति ढाढसदेकर संग लेकर उस दिखाई देतीहुई एक चक्रानगरी को जानेलगे और कुंती सेभी फिर समझाकर कहा कि हे बेटी जीतीरहो तेरेपुत्र धर्मशील महात्मा पुरुषोत्तम धर्मराज युधिष्ठिर धर्मानुसार

with joined hands before him. Vyas said, " I already know, princes, that the sons of Dhritrashtra have driven you away unjustly. I have, therefore come for your good. Be not troubled at all. All things are being done to do you good. I love both you and the sons of Dhritrashtra. But people have a greater affection for the side which is weaker and younger. For this reason my love for you is greater and I wish to do you good, Yonder is a healthy quarter of the city. You may remain there concealed till my return," Vaishampayan said that Satyavati's son, the virtuous Vyas, having thus consoled the Pandavas, took them to the city of Ekchakra. In the way he again addressed Kunti and said, "Live long, daughter. Thy son the virtuous and just Yudhishthir shall conquer justly, the whole earth and shall rule over the princes of the world. By the help of Bhim and Arjun's

भीमसेनार्जुनबलाद्भोक्ष्यते नात्रसंशय ॥ १४ ॥ पुत्रास्तवचमाद्रयाश्च सर्वएवमहारथाः। स्वराष्ट्रे विहरिष्यन्ति सुखंसुमनसःसदा ॥ १५ ॥ यक्ष्यन्तिचनरव्याघ्रा निर्जित्य पृथिवीमिमाम् । राजसूयाश्वमेधाद्यैः क्रतुभिर्भूरिदक्षिणैः ॥ १६ ॥ अनुगृह्यसुहृद्वर्गं भोगैश्वर्य्यसुखेनच । पितृपैतामहं राज्यमिमेभोक्ष्यन्तितेसुताः ॥ १७ ॥ वैशम्पायन उवाच । एवमुक्त्वानिवेश्यैनान् ब्राह्मणस्यनिवेशने । अब्रवीत्पाण्डवश्रेष्ठमृषिर्द्वैपायन स्तदा ॥ १८ ॥ इहमासं प्रतीक्षध्वमागमिष्याम्यहं पुनः । देशकालौविदित्वैव लप्स्य ध्वंपरमांमुदम् ॥ १९ ॥ सतैःप्राञ्जलिभिः सर्वैस्तथेत्युक्तो नराधिप । जगाम भगवान्व्यासो यथागतमृषिःप्रभुः ॥ २० ॥

इत्यादिपर्वणि हिडिंबवध पर्वाणि व्यासदर्शने एकचक्रा प्रवेशे सप्तपञ्चाशदधिकशतो ऽध्यायः ॥ १५७ ॥ समाप्तश्च हिडिम्बवधपर्व ॥ अथ बकवध पर्व ॥

धरती मंडल को जयकरके पृथ्वीभर के सब भूपालों का शासन करेंगे इस में संदेह नहीं है कि वोह भीमसेन और अर्जुन के भुजबल से सागरतक भूमण्डल को जीत कर भोग करेंगे तुम्हारे महारथी पुत्र और माद्रीके कुमारगण सदा अपने राज्य में प्रसन्न मन होकर सुख से आनन्द करैंगे । यह राजसिंह गण धरती मंडलको जयकर राजसूय और अश्वमेध आदि अनेक बडी दक्षिणावाले यज्ञ करेंगे और भोग ऐश्वर्य तथा सुखसे मित्रवर्ग को कृपा दिखाकर परम आनन्द पूर्वक पितामहका राज्य भोगेंगे । २७ । वैशम्पायन ने कहा कि महर्षि द्वैपायन यह कहकर उनको एक ब्राह्मण के घर में बसाकर युधिष्ठिर से बोले कि तुम मेरेआने तक यहीं रहो मैं फिर आऊंगा तुम देशकाल को विचार कर काम करते रहोगे तो परम हर्ष प्राप्तकरोगे उन सबने हाथ जोड़कर उनकी बातमानली अनन्तर महर्षि भगवान व्यास जहां से आयेथे वहां चलेगये ॥ २० ॥

arms he is sure to conquer the whole world. Your sons and those of Madri will live joyfully in their country and shall perform Rajsuya and Ashwamedh sacrifices giving away large donations. And showing kindness to their friends they will cheerfully rule over the country of their fore fathers." Vaishampayan said that maharshi Dwaipayan lodged the Pandavas in the house of a Brahmen and said to Yudhishthir, "Wait for me here. I shall come again. If you will act with due consideration to time and place you will be happy in the end." The Pandavas promised to do as Vyas had desired them to do. The Rishi, then, went his own way.

जनमेजय उवाच । एकचक्रांगतास्तेतु कुन्तीपुत्रामहारथाः । अतऊर्ध्वंद्विजश्रेष्ठ किमकुर्वतपाण्डवाः ॥ १ ॥ वैशम्पायन उवाच । एकचक्रांगतास्तेतु कुन्तीपुत्रामहारथाः । ऊषुर्नातिचिरंकालं ब्राह्मणस्यनिवेशने ॥ २ ॥ रमणीयानिपश्यन्तो वनानि विविधानिच । पार्थिवानपिचोद्देशान् सरितश्चसरांसिच ॥ ३ ॥ चेरुर्भैक्षंतदातेतुसर्व एवविशाम्पते । बभूवुर्नागराणाञ्च स्वैर्गुणैःप्रियदर्शनाः ॥ ४ ॥ निवेदयन्तिस्मतदा कुन्त्याभैक्षंसदानिशि । तयाविभक्तान्भागांस्ते भुञ्जतेस्मपृथक्पृथक् ॥ ५ ॥ अर्द्धंते भुञ्जतेवीराः सहमात्रापरन्तपाः । अर्द्धंसर्वस्यभैक्ष्यस्य भीमोभुङ्क्तेमहाबलः ॥ ६ ॥ तथातुतेषांवसतांतस्मिन् राष्ट्रेमहात्मनाम् । अतिचक्राममहान् कालोऽथभरतर्षभ ॥ ७ ॥ ततःकदाचित्भैक्ष्याय गतास्तेपुरुषर्षभाः । सङ्गत्याभीमसेनस्तु तत्रास्तेपृथया सह ॥ ८ ॥ अथार्तिजंमहाशब्दं ब्राह्मणस्यनिवेशने । भृशमुत्पतितंघोरं कुन्तीशुश्राव

अध्याय १५८ ॥

जनमेजय ने कहा कि हे द्विज श्रेष्ठ इस के पश्चात् महारथी कुंती पुत्रोंने एक चक्रा नगरीमें रहकर क्या किया।१।वैशम्पायन ने कहा कि महारथी कुन्तीपुत्र एक चक्रानगरी में ब्राह्मण के घर कुछकाल वसे वे उन दिनों नित्य सुन्दर प्रदेश नदी और सरोवरोंको देखतेहुए शिक्षा पूर्वक वहांके सब स्थानोंमें घूमतेथे ।३। क्रमशः वे अपने गुण से नगरवालोंके प्रिय बने वे दिनको जो भिक्षा पाते थे वोह माताको देतेथे कुंती जब उनकी उस भिक्षा से मिलीहुई वस्तु को अलग २ वांटदेती थी तब वे भोजन करते थे भिक्षासे जो मिलताथा उसका आधा भाग युधिष्ठिर, अर्जुन, नकुल, सहदेव और कुन्ती यह सब मिलकर भोजन करते थे और आधाभाग महावली भीमसेन खातेथे ।६। हे भरत श्रेष्ठ ! महात्मा पांडवों को इसप्रकार वसतेहुए उसराज्यमें कुछसमयवीतगया अनन्तर एक दिन युधिष्ठिर आदि सब भिक्षाको गये दैवसे भीमसेन भिक्षाको न जाकर कुंतीके साथ घरमें रहे।८। अनन्तर कुंती ने उस ब्राह्मण के घर से रोनेकी आवाज सुनी । हेराजन् ! कुंती

CHAPTER CLVIII

Janmejaya said, "Tell me, O best of Brahmans, how the Pandavas passed their days when they were at Ekchakra." Vaishmpayan replied, "They stayed for some time in the house of a Brahman. They used to go out of the city, to see in the suburbs, the rivers, the lakes and the other places of interest and gained experience. Gradually he made many friends in the city. They presented to their mother what they got as alms during the day. Kunti set apart for each of them a share which they ate as supper. Bhim received half of it and the other half was distributed equally among Ydhishisthir, Arjun, Nakul, Sahdev and Kunti. They passed some days in this way. One day Yudhisthir

भारत ॥ ९ ॥ रोरूयमाणांस्तान् दृष्ट्वापरिदेवयतश्चसा । कारुण्यात्साधुभावाच्च कुन्ती राजन्नचक्षमे ॥ १० ॥ मथ्यमानेवदुःखेन हृदयेनपृथातदा । उवाचभीमंकल्याणी कृपान्वितमिदंवचः ॥११॥ वसामसुसुखंपुत्र ब्राह्मणस्यनिवेशने । अज्ञाताधार्त्तराष्ट्रस्य सत्कृतावीतमन्यवः ॥ १२ ॥ साचिन्तयेसदापुत्र ब्राह्मणस्यास्यकिन्वहम् । प्रियंकुर्या मितिगृहेयत् कुर्य्युरुषितांःसुखम् ॥ १३ ॥ एतावान्पुरुषस्तात कृतंयस्मिन्ननश्यति । यावच्चकुर्य्यादन्योऽस्य कुर्य्यादभ्यधिकंततः ॥ १४ ॥ तदिदं ब्राह्मणस्यास्य दुःखमापतितंध्रुवम् । तत्रास्ययदिसाहाय्यं कुर्य्यामुपकृतंभवेत् ॥ १५ ॥ भीमसेन उवाच । ज्ञायतामस्ययद्दुःखंयतश्चैव समुत्थितम् । विदित्वाव्यवसिष्यामि यद्यपिस्यात्सुदुष्करम् ॥ १६ ॥ वैशम्पायन उवाच । एवंतौकथयन्तौचभूयः शुश्रुवतुःस्वनम् । आर्त्तिजंतस्य विप्रस्य सभार्यस्यविशाम्पते ॥ १७ ॥ अन्तःपुरंततस्तस्य ब्राह्मणस्यमहात्मनः । वि-

---

उनको अत्यन्त रोते और विलाप करते सुनकर अच्छे स्वभावके कारण चुपचाप बैठी न रहसकी।१०।उसका हृदय दुःखसे पूरितहुआ तब कल्याणि कुंती भीमसेनसे करुणा भरी बातों में कहनेलगी कि बेटा हम धृतराष्ट्र के पुत्रों से छिपकर इस ब्राह्मण से सत्कार पाकर शोक रहितहोकर सुखसे बसरहेहैं।१२। इस से मैं सदा इस सोच में रहाकरती हूं कि जिसप्रकार दुर्वासा आदि महात्मा लोग जिसके घरमें बसते हैं उनकाकोई हितकार्य करते हैं वैसेही मैं इस ब्राह्मण का बदले में क्या उपकारकरूं उपकार के बदले में जो उपकार करता है वही पुरुष है और जो जितना उपकार करताहै बदलेमें उसका उससे अधिक उपकार करना चाहिये।१४।मुझको निश्चय जान पडताहै कि इस ब्राह्मणके घरमें कोई दुःख है और उस दुःख के दूर करने के लिये यदि उनकी कुछ सहायता करसकें तो उपकारका बदलाहोसक्ता है भीमसेन ने कहा कि इस ब्राह्मण का दुःख आप मालूम करें उसके जान लेनेपर यदि कठिनभी होगा तो उस के दूरकरने का प्रयत्नकरूंगा।१६। वैशम्पायनने कहा कि हे पृथ्वीनाथ ! जब वे इसप्रकार बात चीत कररहे थे उससमय

---

and others went out to collect alms. Bhimsen was with his mother. Kunti heard a sound of weeping from the Brahman's house. Being of good manners, Kunti could not hear their wailing silently. Her heart was moved with compassion and she said to Bhimsen, "By the fear of the sons of Dhritrashtra we live in concealment and peace in the house of this Brahman. Durbasa and other great men used to do good to the people in whose houses they dwelt. I have been thinking of how to recompense this good Brahman. One who repays one goodness by another is a man. Goodness must be recompensed by another and a greater one I believe the Brahman is in some sort of trouble. It would be but proper for us if we could assist and relieve

वेशत्वरिताकुन्ति बद्धवत्सेवसौरभी ॥ १८ ॥ ततस्तंब्राह्मणंतत्र भार्ययाचसुतेनच ।
दुहित्राचैवसहितं ददर्शावनताननम् ॥ १९ ॥ ब्राह्मण उवाच । धिगिदंजीवितंलोके
गतसारमनर्थकम् । दुःखमूलंपराधीनं भृशमप्रियभागिच ॥ २० ॥ जीवितेपरमंदुःखं
जीवितेपरमोज्वरः । जीवितेवर्त्तमानस्य दुःखानामागमोध्रुवः ॥ २१ ॥ आत्माह्येको
हिधर्मार्थौ कामंचैवनिषेवते । एतैश्चविप्रयोगोऽपि दुःखंपरमनन्तकम् ॥ २२ ॥ आहुः
केचित्परंमोक्षं सचनास्तिकथञ्चन । अर्थप्राप्तौतुनरकः कृत्स्नएवोपपद्यते ॥ २३ ॥
अर्थेप्सुतापरं दुःखमर्थप्राप्तौ ततोधिकम् । जातस्नेहस्यचार्थेषु विप्रयोगमहत्तरम् ॥ २४ ॥
नाहियोगंप्रपश्यामि येनमुच्येयमापदः । पुत्रदारेणवासार्द्धं प्राद्रवेयमनामयम् ॥ २५ ॥

फिर उस ब्राह्मण, ब्राह्मणी के रोनेकी आवाज सुनाई दी अनन्तर कुंतीने इसप्रकार वेग से कि जैसे कामधेनु अपने बँधेहुए बछडे के पास जाती है उस महात्मा ब्राह्मण के घर में जाकर देखा कि ब्राह्मण मलिन मुखकिये बैठाहै और स्त्री,पुत्र, कन्यासे कहताहै।१९। कि यह संसार केवल दुःखकी जड दूसरे का आधीन और अति हानिकारी है ऐसेव्यर्थ जीवन पर धिक्कार है जीनेहीसे परम दुःख और परमपीडा भोगनी पडती है जीतेहुए मनुष्य को निश्चयही दुःख घेरलेताहै।२१।एकही आत्मा धर्म, अर्थ और काम इनतीनोंकी एक दूसरे से विना विरोध किये सेवा नहीं करसक्ती और इनके बुराप्रयोग होनेसेही अनन्त दुःख आताहै।२२।कोई२ पंडित कहते हैं कि मोक्षही श्रेष्ठहै पर हम सब संसार केप्रेमी हैं हम से वोह किसीप्रकारहोनेकी सम्भावना नहीं है अर्थ पानेके विषय मेंभी सब प्रकार दुःख भोगना पड़ता है देखो उपार्जनकी चाह बडी दुःखदाई होती है उपार्जन हुआभी तो और एक दुःख भोगना पडता है क्योंकि प्राप्तकिये हुए धनपर स्नेह बढ जाताहै यदि किसीप्रकार वोह अर्थ नष्टहुआ तो पूर्वोक्त दुःखसेभी अधिक दुःख घेरलेता है।२४। ऐसाभी कोई उपाय नहीं दीखता कि इस विपत्ति से बचें अथवा स्त्री पुत्र लेकर

him from the trouble." Bhimsen replied, "First ascertain, mother, what sort of trouble he is in. On learning it I shall try to relieve him however difficult the task may be."

Vaishampayan said that during the course of their coversation, a cry, more heart-rending than before, was heard from the Brahman's house. As a cow runs to meet her tied calf, Kunti made haste to reach the Brahmana's house and saw that he was sitting with a mournful countenance and saying to his wife, son and daughter, "This world is the source of evil, tyranny and trouble. Fie, on such life which is full of misery and sorrows. A man while living is surely infested with troubles. One soul cannot serve Dharm, Arth, and Kam without hinderance and trouble comes from the ill-management of them. Some learned men say that moksh (freedom from world, is the best. But we

यतितंवैमयापूर्वं वेत्थब्राह्मणितत्तथा । क्षेमंयतस्ततोगन्तुं त्वयातुममनश्रुतम् ॥ २६ ॥ इहजाताविवृद्धास्मि पिताचापिममेतिवै । उक्तवत्यसिदुर्मेधे याच्यमाना मयासकृत् ॥ २७ ॥ स्वर्गतोऽपिपिता वृद्धस्तथा माताचिरंतव । बान्धवाभूतपूर्वाश्च तत्रवासेतुका रतिः ॥ २८ ॥ सोऽयंते बन्धुकामाया अश्रृण्वन्त्यावचोमम । बन्धुनणाशःसम्प्राप्तो भृशंदुःखकरोमम ॥ २९ ॥ अथवामद्विनाशोऽयं नहिशक्ष्यामिकश्चन । परित्यक्तुमहं बन्धुंस्वयं जीवन्नृशंसवत् ॥ ३० ॥ सहधर्मचरींदान्तां नित्यंमातृसमांमम । सखायं विहितांदेवैर्नित्यं परमिकांगतिम् ॥ ३१ ॥ पित्रामात्राचविहितांसदा गार्हस्थ्यभागि-नीम् । वरयित्वायथान्यायं मन्त्रवत्परिणीयच ॥ ३२ ॥ कुलीनांशीलसम्पन्नामपत्य जननीमपि।त्वामहंजीवितस्यार्थे साध्वीमनपकारिणीम् ॥ ३३ ॥ परित्यक्तुंनशक्ष्यामि

कहीं भाग जावें हे ब्राह्मणी ! स्मरण करो कि जहां २ मंगलहोता था मैं वहीं जाने का प्रयत्न करताथा उस समय तुम मेरी बातपर ध्यान नहीं धरतीथीं यह तुम्हारीही कुबुद्धि है कि जब मैंने बार २ दूसरे स्थानको जाना चाहा तभी तुमनेकहा कि यह मेरी पैतृक भूमिहै यहां मैं जन्मलेकर बूढीहुईहूं इसको त्याग नहींसक्ती।२७।प्यारी तुम्हारेपिता, माता और बान्धवों के स्वर्गवासको बहुत दिन बीतगए थे तिसपरभी तुमने क्यों यहां बसना चाहाथा तुमने जिस प्रकार बन्धुकी कामना से मेरी बातपर ध्यान नहीं दिया वैसेही अब तुम्हारे बन्धु नाश का समय आगया इससे मुझको बडा दुःख होरहाहै यहांतक कि इस समय मेराही नाश उपस्थित है क्योंकि मैं स्वयम् जीता रहकर किसी प्रकार बन्धु को त्याग नहीं सकूंगा तुम मेरी सहधर्मचारिणी नित्य माताकी समान स्नेह करनेवाली गुणवती और परमागतिहो देवोंने तुम्हें मेरेमित्र सदृश निश्चय करदियाहै।३१।पिता माताने तुम को गृहस्थ धर्म भागिनी बनायाहै और तुम कुलीना शीलवती सन्तानकी उत्पन्न करनेवाली साध्वी श्रम कारणी और सदा व्रतशीला भार्याहो पहले वरन पूर्वक यथा विधि तुम्हारा

पादपांश्चमहाकायां श्चूर्णयामासतुस्तदा ॥ २४ ॥ हीयमानन्तुतद्रक्षः समीक्ष्यपुरुषाद-कम् । निष्पिष्यभूमौजानुभ्यां समाजघ्नेवृकोदरः ॥ २५ ॥ ततोऽस्यजानुना पृष्ठमव पीड्यबलादिव । बाहुनापरिजग्राह दक्षिणेनशिरोधराम् ॥ २६ ॥ सव्येनचकटीदेशे गृह्यवासासिपाण्डवः । तद्रक्षोद्विगुणंचक्रे रुवन्तंभैरवंरवम् ॥ २७ ॥ ततोऽस्यरुधिरं वक्त्रात् प्रादुरासीद्विशाम्पते । भज्यमानस्यभीमेन तस्यघोरस्यरक्षसः ॥ २८ ॥

इत्यादिपर्वणि बकबधपर्वणि बकभीमयुद्धे

चतुःषष्ट्यधिकशततोऽध्यायः ॥ १६४ ॥

वैशम्पायन उवाच । ततःसभग्नपार्श्वाङ्गो नादित्वाभैरवंरवम् । शैलराजप्रतीकाशो गतासुरभवद्बकः ॥ १ ॥ तेनशब्देनवित्रस्तो जनस्तस्याथरक्षसः । निष्पपातगृहाद्रा-जनसहैवपरिचारिभिः ॥ २ ॥ तान्भीतान् विगतज्ञानान् भीमःप्रहरतांवरः । सान्त्व

बहुत थकनेलगा।२३।उन दोनों के वेगसे धरती हिली और निकटके बडेवृक्षटूटे अनन्तर वृकोदर राक्षस को बलखोते देखकर घुटनों से धरतीपर पीस२ कर मारने लगे।२५।फिर उसकी पीठपर घुटनों को लगाकर दहनेहाथसे गले को और बायें हाथसे कमरको पकडा और उसको दोटुकडे करडाला तब राक्षस घोरशब्द करने लगा जब भीमसेन ने विकट राक्षस को तोडा तब उसके मुंह से रक्त निकलने लगा ॥ २८ ॥

अध्याय १६५ ॥

वैशम्पायन ने कहा कि महाराज उस बडेभारी पहाड समान राक्षस बक ने देह टूटने पर बड़ा कोलाहलकरतेहुए प्राण छोडा उस के परिवार वाले उस शब्द से भय खाकर नौकर चाकरों सहित घरसे निकलकर भीमसेन के पासआये ।२। मारने में तेज महाबली भीमसेन ने उनको भयभीत और ज्ञान रहित देखकर समझाया और यह कह

shook and the trees were broken. Seeing the Rakshas lose his energy, Bhimsen began to press him with his knees. 25. Having thrown him on the ground he held his neck by the right and the waist by the left hand and broke his body into two pieces. The Rakshas then uttered a loud cry and died with a vomitting of blood. 28.

CHAPTER CLXV

Vaishampayan said that Bak died with a tremendous roar when his body, huge like a mountain, was broken. His kinsmen, alarmed at the cry, came out with servants from their house. 2. The valliant *Bhim*, seeing them frightened out of their senses, told them that they would be destroyed in the same way if they ever took the life of a human being and they promised to obey *Bhim*'s orders. From

यामासबलवान् समयेचन्यवेशयत् ॥३॥ नाहिंस्यामानुषाभूयो युष्माभिरितिकर्हिचित्। हिंसतांहिवधः शीघ्रमेवमेव भवेदिति ॥ ४ ॥ तस्यतद्वचनंश्रुत्वा तानिरक्षांसि भारत। एवमस्त्वितितं प्राहुर्ज्जगृहुःसमयश्चतम् ॥५ ॥ ततःप्रभृतिरक्षांसि तत्रसौम्यानिभारत। नगरेप्रत्यदृश्यन्त नरैर्नगरवासिभिः ॥ ६ ॥ ततोभीमस्तमादाय गतासुंपुरुषादकम्। द्वारदेशेविनिक्षिप्य जगामानुपलक्षितः ॥ ७ ॥ दृष्ट्वाभीमबलोद्धूतं बकंविनिहतंतदा। ज्ञातयोऽस्यभयोद्विग्नाः प्रतिजग्मुस्ततस्ततः ॥ ८ ॥ ततःसभीमस्तंहत्वागत्वा ब्राह्मणवेश्मतत्। आचचक्षेयथावृत्तं राज्ञःसर्वमशेषतः ॥९॥ ततोनराविनिष्क्रान्ता नगरात्कल्यमेवतु। ददृशुर्निहतंभूमौ राक्षसंरुधिरोक्षितम् ॥ १० ॥ तमद्रिकूटसदृशं विनिकीर्णमयानकम्। दृष्ट्वासंहृष्टरोमाणो बभूवुस्तत्रनागराः ॥ ११ ॥ एकचक्रांततोगत्वा प्रवृत्तिंप्रददुःपुरे। ततःसहस्रशो राजन्नरा नगरवासिनः ॥ १२ ॥ तत्राजग्मुर्बकंद्रष्टुं सस्त्रीवृद्धकुमारकाः। ततस्तेविस्मिताःसर्वे कर्मदृष्ट्वातिमानुषम्। दैवतान्यर्चयांचक्रुः

कर उनसे प्रतिज्ञा कराली कि तुम फिर कभी मनुष्य न मारना यदि मारोगे तो तुम को भी तुरन्त इसीप्रकार नष्ट होना पडेगा ।४।राक्षसोंने वृकोदरकी यहबात सुनकर उस नियम को मान लिया । हे भारत ! तब से नगरवाले उसनगर में राक्षसों को शान्त स्वभावी देखते थे ।६।अनन्तर भीमसेन उस मरेहुए राक्षस को लेकर नगर के द्वार पर डालकर लोगों के बिन देखे चलेआये राक्षस बककी जातिवाले भीमसेनसे बल पूर्वक उसको मारेजाते देखकर भय से चित्तको मलिनकर इधर उधरभागे ।८।भीमसेनने उस राक्षस राजको मारकर ब्राह्मण के घरमें जाकर आद्योपांत सम्पूर्ण वृत्तांत कह सुनाया । अनन्तर प्रातःकाल में नगरवासियों ने नगर से निकलतेही पर्वतकी चोटी की समान बडेभारी राक्षस बक को रक्त से नहाया और मराहुआ पडा देखकर रोमांचित हुए ।११। और एक चक्रा नगर में जाकर वोह समाचार सुनाया हे राजन् ! तब सहस्रों नगर वाले राक्षस बक को देखने के लिये एकत्रित हुए उन सब ने वोह अलौकिक कार्य देखकर आश्चर्य किया और सब लोग देवताओं की उपासना

that time the citizens had no cause of fear from them. 6. *Bhimsen* then dragged the corpse to the city gate and entered the city unseen. The kinsmen of the demon ran away in terror and dispersed. Having slain the demon, *Bhim* entered the Brahman's house and told all that had happened. At break of day, the citizens, coming out of the city gate, saw the huge Rakshas, big like a mountain lying blood stained and slain. 11. They published the happy news in the city. Thousands of citizens gathered to see the Rakshas. They wondred at the extraordinary deed and began to praise the gods. They then inquired amongst themselves as to

सर्वएवविशाम्पते ॥ १३ ॥ ततःप्रगणयामासुः कस्यवारोऽद्यभोजने। ज्ञात्वाचागम्य तंविप्रं पप्रच्छुःसर्वएवते ॥ १४ ॥ एवंपृष्टःसबहुशो रक्षमाणश्चपाण्डवान् । उवाचनागरान्सर्वा निदंविप्रर्षभस्तदा ॥ १५ ॥ आज्ञापितंमामशने रुदन्तंसहबन्धुभिः । ददर्शब्राह्मणः कश्चिन्मन्त्रसिद्धोमहामनाः ॥१६॥ परिपृच्छयासमांपूर्वं परिक्लेशंपुरस्यच। अब्रवीद्ब्राह्मणश्रेष्ठो विश्वास्यप्रहसन्निव॥१७॥ प्रापयिष्याम्यहंतस्मा अन्नमेतद्दुरात्मने । मन्निमित्तंभयंचापि नकार्य्यमितिचाब्रवीत् ॥ १८ ॥ सतदन्नमुपादाय गतोवकवनंप्रति । तेननूनंभवेदेतत्कर्म लोकहितंकृतम् ॥ १९ ॥ ततस्तेब्राह्मणाःसर्वे क्षत्रियाश्चसुविस्मिताः । वैश्याःशूद्राश्चमुदिताश्चक्रुर्ब्रह्ममहं तदा ॥ २० ॥ ततोजानपदाःसर्वे आजग्मुर्नगरंप्रति। तदद्भुततमंदृष्ट्वा पार्थास्तत्रैवचावसन् ॥ २१ ॥

इत्यादिपर्वणि वकवधपर्वणि वकवधे पञ्चषष्ठ्यधिकशततोऽध्यायः ॥ १६६ ॥
समाप्तश्च वकवधपर्व ॥ अथ चैत्ररथ पर्व ॥

करने लगे फिर वोह यह पूंछने लगे कि आज राक्षसको भोजन देनेकी किसकी बारीथी अन्तमें सब ठीक जानकर उस ब्राह्मण के पासजाकर विशेष समाचार पूंछा।१४।सम्पूर्ण नगर वालों के ब्राह्मण से बार २ पूंछने पर विप्रेंद्र ने पांडवों को छिपाने के लिये कहा कि मैं राक्षस को भोजन देने की आज्ञा पाकर बन्धुओं सहित रो रहा था उस समय एक मंत्र में सिद्ध महात्मा ब्राह्मणने मुझको उसदशा में देखकर पूंछा।१६।और इसनगर के घोर क्लेश के वृत्तान्त से ज्ञात होकर ठाठस देकर हँसते हुए मुझ से कहा कि मैं उस दुरात्मा के निकट यह अन्न लेजाऊंगा मेरे लिये कुछ भय न करना।१८।यह कहकर वोह अन्न लेकर राक्षस वक के वन में गये इस में सन्देह नहीं है कि उन्होंने ही लोगों के हित के निमित्त यह काम किया होगा यह सुनकर ब्राह्मण, क्षत्रिय, वैश्य, और शूद्र सबने अचरजमान और ब्रह्म महोत्सव किया । नगर वाले उस आश्चर्य लीला का वृत्तांत जानकर नगर को लौटगये और पांडवलोग वहीं बसे रहे ॥२१॥

whose turn it was to carry provisions to the *Rakshas* and having ascertained the fact they came to the brahman's house to know all about it.14.But to conceal the names of the Pandavas he said, "I was bewailing my unhappy lot when a great *Brahman* came to me and on learning the cause of my distress he smilingly offered to carry the provision to the *Rakshas* without danger to himself.18.I think he has killed the demon for the good of the people." Having heard this the people were satisfied and gave out entertainments in honour of the *Brahman*. The citizens returned to their respective houses and the Pandavas remained there.21.

जनमेजय उवाच तेतथापुरुषव्याघ्रा निहत्यबकराक्षसम् । अतऊर्ध्वंततोब्रह्मन किमकुर्वत पाण्डवाः ॥ १ ॥ वैशम्पायन उवाच॥तत्रैवन्यवसन् राजन्निहत्य बकराक्षसम् । अधीयानाःपरंब्रह्म ब्राह्मणस्य निवेशने ॥ २ " ततःकतिपयाहस्य ब्राह्मणःशंसितव्रतः । प्रतिश्रयार्थीतद्वेश्म ब्राह्मणस्याजगामह " ३ ॥ ससम्यक्पूजयित्वातं विप्रं विप्रर्षभस्तदा । ददौप्रतिश्रयंतस्मै सदासर्वातिथिव्रतः ॥ ४ ॥ ततस्तेपांडवाःसर्वेसह कुन्त्यानरर्षभाः । उपासाञ्चक्रिरेविप्रं कथयन्तंकथाःशुभाः ॥५॥ कथयामासदेशांश्च तीर्थानिसरितस्तथा । राज्ञश्चविविधाश्चर्य्यान्देशांश्चैव पुराणिच ॥ ६ ॥ सतत्राकथयद्विप्रः कथान्तेजनमेजय । पंचालेष्वद्भुताकारं याज्ञसेन्याः स्वयम्वरम् ॥ ७ ॥ धृष्टद्युम्नस्य चोत्पत्तिमुत्पत्तिश्च शिखण्डिनः । अयोनिजत्वंकृष्णाया द्रुपदस्यमहामखे॥ ८॥

अध्याय ॥ १६६ ॥

जनमेजय ने कहा कि हे ब्राह्मण मैं सुना चाहता हूं कि पुरुष सिंह पांडवों ने राक्षस बकके मारने के पीछे क्या किया । वैशम्पायनने कहा कि हे राजन् ! पांडव गण राक्षस बकको मार कर उस ब्राह्मणके घर में रहकर वेद पढ़ाकरते थे।२। कुछ दिन पीछे एक व्रत शील ब्राह्मण वसने के लिये उस ब्राह्मण के घर आये नित्य अतिथियोंकी सेवा करने वाले ब्राह्मणने उसब्राह्मणकी भलीभाँति पूजाकर वसनेको घरदिया।४। वोह अभ्यागत द्विज वहां टिककर वातों में भाँति २ की अच्छी कथाएं कहने लगा नरश्रेष्ठ पांडव गण और कुंती ने वोह सब कथायें सुनने के अभिलाषी होकर उसका आदर किया वोह भांति २ के आश्चर्य नगर तीर्थ, सरोवर, देश और राजों के वृत्तांत और नानानगरोंकी कथा सुनाने लगा।६।हेजनमेजय उस ब्राह्मण ने कथा पूरी होने पर पांचाल देशमें याज्ञसेनी के अलौकिक स्वयम्वर में धृष्टद्युम्न तथा शिखंडी का जन्म और राजा द्रुपद के महायज्ञ में कृष्णाकी उत्पत्ति इन सब वातोंका वर्णन किया ।८। पुरुश्रेष्ठ पांडवगणने ब्राह्मणसे उन महात्माओं

CHAPTER CLXVI

Janmejayu said, "I wish to know, O *Brahman*, all that the Pandavs, the lions among men, did after killing the Rakshas." Vaishampayan replied that the Pandavas were engaged there in the study of the Vedas. A few days after, a vow-observing brahman came to live there. The brahman, who was a perpetual entertainer of guests received him with great respect and gave him a house to live in. The new comer used to tell many stories, in the course of his conversation. The Pandavas and Kunti, desirous of hearing his stories, went to him. He gave them an account of wonderful countries, cities, rivers, lakes and kingdoms. 6. At the end of his story he informed them of the election of a bride groom, in a strange manner, by Yagyaseni, the births of Dhrishtdyumn and Shikhandi and the birth of

तदद्भुततमंश्रुत्वालोके तस्यमहात्मनः । विस्तरेणैवपप्रच्छुः कथान्तेपुरुषर्षभाः ॥ ९ ॥ पाण्डवा ऊचुः । कथं द्रुपदपुत्रस्य धृष्टद्युम्नस्यपावकात् । वेदीमध्याच्चकृष्णायाःसम्भवः कथमद्भुतः ॥ १० ॥ कथंद्रोणान् महेष्वासात् सर्वाण्यस्त्राण्यशिक्षत । कथंविप्रसखायौ तौभिन्नौकस्यकृतेनवा ॥ ११ ॥ वैशम्पायन उवाच । एवंतैश्चोदितोराजन् साविप्रः पुरुषर्षभैः । कथयामासतत्सर्वं द्रौपदीसम्भवंतदा ॥ १२ ॥

इत्यादिपर्वणि चैत्ररथपर्वणि द्रौपदीसम्भवेषष्ठ षष्ट्यधिकशततोऽध्यायः ॥ १६६ ॥

ब्राह्मण उवाच । गङ्गाद्वारंप्रति महान्वभूवर्षिर्महातपाः । भरद्वाजोमहाप्राज्ञः सततं शंसितव्रतः ॥ १ ॥ सोऽभिषेक्तुंगतोगङ्गां पूर्वमेवागतांसतीम् । ददर्शाप्सरसंतत्र घृताचीमाप्लुतामृषिः ॥ २ ॥ तस्यावायुर्नदीतीरे वसनंव्यहरत्तदा । अपकृष्टाम्बरांदृष्ट्वा

की अलौकिक लीलाओं को सुनकर कथा अंतहोनेपर सबको प्रसस्तरूपसे सुनना चाहा। ९। और कहा कि हे विप्र ! अग्नि से क्योंकर द्रुपद कुमार धृष्टद्युम्न की उत्पत्ति हुई क्यों कर वेदीमें से कृष्णाका अद्भुत जन्म हुआ धृष्टद्युम्नने बड़े चापधारी आचार्य द्रोण से सब अस्त्रोंकी शिक्षा कैसे पाई और राजा द्रुपद से द्रोणकी मित्रता कैसे टूटी। वैशम्पायन ने कहा कि हे राजन् ! पुरुषों में प्रधान पांडवों से यह बात सुनकर वोह ब्राह्मण द्रौपदी की जन्म कथा कहने लगा ॥ १२ ॥

अध्याय ॥ १६७ ॥

ब्राह्मणने कहा कि गंगाद्वार के निकट भारद्वाज नामक सदा व्रतशील महाप्राज्ञ, महा तपस्वी एक महर्षि थे एक समय उन्हों ने गंगा नहानेको जाकर देखा कि उन के आनेसे पहिले घृताची अप्सरा आकर नदीतटपर खड़ीहै।२।उस समय पवन से उसका वस्त्र उड़ने पर ऋषि उसको नंगी देखकर उसी क्षण काम के वश में होगये कौमार दशा

Krishna at the great sacrifice of king Drupad. The Pandavas desiring to learn in detail the wonderful incidents put the following questions to him, saying, "How was Dhrishtdyumn born? How did Krishna come out of the sacrificial fire? How did Dhrishtdyumn the mighty archer learn the use of weapons from Dronacharya? And, how was Drona's friendship with Drupad broken?" Vaishampayan said that having heard this from the Pandavas he gave the following description of the birth of Draupadi.12.

CHAPTER CLXVII

The *Brahman* said that near the bank of the Ganges, there lived a great *Rishi*, vow observing, wise and ascetic, named *Bharadwaj*. One day, going to bathe in the Ganges, he saw Ghritachi the apsara standing at the bank. Her dress being raised by air, she was seen

तामृषिश्चकमेतदा ॥ ३ ॥ तस्यांसंसक्तमनसः कौमारब्रह्मचारिणः । चिरस्यरेतश्चस्कन्द तदृषिर्द्रोणआदधे ॥ ४ ॥ ततःसमभवद्द्रोणः कुमारस्तस्यधीमतः । अध्यगीष्टसवेदांश्च वेदाङ्गानिचसर्वशः ॥५॥ भरद्वाजस्यतुसखा पृषतोनामपार्थिवः । तस्यापिद्रुपदोनाम तदासमभवत्सुतः ॥ ६ ॥ सनित्यमाश्रमं गत्वाद्रोणेन सहपार्षतः । चिक्रीडाध्ययनं चैवचक्रारक्षात्रियर्षभः ॥ ७ ॥ ततस्तुपृषतेऽतीते सराजाद्रुपदोऽभवत् । द्रोणोऽपिरामं शुश्रावदित्सन्तंवसुसर्वशः ॥ ८ ॥ वनन्तुप्रस्थितंरामं भरद्वाजसुतोऽब्रवीत् । आगतं वित्तकामंमांविद्धि दोणंद्विजोत्तम ॥ ९ ॥ रामउवाच । शरीरमात्रमेवाद्य मयासमवशेषितम् । अस्त्राणिवाशरीरं वाब्रह्मन्नेकतमंवृणु ॥ १० ॥ द्रोण उवाच । अस्त्राणि चैव सर्वाणि तेषांसंहारमेवच । प्रयोगञ्चैव सर्वेषांदातुमर्हतिमे भवान् ॥ ११ ॥

से ब्रह्मचारी उस महर्षि का चित्त घृताची पर चलतेही उन का सदा का रक्षाकियाहुआ वीर्य गिरगया उन्होंने उसको उसीक्षण द्रोणनामक पात्रमें रखलिया इसप्रकार उसधीमान् ऋषिसे द्रोणनामक कुमारने जन्म लिया वोहकुमार सम्पूर्ण वेद और वेदांगको पढनेलगा।५। उससमय पृषत् नामक राजा भरद्वाजका मित्रथा उसका पुत्र द्रुपदहुआ वोह क्षत्रिय, पृषत्पुत्र द्रुपद नित्य भरद्वाजके आश्रममें जाकर द्रोणके साथ खेलता और पढ़ताथा,फिर राजा पृषत्के स्वर्गको सिधारनेपर द्रुपद राजाहुआ द्रोणने सुना कि परशुरामजी अपना सब धन दान कर रहे हैं फिर जब राम सब कुछ देकर वनमें जाने को उद्यत हुए तब भरद्वाज पुत्रने वहांजाकर कहा कि हेद्विजोत्तम मेरानाम द्रोणहै मैं धनकी अभिलाषासे आपके पास आयाहूं रामने कहा कि हेब्रह्मन् ! मैं सब कुछ दान करचुकाहूं अबमेरा शरीर और अस्त्र ही शेषहै अतएव चाहै मेरे अस्त्र वा शरीर इन दोनोंमें से एक की प्रार्थना करो द्रोणने कहा कि आप प्रयोग और उपसंहार के साथ सम्पूर्ण अस्त्र मुझको देदें ।११। अनन्तर भृगुनन्दन

naked by the Rishi, who was at once smitten with desire. Celibate from his early days the rishi's long protected semen dropped down as soon as his heart inclined towards *Ghritachi*. He put it at once in a vessel called Drona. From this the boy Drona was born and he began to study the Vedas and the branches. In those days, king Prishat had friendship with *Bharadwaj*. His son was named Drupad who came every day to the hermitage to read and play with Drona. Durpad became king after his father's death. Drona heard that Parashuram was giving away all his wealth. When he had given away his all, Drona reached there and said, "My name is Drona. I have come, O best of Brahmans, for wealth." *Ram* replied, "*I have give away all. My body and the weapons are the only things left. Choose one of the two.*" Drona said, "Give me all your weapons with the method of using them." *Ram* gave him up all the weapons and Drona con-

ब्राह्मण उवाच । तथेत्युक्त्वाततस्तस्मै प्रददौभृगुनन्दनः । प्रतिगृह्यतदाद्रोणः कृतकृत्यो ऽभवत्तदा॥१२॥संप्रहृष्टमनाद्रोणो रामात्परमसम्मतम् । ब्रह्मास्त्रंसमनुज्ञाप्य नरेष्व भ्यधिकोऽभवत् ॥ १३ ॥ ततोद्रुपदमासाद्य भारद्वाजःप्रतापवान् । अब्रवीत्पुरुषव्या घ्रःसखायं विद्धिमामिति ॥ १४ ॥ द्रुपद उवाच । नाश्रोत्रियःश्रोत्रियस्य नारथी रथिनःसखा । नाराजापार्थिवस्यापि सखिपूर्वंकिमिष्यते ॥ १५ ॥ ब्राह्मण उवाच । साविनिश्चित्यमनसा पांचाल्यंप्रतिबुद्धिमान् । जगामकुरुमुख्यानां नगरंनागसाह्वयम् ॥ १६ ॥ तस्मैपौत्रान्समादाय वसूनिविविधानिच । प्रायच्छद्दौभीष्मः शिष्यान् द्रोणायधीमते ॥ १७ ॥ द्रोणः शिष्यांस्ततः पार्थानिदंवचनमब्रवीत् । समानीयतुतान् शिष्यान्द्रुपदस्यासुखायवै ॥१८॥ आचार्य्यवेतनं किंचिद्धृदि यद्वर्त्ततेमम । कृतास्त्रै-स्तत्प्रदेयं स्यात्तदृतंवदतानघाः । सोऽर्जुनप्रमुखैरुक्तस्तथास्त्विति गुरुस्तदा ॥ १९ ॥

ने तथास्तु कहकर उनको सब अस्त्र देदिये । द्रोणने उनको लेकर अपने को कृतार्थ समझा।१२।वह रामसे परमसम्मत ब्रह्मास्त्र पाकर और सब अस्त्रों के पानेसे अधिकप्रसन्न हुए अनन्तर प्रतापी पुरुषेन्द्र भरद्वाज नन्दनने द्रुपदके पास आकरकहा।१४।कि मैं तुम्हारा मित्र हूं द्रुपद ने उत्तर दिया कि जो श्रोत्रिय नहीं है वोह कभी श्रोत्रिय का मित्र नहीं होसक्ता जो रथी नहीं है वोह कभी रथी का मित्र नहीं होसक्ता और जो स्वयम् राजा नहीं है वोह कभी राजा का मित्र नहीं होसक्ता । अतएव तुम क्यों मुझको मित्र कहतेहो द्रोण ने पांचाल राजकी यह बात सुनकर मनही मनमें बदलालेनेका निश्चय किया और कौरवों के हास्तिनपुर नामक नगर को गये । अनन्तर भीष्म ने उन आये हुए द्रोणका शिष्य पौत्रों को बनाया और नानाधन देकर उनका आदर किया अनन्तर द्रोण ने द्रुपदकी हानि के लिये शिष्य पांडवों को बुलाकरकहा कि हेनिष्पाप राजकुमारो।१८।सत्यकर बोले कि तुम्हारे अस्त्रविद्या में पंडितहोनेपर तुम वो गुरु दक्षिणा दोगे कि जिसके लिये मैंने

sidered himself fortunate on receiving them. He was overjoyed by his possession of the Brahmastra above all other weapons. The glorious son of Bharadwaj then came to Drupad and said, "I am your friend." Drupad replied, "A scholar of the Vedas cannot contract friendship with one who is not so; a chariotless man cannot be the friend of a charioteer; likewise, one who is not a king can not be the friend of a king. Why do you call me a friend?" At these words of the king, Drona, intending to revenge himself on Drupad, went to Hasthinapur the city of the Kauravas. Bhishma intrusted to him the training of his grand children and gave him great wealth. Drona, intending to harm Drupad, called his disciples together and said, "Princes, promise to give me the thing which I have set my mind on, at the completion of your learning.

यदाचपांडवाःसर्वे कृतास्त्राःकृतनिश्चयाः। ततोद्रोणोऽब्रवीद्भूयो वेतनार्थमिदंवचः २०॥ पार्षतोद्रुपदोनाम छत्रवत्यांनरेश्वरः। तस्मादाकृष्यतद्राज्यं ममशीघ्रंप्रदीयताम् ॥ २१॥ ततःपाण्डुसुताःपञ्च निर्जित्यद्रुपदंयुधि । द्रोणायदर्शयामासुर्बद्धा ससचिवंतदा ॥ २२ ॥ द्रोण उवाच । प्रार्थयामित्वयासख्यं पुनरेवनराधिप। अराजाकिलनोराज्ञः सखाभावितुमर्हति ॥ २३ ॥ अतःप्रयतितंराज्ये यज्ञसेनत्वयासह राजासिदक्षिणेकूले भागीरथ्याहमुत्तरे ॥ २४ ॥ ब्राह्मण उवाच । एवमुक्तोहिपाञ्चाल्यो भारद्वाजेन धीमता। उवाचास्त्रविदांश्रेष्ठो द्रोणंब्राह्मणसत्तमम् ॥ २५ ॥ एवंभवतुभद्रन्ते भारद्वाज महामते। सख्यंतदेवभ तु शश्वद्यदभिमन्यसे ॥ २६ ॥ एवमन्योन्यमुक्त्वातौ कृत्वा सख्यमनुत्तमम् । जग्मतुर्द्रोणपाञ्चाल्यौ यथागतमरिन्दमौ ॥ २७ ॥ असत्कारःसतु

मन में निश्चय किया है उसको अर्जुन आदि शिष्यों ने तथास्तु कहकर मान लिया। जब प्रण किये हुए पांडवों ने अस्त्र विद्या को भलीभांति सीखलिया तब आचार्य द्रोण ने उन से गुरु दक्षिणा के लिये यह कहा।२०। कि द्रुपद नामक राजा पृषत्के पुत्र अहिच्छत्र के अधीश से शीघ्र उसका राज्य छीन कर मुझको देदो अनन्तर पांडवों ने द्रुपदको युद्ध में परास्त कर के मंत्रियों सहित बांधकर द्रोण की भेट किया।२२। तब द्रोणने द्रुपद से कहा कि हे नरनाथ ! मैं फिर तुम से मित्रता चाहता हूं पर इस समय मैं राजा हूं तुम राजा नहीं हो राजा न होने से राजाकी मित्रता नहीं होसक्ती इस लिये तुम्हारे साथ एकत्रित राज्यकरने में यह निश्चय किया है कि तुम भागीरथी के दक्षिण देशके राजा होओ और मैं उत्तर देशका राजाहूं।२४। ब्राह्मणने कहाकि तब पांचालराज ने अस्त्र विद्या में पंडित द्विजवर धीमान् द्रोणकी यह बातसुनकर कहा कि हे महामति भारद्वाज तुम्हारा मंगलहोवे तुम ने जैसा समझ लियाहै वहीहो मेरेसाथ तुम्हारी मित्रता बनी रहे।२६। शत्रुनाशी द्रोण और राजापांचाल एक दूसरेसे ऐसा कहकर अनुत्तम मित्रता निश्चय कर

the use of weapons." Arjun and others consented to it. When they had learnt well the art of war, the preceptor Drona demanded of them his fee and said, "Take by force of arms the kingdom of Drupad the son of Prishat and king of Ahichatra, and give it to me." The Pandavas brought king Drupad and his ministers prisoner and presented them to Drona.22."I court your friendship again." said Drona to Drupad, "At this time I am a king and you are none. One not a king can not be friend of a king. I have, therefore, resolved to rule the kingdom jointly with you. I shall rule the country North of the Ganges and you South." The king of Panchal heard this from the great warrior Drona and said, "May you be happy, *Bharadwaj*. Let it be as you have proposed. Let us be friends for ever."26. Drona the destroyer of enemies and the king of Panchal,

महान्मुहूर्त्तमपितस्थतु । नापैतिहृदयाद्राज्ञो दुर्मनाःसकृशोऽभवत् ॥ २८ ॥

इत्यादिपर्वणि चैत्ररथपर्वणि द्रौपदीसम्भवे

सप्तषष्ट्यधिकशततोऽध्यायः ॥ १६७ ॥

ब्राह्मण उवाच । अमर्षीद्रुपदोराजा कर्मसिद्धान्द्विजर्षभान् । अन्विच्छन्परिचक्राम ब्राह्मणावसथान्बहून् ॥ १ ॥ पुत्रजन्मपरीप्सन्वै शोकोपहतचेतनः । नास्ति श्रेष्ठमपत्यंमे इतिनित्यमचिन्तयत् ॥ २ ॥ जातानपुत्रान्स निर्वेदाद्धिगबन्धूनिति चाब्रवीत् । निःश्वासपरमश्चासीद्रोणं प्रतिचिकीर्षया ॥ ३ ॥ प्रभावंविनयंशिक्षां द्रोणस्य चरितानिच । क्षात्रेणचबलेनास्य चिन्तयन्नाध्यगच्छत ॥ ४ ॥ प्रतिकर्त्तुंनृपश्रेष्ठो यतमानोऽपिभारत । अभितःसोऽथकल्माषीं गङ्गाकूलेपरिभ्रमन् ॥ ५ ॥ ब्राह्मणावसथंपुण्यमाससाद महीपतिः । तत्रनास्नातकःकश्चिन्न चासीदव्रतीद्विजः ॥ ६ ॥ तथैव

निज २ स्थानको चले गये पर राजाद्रुपद के मन से वह बड़ा अपमान क्षणभरके लिये दूर नहीं हुआ वह उसके सोचमें अति दुःखी और दुबले होने लगे । २८ ।

अध्याय ॥ १६८ ॥

ब्राह्मण ने कहा कि राजाद्रुपद दुःख और शोकसे विकलहोकर योग्य पुत्र पानेकी अभिलाषा से कर्म में सिद्ध अच्छे ब्राह्मणोंको ढूंढतेहुए एक आश्रम से दूसरे में जाने लगे यह चिन्ता कि मेरे अच्छी सन्तान नहीं है उनके हृदय में सदा रहती थी।२। वोह अपने अनादर के कारण अपने पुत्रों और मित्रों को धिक्कार करतेहुए द्रोणका बदला लेने के लिये सदा लम्बी सांस छोडा करते थे वोह बदला लेनेको चाहने परभी सोचकर निश्चय नहीं करसके कि क्षत्रिय बलसे क्योंकर द्रोण के प्रभाव, नम्रता, शिक्षा और चरित्र से बढसक्ते हैं ।४। अनन्तर गंगाके किनारे घूमते हुए कल्माषपाद राजाकी पुरी के निकट ब्राह्मणों के पास जापहुँचे वहां के सब ब्राह्मण स्नातक, व्रतशील और महाभाग थे। ६ । उन

---

having thus contracted friendship with each other, separated. But Drupad did not, for a moment, frogive Drona. He began to be lean with grief.28.

CHAPTER CLXVIII

The *Brahman* said that king Drupad dismayed with grief began to wander from one hermitage to another in search for a good a *Brahman* who should help him in getting a worthy offspring. Being insulted himself, he always heaved long sighs and losing all regard for his sons and ministers he thought only of revenge on Drona. He could not make up his mind as to how to excel Drona in glory, humility, training and deeds by his Kshatrya strength.4. At length wandering in the territories of king Kalmashpad, by the bank of the Ganges, he reached a holy place where Brahmans were

चगङ्गाभागः सोऽपश्यत्संसितव्रतौ । याजोपयाजौब्रह्मर्षी शाम्यन्तौपरमोष्ठिनौ ॥ ७ ॥ संहिताध्ययनेयुक्तौ गोत्रतश्चापिकाश्यपौ । तारणेयौयुक्तरूपौ ब्राह्मणावृषिसत्तमौ ॥ ८ ॥ सतावामन्त्रयामास सर्वकामैरतन्द्रितः । बुद्धावलंतयोस्तत्र कनीयांसमुपाहरे ॥ ९ ॥ प्रपेदेच्छन्दयन् कामैरुपयाजंधृतव्रतम् । पादशुश्रूषणेयुक्तः प्रियवाक्सर्वकामदः ॥ १० अर्चयित्वा यथान्यायमुपयाजमुवाचसः । येनमेकर्मणाब्रह्मन् पुत्रःस्याद्द्रोणमृत्यवे । उपयाजकृतेतस्मिन् गवांदातास्मितेऽर्बुदम् ॥ ११ ॥ यद्वातेऽन्यद्द्विजश्रेष्ठ मनसःसुप्रियंभवेत् । सर्वंतत्तेप्रदाताहं नहिमेऽत्रास्तिसंशयः ॥ १२ ॥ इत्युक्तोनाहिमित्येवं नमृषिःप्रत्यभाषत । आराधयिष्यन् द्रुपदः सतंपर्य्यचरत्पुनः ॥ १३ ॥ ततःसम्वत्सरस्यान्तेद्रुपदं सद्विजोत्तमः । उपयाजोऽब्रवीत्काले राजन्मधुरयागिरा ॥ १४ ॥ ज्येष्ठो

में याज और उपयाज नामक, व्रतशील, शमगुणी, ब्रह्म प्रेमी, संहिता पाठ में नियुक्त काश्यप गोत्रवाले ऋषियों में श्रेष्ठ दो ब्रह्म ऋषियों को देखकर उनको इच्छा नुरूप कार्य पूरा करने के योग्य समझा फिर वोह आलस्य को छोडकर सम्पूर्ण कामनाओं से उनकी उपासना करने लगे ९।अनन्तर उन दोनों को शक्तिमान जानकर एकान्तमें उनकी शरणली और सम्पूर्ण कामकी वस्तुओं का लोभ दिखा पांवदाब मीठी बातकह अभिलाषापूरी करने आदि उपायोंसे उस व्रतशील उपयाज को प्रसन्नकरनेलगे।१०।एक समय द्रुपद ने विधि पूर्वक उपयाजकी पूजा कर कहा कि हे ब्रह्मन् ! यदि आप यह कर्म करें कि जिस से मेरेद्रोणनाशी पुत्र का जन्महो तो मैं आपको एक अर्बुद गौ दूंगा । हे द्विज श्रेष्ठ यदि आपको और वस्तुकी अभिलाषाहो तो इस में संदेह नहीं है कि उसेभी पूरा करदूंगा।१२।ऋषिने कहा कि मैं यह काम नहीं करसकूंगा द्रुपद इसपरभी उस ऋषिकी उपासनाके लिये फिर सेवा करनेलगा अनन्तर एक वर्ष बीतने पर द्विजोत्तम उपयाजने राजाद्रुपद से मीठी बातोंमें कहा।१४।कि एकसमय मेरेबड़े भाई ने घने बन में चलतेहुए

living. All the residents of that place were holy, vow observing and fortunate. Seeing amongst them two Brahmans of the family of Kashyap, named Yaj and Upyaj, the best of Brahmarshis, he was certain of his success through them. He began to please them with diligence. 10. At length finding the younger one the abler of the two, he sought his protection. He tried to please Upyaj by good words, attendance and promises. Durpad, one day, said to Upyaj, " I shall give you a million of cows, if you help me in getting a son that should destroy Drona and shall give you any thing you desire over and above them." 12. The Rishi replied, " I shall not be able to do this thing." In spite of this reply Drupad continuedto attend upon him. After a year Upyaj was pleased to say to the king, " My elder brother, once, picked up a fruit from a place which

भ्रातामामाशृङ्गाद्विचरन् गहनेवने । अपरिज्ञातशौचायां भूमौनिपतितंफलम् ॥ १५ ॥ तदपश्यमहं भ्रातुरसाम्प्रतमनुव्रजन् । विमर्षंसंकरादाने नायंकुर्य्यात्कदाचन ॥ १६ ॥ दृष्ट्वाफलस्य नापश्यद्दोषान् पापानुबन्धकान् । विनिनक्तिनशौचंयः सोऽन्यत्रापिक-थंभवेत् ॥ १७ ॥ संहिताध्ययनंकुर्वन् वसनगुरुकुलेचयः । भैक्ष्यमुत्सृष्टमन्येषां भुङ्क्तेस्मचयदातदा ॥ १८ ॥ कीर्त्तयनगुणमन्नानामघृणीच पुनःपुनः । तंवैफलार्थिनं मन्ये भ्रातरंतर्कचक्षुषा ॥ १९ ॥ तंवैगच्छस्वनृपतेसत्वां संयाजयिष्यति । जुगुप्स-मानोनृपतिर्मनसेदं विचिन्तयन् ॥ २० ॥ उपयाजवचःश्रुत्वा याजस्याश्रममभ्यगात् अभिमम्पूज्यपूजार्हमथ याजमुवाचह ॥ २१ ॥ अयुतानिददाम्यष्टौ गवांयाजयमां

ऐसे स्थान से गिराहुआ फल उठा लिया जिसको वोह नहीं जानते थे कि पवित्र है वा नहीं मैंने पीछे आतेहुए इस अयोग्य कामको देखा । हे राजन् ! उन्हों ने उसदोष युक्त वस्तु के लेने में कोई विचार नहीं किया उस फलको देखतेही उसके पापयुक्त दोषकी समझ उनकी बुद्धि में एकवारभी नहीं आई ।१६।अतएव जिन्हों ने एकस्थान में शौचका विचार नहीं किया वोह अन्य स्थान में क्योंकर दोष दर्शी होसक्तेहैं अर्थात् वोह तुम्हारे अभीष्ट विषय में दोष नहीं देखपावेंगे जब वोह गुरुकुलमें रहकर संहिता पढतेथे तब बहुधा औरोंकी जूठी वस्तुभी खालेतेथे इसमें उनको घृणा नहींथी।।१८।वोह सदा अन्नही का गुण गायाकरते थे उनके इसप्रकार कामोंको देखनेसे मैं तर्करूपी आंखों से उनको फलार्थी समझरहाहूं हेमहाराज तुम उनकेपास जाओ वोह तुम्हारे याजनकार्यकरनेमेंसम्मत होंगे राजाद्रुपद याजके चारित्रको सुन निन्दाकरनेकी इच्छाहोनेपरभी मनही मन में अपने कार्य के शोचमें उपयाज के कहनेपर उनके आश्रम को गये वहां पहुँचकर पूजनीय याजको पूज कर सब प्रकार कहा कि हे विभो मैं आपको अस्सी सहस्र गौदान करूंगा

he did not know whether it was clean or not. I was coming behind and so I could see him do this improper deed.16 He did not hesitate in taking the objectionable thing without ever thinking of the impropriety of the deed. For this reason, he who did not think of purity once, may not think of it on another occasion. I mean that he will not be able to find out the flaw in your case. When he was reading the Vedas in the house of his preceptor he often used to eat things left by others without disgust.18.He always used to praise the food. By these signs I infer that you will succeed with him. Go to him. He will perform your work," King Drupad in spite of the disgust which he felt on hearing the deeds of Yaj, thought of his own business and went to his hermitage. On reaching there he paid his respect to Yaj and said, "I shall give you eighty thousands of cows as fee for the intendend sacrifice.

विभो । द्रोणवैराभिसन्तप्तं प्रह्लादयितुमर्हसि ॥ २२ ॥ सहिब्रह्मविदांश्रेष्ठो ब्रह्मास्त्रे चाप्यनुत्तमः । तस्मात्द्रोणःपराजैष्ट मांवैससखिविग्रहे ॥ २३ ॥ क्षत्रियोनास्तितस्या स्यां पृथिव्यांकश्चिदग्रणीः । कौरवाचार्य्यमुख्यस्य भारद्वाजस्यधीमतः ॥२४ ॥ द्रोण स्यशरजालानि प्राणिदेहहराणिच । षडरत्निधनुश्चास्य दृश्यतेपरममहत् ॥ २५ ॥ सहिब्राह्मणवंशेण क्षात्रंवगमसंशयम् । प्रतिहन्तिमहेष्वासो भारद्वाजोमहामनाः ॥२६ क्षत्रोच्छेदायविहितो जामदग्न्यइवास्थितः । तस्यह्यस्त्रबलं घोरमप्रधृष्यंनरैर्भुवि ।२७। ब्राह्मंमन्धारयंस्तेजो हुताहुतिरिवानलः । समेत्यसदहत्याजौ क्षात्रधर्मपुरःसरः ॥२८॥ ब्रह्मक्षत्रेचविहिते ब्राह्मंतेजोविशिष्यते । सोहंक्षात्राद्बलाद्धीनो ब्राह्मंतेजःप्रपेदिवान ॥ २९ ॥ द्रोणाद्विशिष्टमासाद्य भवन्तंब्रह्मवित्तमम् । द्रोणान्तकमहंपुत्रं लभेयंयुधि

आप मेरा याजन कार्य करै मैं द्रोण की शत्रुता रूपी आगसे जल रहाहूं आप कृपारूपी जलसे सींचकर मुझको शीतलकरें।२२। द्रोण ब्रह्मविद्या और ब्रह्मास्त्र दोनों में दक्षहै इस लिये मित्रताकी लड़ाई में मुझको परास्त किया है वोह बुद्धिमान कौरवों का प्रधान आचार्य है।२४। इसभूमंडल में कोई क्षत्रिय उन से श्रेष्ठ नहीं है उनका धनुष बहुत बड़ाहै उनका बाणजाल सर्व जीवों को नाश करसक्ता है इस में संदेह नहीं है किवोह महानुभव भरद्वाज ब्राह्मण के वंश में बडे चापधारी होकर क्षत्रिय तेजका नाशकररहे हैं।२६। वोह क्षत्रिय नाशने के लिये मानो दूसरे परशुरामबने हैं इस पृथ्वी भरमें कोई भी उन के कठोर अस्त्र को हटा नहीं सक्ता वोह आहुति युक्त प्रज्वलित अग्निकी भांति ब्रह्मतेज के साथ क्षत्रिय तेज को मिलाकर शत्रुको जलादेते हैं उनका ब्राह्म तेज क्षत्रिय तेजसे मिलकर श्रेष्ठहोने परभी आपका ब्राह्म तेज उनसे श्रेष्ठ है और केवल क्षत्रिय बलधारी मैं उनसे हीन बनाहूं।२९।अतएव मैं आपको जो द्रोणसे श्रेष्ठहैं और वेदज्ञानीहैं प्राप्तहोकर आप के ब्रह्मतेजकी शरण लेताहूं हेयाज ऐसा कामकरो कि मैं लड़ाई में जयके अयोग्य

I am burning with the fire of Drona's enmity and request the favour of your kindly quenching it by your kindness.22.Drona is very dexterous in the use of Brahmastra and the knowledge of Brahma and has defeated me in the battle for friendship. He is wise and the chief preceptor of the Kurus.24.No Kshatrya is more mighty than the Kauravas. They have their bows six yards long and can destroy every creature by their arrows. He is indeed born in the Brahman family to destroy Kshatrya glory.26.He is a destroyer of Kshatryas like Parashuram. No one in the world can excel him. By his glory like the fire fed by libations of butter, assisted by Kshatrya power, he can destroy every enemy. But your glory to superior is his, which is assisted by Kshatrya power .My power alone is insufficient to cope with him..29,You are

दुर्जयम् ॥ ३० ॥ तत्कर्मकुरुगेयाज वितराम्यर्बुदंगवाम्।तथेत्युक्त्वातुतंयाजो याज्या थमुपकल्पयत् ॥ ३१ ॥ गुर्वर्थइतिचाकाममुपयाजमचोदयत् । याजोद्रोणविनाशाय प्रतिजज्ञेतथाचमः ॥ ३२ ॥ ततस्तस्य नरेन्द्रस्य उपयाजोमहातपाः । आचख्यौकर्म वैतानं तदापुत्रफलायवै ॥ ३३ ॥ सचपुत्रोमहावीर्यो महातेजामहाबलः । इष्यतेयद्विधो राजन्भवितातेतथाविधः ॥ ३४ ॥ भारद्वाजस्यहन्तारं सोऽभिसन्धायभूपतिः । आजहेतत्तथासर्वं द्रुपदःकर्मसिद्धये ॥ ३५ ॥ याजस्तुहवनस्यान्ते देवीमाज्ञापयत्तदा। प्रेहिमांराज्ञिपृषतिमिथुनंत्वामुपस्थितम् ॥ ३६ ॥ राज्युवाच । अवलिप्तंमुखं ब्रह्मन् दिव्यानगन्धानविभर्मिच । सुतार्थेनोपलब्धास्मि तिष्ठयाजमगमिष्ये ॥ ३७ ॥ याज

और द्रोणनाशी पुत्र पामकूं आपको दसकरोड गौदानकरने को प्रस्तुतहूं याज तथास्तु कहकर यज्ञके प्रयोगके विषय में मनही मन में ध्यान करनेलगे ।३१।और उस कार्य को कठिन जानकर निष्काम उपयाज से सहायता करने को कहा महर्षि याज ने जब द्रोण नाश के लिये प्रतिज्ञाकी तब महात्मा उपयाज ने नरेन्द्र द्रुपद से उनके पुत्र फलके लिये श्रौताग्नि साध्यकर्म की कथा कह सुनाई और कहा कि हे द्रुपद तुम जैसे तपस्वी और बलवीर्यवन्त पुत्रकी कामनाकरोगे तुमको वैसाही पुत्रमिलेगा।३४।अनन्तर भूपाल द्रुपदने द्रोणनाशी पुत्रपानेकी युक्ति निश्चयकर कार्य साधने के लिये उस यज्ञके योग्य सम्पूर्ण सामग्री एकत्रित करदी तब उन्होंने यज्ञआरम्भ किया।३५ हवनके होजानेपर याजने रानी को यह आज्ञादी कि हेरानी पृषत् राजवधू तुम हवि लेनेके लिये शीघ्र मेरेपासआओ तुम्हारे पुत्र और कन्या उपस्थित हैं।३६।रानीने कहा कि हेब्रह्मन् ! मेरा मुँह कुंकुमादि गन्ध के पदार्थों से पूरित है अंगरागोंसे भी भूषित हूं सो सन्तानके लिये यज्ञकी हवि लेनेको मैं अभी अशुचि हूं अतएव मेरेअभीष्ट पुत्र के लिये आप कुछकाल विलंब करें मैं शुचि हो

superior to Drona and a scholar of the Vedas. I, therefore, come under your protection. Help me to get a son unconquerable in battle and able to destroy Drona. I am ready to offer you ten crores of cows." Yaj agreed to his request and thought about the management of the sacrifice. Finding the task difficult he sought the help of the disinterested Upyaj. The great Upyaj hinted to him the proper way to get a son. He said to Draupad, "You will get by this method as powerful a son as you desire."35. At length king Drupad having ascertained the method of gaining his desire, made preparations for the sacrifice. At the end of it Yaj said to the queen, "Come soon to me, Queen and daughter-in-law of king Prishat, to receive the fruit. A son and a daughter are ready for you."36. The queen replied, "My mouth is full of scented articles and am decked with ornaments. I am, therefore, not in a fit state

उवाच । याजेनश्रपितंहव्यमुपयाजाभिमन्त्रितम् । कथंकामंनसन्दध्यात् सात्वंविप्रोह तिष्ठुना ॥ ३८ ॥ ब्राह्मण उवाच । एवमुक्त्वातुयाजेन हुतेहविषिसंस्कृते । उत्तस्थौ पावकात्तस्मात् कुमारोदेवसन्निभः ॥ ३९ ॥ ज्वालावर्णोघोररूपः किरीटीवर्मचोत्तमम् । बिभ्रत्सखड्गःसशरो धनुष्मानविनदन्मुहुः ॥ ४० ॥ सोऽध्यारोहद्रथवरं तेनचप्रययौ तदा । ततःप्रणेदुःपञ्चालाः प्रहृष्टाःसाधुसाध्विति ॥ ४१ ॥ हर्षाविष्टांस्ततश्चैतान्नेयं सेहेवसुन्धरा । भयापहोराजपुत्रः पञ्चालानांयशस्करः ॥ ४२ ॥ राज्ञःशोकापहोजात एषद्रोणवधायवै । इत्युवाच महद्भूतमदृश्यं खेचरंतदा ॥ ४३ ॥ कुमारीचापिपांचाली वेदीमध्यात् समुत्थिता । सुभगादर्शनीयाङ्गी स्वसितायतलोचना ॥ ४४ ॥ श्यामा पद्मपलाशाक्षी नीलकुञ्चितमूर्द्धजा । ताम्रतुङ्गनखी सुभ्रूश्चारुपीनपयोधरा ॥ ४५ ॥

आतीहूं३७याजने कहा कि हवनके पदार्थ उपयाज से मंत्रयुक्तहोकर याजके द्वारा पकाये गये हैं तुम चाहे आओ या न आओ अवश्यही उस से कामना पूरी होगी याज ने यह कहकर अग्नि से संस्कार किये हुए हव्यकी आहुति ज्योंही दी तभी उस अग्नि से ज्वाला वर्ण भीमाकृति सुन्दर कवच युक्त धनुष बाण धारी और देव सदृश एक कुमार उत्पन्न हुआ वोह कुमार जन्म लेतेही वार२ सिंह गर्जन करता हुआ प्रधान रथपर चढगया।४०। और उस रथ पर इधर उधर जानेलगा यह देख कर पांचाल लोग आनंदित होकर साधु साधु कह कर ऐसा चिल्लाये कि मानो धरती उन हर्ष युक्त पांचालों का भार संभाल ने को असमर्थ होगई तब आकाश वाणी हुई कि इस राजकुमार ने द्रोणवध के लिये जन्म लिया है यह पुत्र पांचालों का यशबढाने वाला भयनाशी और राजा का दुःख दूरकरने वाला होगा ।४३। फिर वेदीके मध्य से पंचाल राजकुमारी सौभाग्यवती श्यामांगी एक कुमारी निकली उस कन्या के अंगों की शोभा बहुत सुंदर दोनों आंखेंनीली चौड़ी और

to receivethem. Wait a little, till I purify myself." Yaj replied," The materials of sacrifice have been cooked by me according to the method pointed out by Upyaj and will bearf ruit whether you come or not .Having said,this Yaj poured down into the fire the materials purified by fire. And as soon as the libation was poured a boy of the colour of fire, dreadful visage, decked with beautiful coat of mail and bow, and god like came out. As soon as the boy was born he roared like a lion and having mounted a chariot began to drive it in different directions. The Panchals on seeing him raised a loud cry of joy and seemed as if the earth were unable to bear their weight.41A voice was then heard from heaven, saying, "This prince is born to kill Drona. He will increase the power of the Panchals, will destroy their fear and will alleviate the grief of the king.43."Then came out from the altar the princess of Panchal. Her limbs were symmetrical, eyes blue and

मानुषंविग्रहं कृत्वामाक्षादपरवर्णिनी । नीलोत्पलसमो गन्धो यस्याःक्रोशात् प्रधावति ॥ ४६ ॥ याबिभर्त्तिपरंरूपं यस्यानास्त्युपमा भुवि । देवदानवयक्षाणामीप्सितां देव रूपिणीम् ॥ ४७ ॥ तांचापिजातां सुश्रोणीं वागुवाचाशरीरिणी । सर्वयोषिदरा कृष्णा निनीषुः क्षत्रियान् क्षयम् ॥ ४८ ॥ सुरकार्यमियं काले करिष्यति सुमध्यमा । अस्या हेतोः कौरवाणां महद्भयं भविष्यति ॥ ४९ ॥ तच्छ्रुत्वासर्वपांचालाः प्रणेदुःसिंहसंयवत् । नचैतान्हर्षसम्पूर्णा नियंसेहेवसुन्धरा ॥ ५० ॥ तौदृष्ट्वापार्षतीयाजं प्रपेदेवैसुतार्थिनी । नवैमदन्यांजननींजा नीयातामिमाविति ॥ ५१ ॥ तथेत्युवाचतंयाजो राज्ञःप्रियचिकीर्षया । तयोश्चनामनी चक्रुर्द्विजाः सम्पूर्णमानसाः ॥ ५२ ॥ धृष्टत्वादत्यमर्षित्वाद्युम्न द्युत्सम्भवादपि । धृष्टद्युम्नः

पद्म पलाश के समान केश काल और घुंघुराले नख ऊंचे और और तामे के रंगके दाना भौंहें बड़ी शोभा देनेवाली, स्तन बड़े और शोभा युक्त उसकी शोभा देख कर समझ पड़ती थी कि मानों साक्षात् देव कन्या मानवी के स्वरूप में प्रकट हुई थी उसकी नील पद्म समान देहकी गंध कोस भर तक पहुँचने लगी वोह देव रूपिणी कन्या ऐसी अनुपम रूपवती थी कि देव, दानव, यक्ष आदि भी उसकी प्रार्थना करें।४७।उस सुंदरी कन्या के जन्म लेने पर भी आकाश वाणी हुई कि यह कृष्णा सम्पूर्ण नारियों में श्रेष्ठ और बहुत क्षत्रिय कुलों का नाश चाहनेवाली होगी इस सुंदरी से उचित समय पर देवताओं का कार्य पूराहोगा इसके कारणही कौरवोंमें बडाभय उपस्थितहोगा।४९सम्पूर्ण पांचाल यह सुनकर हर्ष से सिंहकी नाई ऐसी ध्वनि करनेलगे कि मानो धरती उन हर्षित पांचालोंका भार संभालने को असमर्थ हुई । पुत्र चाहने वाली राजा द्रुपद की रानी ने पुत्र और कन्या को देखकर याज के पास जाकर कहा कि आप ऐसा करें कि यह पुत्र और कन्या मेरे अतिरिक्त किसी दूसरी को माता करके न जानसके।५१।याजने राजाके प्रिय कार्य

large like lotus petals, hair black and curly, nails raised and of the colour of copper, eyebrows beautiful and breasts large and beautiful. Her beauty was such as to make her look like a god's daughter in the form of a human being. A scent like that of blue lotus extended a mile on all sides. She was so beautiful as to be an object of desire for gods, demons, and Yakshes.47. Again a voice from heaven was heard, saying, "This girl will be the best of women and the cause of destruction of many a Kshatrya family. In time she will be able to perform the work of a god. She will cause much fear among the Kauravas." The Panchals roared like lions so loudly as to show that the earth would not be able to support their weight. The Queen, seeing the son and the daughter, approached Yaj and said, "Be pleased to introduce me to them as their mother. The Brah-

कुमारीयं द्रुपदस्यभवात्विति ॥ ५३ ॥ कृष्णेत्येवाब्रुवन्कृष्णां कृष्णाभूत्साहि वर्णतः । तथातान्मिथुनंजज्ञे द्रुपदस्यमहामखे ॥ ५४ ॥ धृष्टद्युम्नन्तुपांचाल्यमानीय स्वंनिवेशनम् । उपाकरोदस्त्रहेतोर्भारद्वाजः प्रतापवान् ॥ ५५ ॥ अमोक्षणीयंदैवंहि भाविमत्वामहामतिः । तथातत्कृतवान्द्रोण आत्मकीर्त्यनुरक्षणात् ॥ ५६ ॥

इत्यादिपर्वणि चैत्ररथपर्वणिद्रौपदी संभवे अष्टषष्ट्यधिक शतोऽध्यायः ॥ १६८ ॥

॥ वैशम्पायन उवाच । एतच्छ्रुत्वातुकौन्तेयाः शल्यविद्धाइवाभवन् । सर्वेचास्वस्थमनसोबभूवुस्ते महाबलाः ॥ १ ॥ ततःकुन्तीसुतान्दृष्ट्वा सर्वांस्तद्गतचेतसः । युधिष्ठिर

करने के लिये तथास्तु कहा फिर ब्राह्मणों ने सफल मनोरथ होकर कहा कि द्रुपदका यह कुमार धृष्ट अर्थात् विपक्षियोंकी उन्नति न सहनेवाला और द्युम्न अर्थात् कवच कुंडल आदि के साथ उत्पन्नहुआ है सो इसका नाम धृष्टद्युम्नहुआ।५३।और यह कुमारी काली हुईहै सो इसका नाम कृष्णा हुआ राजा द्रुपद के महा यशसे ऐसे पुत्र औरकन्या की उत्पत्ति हुईथी अनन्तर प्रतापी भारद्वाज द्रोण ने पांचाल पुत्र धृष्टद्युम्न को अपने घर में लाकर अस्त्रोंकी शिक्षा देकर पहिले लिये हुए आधे राज्यके लेने के बदले में उपकार किया महामति द्रोण ने यह समझकर कि दैवीबात उल्लंघन के योग्य नहीं है अपनी कीर्तिकी रक्षाके लिये ऐसा कार्य किया ॥ ५६ ॥

अध्याय १६९ ॥

वैशम्पायन ने कहा कि अनन्तर महाबली पांडवगण यह वृत्तांत सुनकर शूली से विंधेजानेकी भांति दुःखीहुए सत्य कहनेवाली कुंती ने पुत्रों को बेचैन देखकर युधिष्ठिरसे

mans. Being successful in their enterprise, said, "This son of king Drupad is, *Dhrisht*, not bearing the greatness of enemies, and *Dyumn*, born with coat of mail and earrings. His name will, therefore be *Dhrishtdyumn* 53. This girl is black and will be named Krishna. This son and daughter are born to Drupad by his good fortune." The glorious Bharadwaj *Drona* then took Dhrishtdyumn home with him and gave him education in arms in return for half the kingdom which he had taken before from his father. The wise *Drona* thinking that the decree of fate could not be altered, had done this for the sake of his glory.56.

CHAPTER CLXIX

Vaishampayan said that having heared this account the Pandavas became distressed as if they were pierced by the point of

ब्रुवाचेदं वचनंसत्यवादिनी ॥ २ ॥ कुन्त्युवाच। चिररात्रोषिताःस्मेह ब्राह्मणस्यनिवेशने । रममाणाःपुरेरम्ये लब्धभैक्षामहात्मनः ॥ ३ ॥ यानीहरमणीयानि वनान्युपवनानिच । सर्वाणितानिदृष्टानि पुनःपुनरारिन्दम ॥ ४ ॥ पुनर्द्रष्टुंहितानीह प्रीणयन्तिननस्तथा । भैक्ष्यञ्चनतथावीर लभ्यतेकुरुनन्दन ॥ ५ ॥ तेवयंसाधुपंचालान् गच्छामयदिमन्यसे । अपूर्वदर्शनंवीर रमणीयंभविष्यति ॥ ६ ॥ सुभिक्षाश्चैवपंचालाः श्रूयन्तेशत्रुकर्षन । यज्ञसेनश्चराजासौ ब्रह्मण्यइतिशुश्रुम ॥७॥ एकत्रचिरवासश्च क्षमोनचमतोमम । तेतत्रसाधुगच्छामो यदित्वंपुत्रमन्यसे ॥ ८ ॥ युधिष्ठिर उवाच। भवत्यायन्मतंकार्य्यं तदस्माकंपरंहितम् । अनुजांस्तुनजानामि गच्छेयुर्नेतिवापुनः ॥ ९ ॥ वैशम्पायन उवाच । ततःकुन्तीभीमसेन मर्जुनंयमजौतथा। उवाचगमनंतेच तथेत्येवा-

कहा ।२। कि हमको इसब्राह्मण के घर रहतेहुए बहुत दिनहोगये इस सुन्दरनगरमें महात्माओं से भिक्षा लेकर खेल कूद में काल गँवाया यहां जितने सुन्दरबन और उपवनहैं वोह सब कईवार देख लिये।४।अब उन स्थानोंकी फिर देखनेकी प्रीति नहीं होती और एक स्थान में रहने से वैसीभिक्षा मिलनेकीभी सम्भावना नहीं रहती । अतएव यदि तुम चाहो तो हम सुखसे पांचाल देशको जायँ वोह स्थान पहिले नहीं देखा है उस के देखनेसे सुख प्राप्तहोगा ।६। हे शत्रुनाशी ! सुना है कि पांचाल देश अन्नसे भराहुआ है और वहांका राजा यज्ञसेनभी ब्रह्मपरायण है एक स्थान में सदा रहनाभी मेरा अभीष्ट नहीं है और उचितभी नहीं है यदि तुम चाहो तो हम उसस्थानको सुख पूर्वक चलें।८। युधिष्ठिर ने कहा कि तुम्हारी जैसी इच्छा होगी वैसाही करेंगे और वही हमारे लिये मंगलदाई होगी और यह मालूम नहीं कि भाई लोग क्या चाहते हैं । वैशम्पायन ने कहा कि अनन्तर कुंती ने जब भीम, अर्जुन, नकुल और सहदेवसे वहां जानेकी इच्छा

stake. The truthful Kunti seeing her sons sad at heart said to Yudhishthir, " We have been long in the house of this Brahman. We have passed our days in fun at the expense of the good residents of this beautiful city. We have seen, more than once, all the places of interest(4)and shall feel no pleasure in seeing them again. We cannot get food for ever here. Let us go to the country of Panchal. We have not seen the place before and shall feel pleasure by seeing it.6. We have heard that the country is full of corn and its king Yagyasen, is kind to brahmans. I donot, moreover, wish to live in one place for ever nor, it is proper for us. We shall go there if you desire."8. Yudhishthir replied, " I am ready to do your bidding. It is always for our good. I donot know the inclination of brothers." Vaishampayan said that Kunti then asked Bhim, Arjun, Nakul and Sahadev if they wanted to go there and they all agreed.

ब्रुवंस्तदा ॥ १० ॥ तत्आमन्त्र्यतंविप्रं कुन्तीराजन्सुतैःसह । प्रतस्थेनगरींरम्यां द्रुपदस्यमहात्मनः ॥ ११ ॥

इत्यादिपर्वणि चैत्ररथपर्वणि पांचालदेशयात्रायां
ऊनषष्ट्यधिकशततोऽध्यायः ॥ १६९ ॥

वैशम्पायन उवाच । वसत्सुतेषुप्रच्छन्नं पाण्डवेषुमहात्मसु । आजगामाथतान्द्रष्टुं व्यासःसत्यवतीसुतः ॥ १ ॥ तमागतमभिप्रेक्ष्य प्रत्युद्गम्यपरन्तपाः । प्रणिपत्याभिवाद्यैनं तस्थुःप्राञ्जलयस्तदा ॥ २ ॥ समनुज्ञाप्यतात्सर्वानासीनान्मुनिरब्रवीत् । प्रच्छन्नंपूजितःपार्थैः प्रीतिपूर्वमिदंवचः ॥ ३ ॥ अयिधर्मेणवर्त्तध्वं शास्त्रेणचपरन्तपाः अयिविप्रेषुपूजावः पूजार्हेषुनहीयते ॥ ४ ॥ अथधर्मार्थवद्वाक्य मुक्त्वासभगवानृषिः विचित्राश्चकथास्तास्ताः पुनरेवेदमब्रवीत् ॥ ५ ॥ व्यास उवाच । आसीत्तपोवने का

पूछी तब उन्होंनेभी स्वीकार किया अनन्तर कुंती और उसके बेटे ब्राह्मण से मिलकर महात्मा भूपाल द्रुपदके नगरको गये ॥ ११ ॥

अध्याय ॥ १७० ॥

वैशम्पायन ने कहा कि जब महात्मा पांडवलोग ब्राह्मण के घरमें छिपकर बसतेथे तब एक दिन सत्यवती के पुत्र व्यासजी उनसे मिलने को आये शत्रुनाशी पांडवगण उन को आते देखकर उठकर प्रणाम दण्डवतपूर्वक दोनोंहाथ जोडकरखडेरहे फिर उनकीआज्ञा से वे सब बैठगये उन्होंने उनसे पूजे जाकर प्रीति पूर्वक यह कहा।३।कि हे शत्रुनाशियो तुम धर्म मार्ग में रहकर धर्मानुसार अपनी जीविका करलेते हो और पूजनीय ब्राह्मणोंको पूजतेहो ? अनन्तर भगवान कृष्ण द्वैपायन धर्मार्थयुक्त बहुतभाँतिकी विचित्रकथायें कहकर फिर यह कहनेलगे ।५। कि एक तपोबन में किसी महात्मा ऋषिकी एक कन्याथी उसकी कमर पतली और और भौंह अच्छीथी और वोह बडी सुन्दरी और सबगुणों से सुहावनी

Kunti and her sons then took leave of the Brahman and went to the beautiful capital of Drupad.11.

CHAPTER CLXX

Vaishampayan said that when the Pandavas were living in concealment in the house of the Brahmen, Satyavati's son Vyas came one day to them. The Pandavas respectfully stood up with joined hands at seeing him and then sat down with his permission. Being respected by them he asked affectionately, " Do you get your living in a lawful manner ? Do you pay respect to worthy Brahmans?" 4. After telling them many stories he said, " There was a hermit's daughter living in a forest. She was of slender waist, good eyebrows, great beauty and many good qualities. But she was unfortnnate on account of her own actions in previous life. She

चिष्टेषः कन्यामहात्मनः । त्रिलग्नमध्यामुश्रोणी सुभ्रूःसर्वगुणान्विता ॥ ६ ॥ कर्मभिः स्वकृतैःसातु दुर्भगासमपद्यत । नाध्यगच्छतपतिंसातु कन्यारूपवतीसती ॥ ७ ॥ ततस्तप्तुमथारेभे पत्यर्थमसुखाततः । तोषयामासतपसा साकिलोग्रेणशङ्करम् ॥ ८ ॥ तस्याःसभगवांस्तुष्टस्तामुवाच यशस्विनीम् । वरंवरयभद्रंते वरदोऽस्मीतिशङ्करः ॥ ॥ ९ ॥ अथेश्वरमुवाचेदमात्मनः सार्वकामिकम् । पतिंसर्वगुणोपेतमिच्छामीति पुनः पुनः ॥ १० ॥ तामथप्रत्युवाचेदमीशानो वदतांवरः । पंचतेपतयोभद्रे भविष्यन्ती तिभारताः॥ ११ ॥ एवमुक्त्वाततःकन्या देवंवरदमब्रवीत् । एकमिच्छाम्यहंदेव त्वत्प्रसादात् पतिंप्रभो ॥ १२ ॥ पुनरेवाब्रवीद्देव इदंवचनमुत्तमम् । पञ्चकृत्वस्त्वया ह्युक्तःपतिंदेहीत्यहंपुनः ॥ १३ ॥ देहमन्यद्गतायास्ते यथोक्तंतद्भविष्यति । द्रुपदस्य कुलेजज्ञेसाकन्या देवरूपिणी । निर्दिष्टाभवतांपत्नी कृष्णापार्षत्यनिन्दिता ॥ १४ ॥ पाञ्चालनगरेतस्मान्निवसध्वं महाबलाः । सुखिनस्तामनुप्राप्य भविष्यथनसंशय ।१५।

थी ऋषि कन्या अपनेकर्मवश अभागी हुई थी सती और रूपवती होनेपरभी पति नहीं मिला।७।अनन्तर वोह चित्त में दुःख मानकर पति पानेके लिये तपकरने लगी फिर कडी तपस्यासे भगवान् शंकरको संतुष्ट करने पर शंकर ने प्रसन्नहोकर कहा कि हेभद्रे ! मैं शंकर तुमको वर देनेको उद्यतहुआहूं वरमांगो।९।तुम्हारा मंगलहोगा ऋषि कन्याने अपने हित के निमित्त ईश्वर से बार २ कहा कि मैं सबगुणों से भूषित पति मांगती हूं वाक् पति ईशान ने कहा कि हेभद्रे तुमको पांच भरतवंशी पति मिलेंगे कन्या ने वरदाता महादेवजीकी यह बात सुनकर कहा कि हे देव, हेविभो मैं आपकी कृपा से एकही पति मांगतीहूं।१३।तब देव देवने कहा कि तुमने पांचबार मुझसे कहा कि पति दो इस लिये दूसरे जन्म में तुम्हारे पांचपति होंगे हेभरतकुल भूषण ! उस कन्या ने इनदिनों द्रुपदकुल में जन्म लियाहै देवकन्या समान अनन्दनीया कृष्णानामवाली वह द्रौपदी तुम्हारी पत्नी बना चाहतीहै।१४।सो अब तुम पांचाल नगर में जाकर वहां टिकेरहो।हे महाबली पांडवो

could not get a husband for all her beauty and chastity.7. With a distressed heart she began to practice severe penance to get a husband. She pleased the god Shankar who asked what she wanted and said that he was ready to grant her request.9. The Rishi's daughter, several times, said to him that she wanted a good husband. The lord Ishan, thereupon told her that in her next life she would get five men of the *Bharat* family for her husbands. The girl respectfully said that she wanted only one husband.12. But he replied that as she had repeated her request for a husband five times she should get five. The girl is now born in the house of Drupad and is waiting to become your wife.14. You must go to the country of Panchal, and stay there. You shall be happy on

एवमुक्त्वामहाभागःपांडवानां सपितामहः।पार्थानामन्त्र्यकुंतीं च प्रतिष्ठतमहातपाः।१६।
इत्यादिपर्वणि चैत्ररथपर्वणि द्रौपदीजन्मांतरकथने सप्तत्यधिक शतोऽध्यायः॥१७०॥

वैशम्पायन उवाच। गतेभगवतिव्यासे पाण्डवाहृष्टमानसाः। तेमतस्थुःपुरस्कृत्य मातरंपुरुषर्षभाः॥ १॥ आमंत्र्य ब्राह्मणं पूर्वं प्रतिवात्रानुमान्य च। समैरुदङ्मुखैर्मार्गैर्यथोद्दिष्टं परन्तपाः। तेतत्रगच्छन्नहोरात्रात्तीर्थतांसोमाश्रयायणम्॥ २॥ आसेदुः पुरुषव्याघ्रा गङ्गायांपाण्डुनन्दनाः। उल्मुकन्तु समुद्यम्य तेषामग्रेधनञ्जयः॥ ३॥ प्रकाशार्थंयथौतत्र रक्षार्थंच महारथः। तत्रांगाजलरम्ये विविक्तेक्रीड यनास्त्रियः। ईष्युर्गन्धर्वराजोवै जलक्रीडामुपागतः॥ ४॥ शब्दंतेषांसमुश्रुत्य नदीं समुपसर्पताम्। तेनशब्देनचाविष्टश्चुक्रोध बलवद्बली॥ ५॥ सदृष्ट्वापाण्डवांस्तत्रसह मात्रापरन्तपान्। विस्फुरयन्धनुर्घोरं मिदंवचनमब्रवीत्॥ ६॥ सन्ध्यासंरज्यते

तुम निःसंदेह उस कृष्णाको पाकर सुखपाओ ऐसे पांडवों के दादा महातपस्वी महाभाग व्यास देव पृथा और पार्थो से यह कहकर चलेगये॥ १६॥

अध्याय १७१॥

वैशम्पायन ने कहा कि भगवान् व्यास के चलेजाने पर पुरुष श्रेष्ठ शत्रुनाशी पांडव गण ब्राह्मण का नमस्कार पूर्वक सत्कार करके प्रसन्न चित्तसे माताके पीछे पांचाल नगर की ओर चले वे अपने उद्देश्यके अनुसार सीधे उत्तरकी ओर चलकर सोमाश्रयननामक तीर्थ में जापहुँचे जहां भगवान् चन्द्रशेखर विराजते हैं।२। वहां दिन बीचने पर महारथी धनंजय पथ दिखाने और रक्षाके लिये एक जलती हुई लकड़ी उठाकर आगे २ चले फिर पुरुष व्याघ्र पांडवलोग गंगातट पर पहुँचे वहां ईर्षासे भराहुआ एक गंधर्वराज जल क्रीडा के लिये आकर सुंदर भागीरथी के जलमें स्त्रियों के संग निराले में खेल रहाथा।४। पांडवगण उस नदी में उतर रहे थे कि उस महाबली गंधर्वराज को उनका शब्द मिला और वोह क्रोध से जलसे निकला अनन्तर शत्रुनाशी पांडवों को माताके साथ आते देख

---

finding Krishna." The grandfather of the Pandavas Maharshi Vyas, then took leave of Pratha and her sons and went away. 61.

CHAPTER CXXI

Vaishampayan said that after the departure of maharshi Vyas, the brave Pandavas respectfully said good bye to the Brahman and followed their mother to the country of Panchal with joyful hearts. Going directly Northward they reached the holy Somashrayan, the residensce of Chandrashekhar. 2. At the close of the day the brave Arjun went before them with a lighted wood to light the way and for protection. At length they approrahed the bank of the Ganges where a hot-tempered Gandharva was revelling in water with women. The Pandavas were crossing the river when the Gandharva heard their voice and came out of water in anger. Seeing

घोरापूर्वरात्रागमेषुया । अशीतिभिर्लवैर्हीनं तन्मुहूर्त्तंप्रचक्षते ॥ ७ ॥ विहितंकामचाराणां यक्षगन्धर्वरक्षसाम् । शेषमन्यन्मनुष्याणां कर्मचारेषुवैस्मृतम् ॥ ८॥ लोभात् प्रचारंचरतस्ता सुवेलासुवैनरान् । उपक्रान्तान्निगृह्णीमो राक्षसैःसहबालिशान् ॥ ९ ॥ अतोरात्रौपामवतो जलंब्रह्मविदोजनाः । गर्हयन्तिनरानसर्वान् बलस्थान्नृपतीनापि ॥ १० ॥ आगात्तिष्ठतमामह्यं समीपमुपसर्पत । कस्मात्मांनाभिजानीत प्राप्तंभागीरथीजलम् ॥ ११ ॥ अंगारपर्णगन्धर्वं वित्तमांस्वबलाश्रयम् । अहंहिमानीचैर्षुश्च कुवेरस्य प्रियःसखा ॥१२॥ अङ्गारपर्णमित्येवं ख्यातंचेदंवनंमम । अनुगङ्गंचरन् कामांश्चित्रं यत्ररमाम्यहम् ॥ १३ ॥नक्षौणपाःशृङ्गिणोवा नदेवानचमानुषाः । इदंसमुपसर्पन्तितर्कि समनुपर्पथ ॥ १४ ॥ अर्जुन उवाच । समुद्रेहिमवत्पार्श्वे नद्यामस्याञ्चदुर्मते । रात्राव

कर कठोर शरासन को फैलाकर कहनेलगा।६।कि रात्रि आने से पहले जो घोर सन्ध्याका कालहोता है उसके अस्सीलव के अतिरिक्त शेष सब मुहूर्त्तही कामचारी यक्ष, गंधर्व और राक्षसों के विचरनेका काल है इस के सिवाय शेषकाल मनुष्योंके कर्माचरण के निमित्त निश्चयहै।८।यदि मनुष्यगण लोभवश घूमते हुए उस काल में हमारे निकट आते हैं तो हम उन मूर्खोंको मार डालते हैं इस लिये जो लोग रात्रि को जलाशय में जाते हैं वे बली भूपालभी होंतो वेदज्ञ ब्राह्मण उनकी निन्दाकरतेहैं ।१०। अतएव तुम दूररहो मेरेपास न आओ क्या तुम नहीं जानतेहो कि मैं भागीरथी के जल में नहा रहाहूं । मैं मानवाला कुवेर का मित्र अंगारपर्ण नामक गंधर्व हूं और अपने भुजबल सेहीकाम पूरा कर लेताहूं किसीको क्षमा नहीं करताहूं।१२।मेरेअधिकारका यह वन अंगारपर्ण नाम से प्रसिद्ध है मैं इस वन के भीतर और गंगामें भांति २ की क्रीडा करता फिरता हूं मैं कुवेर का प्रिय मित्र हूं लक्षणोंसे जान पडता है कि तुम राक्षस, शृंगी, गंधर्व अथवा यक्ष नहींहो फिर कैसे मेरेपास आने का साहस किया।१४। अर्जुन ने कहा कि हेदुर्मति समुद्र

senger as soon as you will give them permission to go. The Pandavas and Kunti with Krishna will then go there."26.

CHAPTER CCVIII

Drupad said, "It is true, Vidur, what you have said. I myself am very happy to contract this relationship. Their going home is advisable, but I could not say so of my own accord. The sons of Kunti may go with you if they like and if they are allowed to do so by all knowing Ram and Krishna who seek always to do them good." 4. Yudhishthir said, "My brothers and I are now under your protection and shall do as you will desire." Vaishampayan continued that Krishna also advised them to go by Drupad's permission. Drupad said, "I have no objection when Krishna, who

द्रुपद उवाच । यथैवमन्यतेवीरो दाशार्हःपुरुषोत्तमः । प्राप्तकालंमहाबाहु साधुबुद्धिर्निश्चितामम ॥ ७ ॥ यथैवहिमहाभागाः कौन्तेयाममसाम्प्रतम् । तथैववासुदेवस्य पाण्डुपुत्रानसंशयः ॥ ८ ॥ ननद्ध्यायतिकौन्तेयः पाण्डुपुत्रोयुधिष्ठिरः । यथैषांपुरुषव्याघ्र श्रेयोध्यायतिकेशवः ॥ ९ ॥ वैशम्पायन उवाच । ततस्तेगमनुज्ञाता द्रुपदेनमहात्मना । पाण्डवाश्चैवकृष्णश्च विदुरश्चमहीपते ॥ १० ॥ आदायद्रौपदीकृष्णां कुन्तीचैव यशस्विनीम् । सविहारंसुखंजग्मुर्नगरं नागसाह्वयम् ॥ ११ ॥ श्रुत्वाचाप्यागतान् वीरान् धृतराष्ट्रोजनेश्वरः । प्रतिग्रहायपाण्डूनां प्रेषयामासकौरवान् ॥ १२ ॥ विकर्णं चमहेष्वासं चित्रसेनंचभारत । द्रोणंचपरमेष्वासं गौतमंकृपमेवच ॥ १३ ॥ तैस्तेपरिवृतावीराः शोभामनामहाबलाः । नगरंहास्तिनपुरंशनैः प्रविविशुस्तदा ॥ १४ ॥ कौतूहलेननगरं दीप्यमानमिवाभवत् । तत्रतेपुरुषव्याघ्राः शोकदुःखविनाशनाः ।१५।

इसकालके अनुसार महाभुज पुरुषोत्तम और वीर दाशार्हने जैसा विचारा मेरी समझ में वही ठीक है अब महाभाग पाण्डव जैसे मेरेस्नेहके पात्रहैं, वैसेही इस में सन्देह नहींहै, कि पुरुषश्रेष्ठ वासुदेवकेभी स्नेहके पात्रहैं ।८। वह जैसे इनकी मंगल-चिन्ताकरतेहैं,कुन्ती नन्दन युधिष्ठिर सेभी वैसी बन नहीं पडती । वैशम्पायन ने कहा, कि हे पृथ्वीनाथ ! अनन्तर पाण्डव, कृष्ण और विदुर महात्मा द्रुपदकी आज्ञापाकर परम सुखसे विहारकरते हुए यशस्विनी कुंती और द्रौपदीके साथ हास्तिनपुरमें जानेलगे । ११ । हेभारत जननाथ धृतराष्ट्र ने वीर पाण्डवों के शुभागमन का समाचार सुनकर, उनको लिवालानेके लिये बड़े चापधारी विकर्ण, चित्रसेन धनुषधरनेवालोंमें श्रेष्ठ द्रोण और गौतम, कृप इन सब कौरव पक्ष के लोगों को भेजा ।१३। महाबली वीर पाण्डव उन से घिरेजाकर सोहतेहुए धीरे धीरे हास्तिनपुर में गये तब वह नगर नगरवालोंके देखनेकी बड़ीचाहकी हडबडी से मानो फटने लगा । पुरुषव्याघ्र पाण्डवों को देखकर पुरवासियों के शोक दुःख दूरहो-

holds them as dear as I do, advises them to go. He thinks of the happiness of the Pandavas more than Yudhishthir can." 9. Vaishampayan said that the Pandavas, Krishn and Vidur with Kunti and Draupadi went to Hasthinpur by Drupad's permission. King Dhritrashtra, having heard of the arrival of the Pandavs, sent the great archer Vikarn, Chitrasen, Drona the best of archrrs, Gautam, Krip, and other Kauravas to receive them. The brave Pandavas surrounded by them entered the city with great pomp. By the crowds of the eager spectators the city looked as if it would expand. The grief of the citizens was changed into joy at seeing the Pandavas.15 The well-wishers of the Pandavas among the citizens, were heard to say, " These are the virtuous lions among men who used to protect us like Kinsmen. We feel as if Pandu himself were return

ततश्चावचावाचः पौरैःप्रियचिकीर्षुभिः । उदीरिताअशृण्वंस्तेपाण्डवा हृदयङ्गम॥१६॥ अयंसपुरुषव्याघ्रः पुनरायातिधर्मवित् । योनःस्वानिवदायादान धर्मेणपरिरक्षति ।१७। अद्यपाण्डुर्महाराजो वनादिवजनप्रियः । आगतःप्रियमस्माकं चिकीर्षुर्नात्रसंशयः ।२८। किन्तुनाद्यकृतंतात सर्वेषांनःपरंप्रियम् यन्नःकुन्तीसुतावीरा नगरंपुनरागताः ॥१९॥ यदिदत्तंयदिहुतंविद्यते यदिनस्तपः । तेनतिष्ठन्तुनगरे पाण्डवाःशरदांशतम् ॥ २० ॥ ततस्तेधृतराष्ट्रस्य भीष्मस्यचमहात्मनः । अन्येषांचतदर्हाणां चक्रुःपादाभिवन्दनम् । ॥ २१ ॥ कृत्वातुकुशलप्रश्नं सर्वेणनागरेणच । न्यविशन्ताथवेश्मानि धृतराष्ट्रस्यशासनात् ॥ २२ ॥ विश्रान्तास्तेमहात्मानः कञ्चित्कालंमहाबलाः । आहूताधृतराष्ट्रेण राज्ञाशान्तनवेनच ॥ २३ ॥ धृतराष्ट्र उवाच । भ्रातृभिःसहकौन्तेय निबोधगदतोमम। पुनर्नोविग्रहोमाभूत् खाण्डवप्रस्थमाविश ॥ २४ ॥ नचवोवसतस्तत्र कश्चिच्छक्तःप्र-

गये।१५। प्रियचाहनेवाले पुरवासियोंके हृदयप्यारे पाण्डव उनसे कहेजातेहुए इसप्रकारके भांति भांति के वचन सुननेलगे, कि यह वही धर्मज्ञ पुरुषव्याघ्र फिर आरहे हैं, कि जो अपने परिवारोंकी भांति हमारी रक्षा करते थे। आज मानो सब जनोंके प्यारे महाराज पाण्डुही हमारे प्रिय चाहनेवाले बनकर वनसे लौट आरहेहैं।१८। इससे बढकर हमारा कौनसा प्रिय कार्यहोगा, कि आज वीर कुन्तीपुत्रगण हमारे नगर में फिर आ रहेहैं। यदि हमने दान वा हवन कियाहो अथवा यदि हमारा बटोराहुआ तपहो, तो उस के बलसे पाण्डव लोग इसनगरमें सैकडों वर्षबसें।२०।अनन्तर पाण्डवोंने धृतराष्ट्र, महात्मा भीष्म और दूसरे गुरुजनोंके पांवछुए। आगे नगर वालोंका कुशल पूछकर वार्त्ता लापकर धृतराष्ट्रकी आज्ञासे राज मन्दिर में बसनेलगे।२२। महात्मा महाबली पाण्डवों के कुछ काल विश्राम करने के पीछे राजा धृतराष्ट्र और शान्तनु पुत्र भीष्मने उन को बुलवाया। अनन्तर उन के आने पर धृतराष्ट्र ने युधिष्ठिर से कहा, कि हे कुन्तीपुत्र ! मैं जो कहूं भाइयों के साथ सुनो, तुम खाण्डवप्रस्थ में जा बसो, कि तुम से हमारा फिर

ing from the forest to do us good.18.What can give us more joy than the coming back of the Pandavas? If we have ever given in charity, poured libations into fire,or amassed the fruits of asceticism, may the Pandavas live in this city for hundreds of years. The Pandavas then touched the feet of Dhritrashtra, Bhishma, and other elders of the Kaurava family. Having asked the welfare of the citizens and talked with them, the Pandavas went to reside in the palace.22.When they had taken rest for a few days after the fatigues of the journey, they were sent for by Dhritrashtra and Bhishma the son of Shantanu. Dhritrashtra then addressed Yudhishthir, saying, " Hear me. son of Kunti, with all thy brothers: " You will settle in the forest of Khandava to avoid further quarrelling.

बाधितुम् । संरक्ष्यमाणान् पार्थेनत्रिदशानिववज्रिणा । अर्द्धराज्यस्यसम्प्राप्य खाण्ड वप्रस्थमाविश ॥ २५ ॥ वैशम्पायन उवाच । प्रतिगृह्यतुतद्वाक्यं नृपंसर्वेप्रणम्यच । प्रतस्थिरेततोघोरं वनंतन्मनुजर्षभाः ॥ २६ ॥ अर्द्धराज्यस्य सम्प्राप्य खाण्डवप्रस्थ माविशन् । ततस्तेपाण्डवास्तत्र गत्वाकृष्णपुरोगमाः ॥ २७ ॥ मण्डयाञ्चक्रिरेतद्वै परं स्वर्गवदच्युताः । ततःपुण्येशिवेदेशे शान्तिकृत्वामहारथाः ॥ २८ ॥ नगरंस्थापयामासु र्द्वैपायनपुरोगमाः । सागरप्रतिरूपाभिः परिखाभिरलङ्कृतम् ॥ २९ ॥ प्राकारेणच सम्पन्नंदिवमावृत्यतिष्ठता । पांडुराभ्रप्रकाशेन हिमराशिनिभेनच ॥ ३० ॥ शुशुभेतत् पुरश्रेष्ठं नागैर्भोगवतीयथा । द्विपक्षगरुडप्रख्यैर्द्वारैः सौधैश्चशोभितम् ॥ ३१ ॥ गुप्तमभ्र-चयप्रख्यैर्गोपुरैर्मन्दरोपमैः । विविधैरपिनिर्विद्धैः शस्त्रोपेतैःसुसंवृतैः ॥३२ ॥ शक्तिभि श्चावृतंताद्धि द्विजिह्वैरिवपन्नगैः । तल्पैश्चाभ्यासिकैर्युक्तं शुशुभेयोधरक्षितम् ॥ ३३ । तीक्ष्णां

विगाड़ न हो ।२४। तुम अर्जुनसे इसप्रकार रक्षितहोकर, कि जैसे इन्द्रजीसे देवता रक्षित होतेहैं वहां वासकरो, तो तुमसे कोई छेड़ छाड नहीं करसकेगा, सो तुम राज्यका आधा भाग लेकर खाण्डवप्रस्थ में रहो । वैशम्पायन ने कहा कि मनुष्य श्रेष्ठ पाण्डवों ने राजा धृतराष्ट्र की बात मानकर राज्यका आधा भाग पाकर उन के पांव छूकर घने वनमें जा खाण्डवप्रस्थ में प्रवेश किया । उन अच्युत पुरुषोंने कृष्णके साथ वहां पहुंचकर उस जगह को देवलोककी भांति बनाया । महारथी पाण्डवों ने कृष्णद्वैपायन के साथ शुभ पुण्य स्थानमें शांति-कार्य करवाकर भलेप्रकारसे नगर बसाया । वह नगर सागरसमान बड़ी खाई और चन्द्रमा तथा धुंधले बादलसमान अकाश चूमनेवाले भवनोंकी कतारसे ऐसी शोभा पाने लगा, कि जैसे भोगवती नगर सर्पोंसे सुशोभितहोताहै उस के घरोंको कि-वाडयुक्त प्रशस्त द्वारों से उडनेको चाहनेवाले पंखफैलाये गरुडसे शोभाहुई।३१।वह श्रेष्ठ पुरी बादलदल और मन्दर पर्वत सदृश भलेप्रकार संवृत, अस्त्रयुक्त, भेदने के अयोग्य और भांति भांति के गोपुरों से अच्छेप्रकार रक्षित हुई और ठौर ठौरमें दोजीभवाले सर्प

'You will live there under the protection of Arjun as gods do under that of Indra, and no one will be able to molest you. You will rule half the kingdom and dwell in the forest of Khandav.'25. Vaishampayan said that the *Pandavas* having obtained half the kingdom touched the feet of Dhritrashtra and went to dwell in the forest of Khandava. They entered the thick forest in the company of Krishna and made the place like the city of gods. The brave Pandavas having purified a part of a forest by the help of Dwaipayan laid the foundation of a city. The city surrounded by a deep ditch, with its rows of buildings touching the clouds, looked as grand as Bhogwati the city of Nagas. The doors of the houses were painted with the pictures of Gadur with wings spread as if ready for flight.31. The city

कुशशतघ्नीभिर्यन्त्रजालैश्च शोभितम्। आयसैश्चमहाचक्रैः शुशुभेतत्पुरोत्तमम् ॥३४॥
सुविभक्तमहारथ्यं देवताबाधवर्ज्जितम्। विरोचमानंविविधैःपाण्डुरैर्भवनोत्तमैः ।३५॥
तत्त्रिवष्टपसङ्काशमिन्द्रप्रस्थं व्यरोचत। मेघवृन्दाग्रवाकाशविद्धं विद्युत्समावृतम्।३६।
तत्ररम्येशिवेदेशे कौरव्यस्यनिवेशनम्। शुशुभेधनसम्पूर्णं धनाध्यक्षक्षयोपमम् ॥ ३७॥
तत्रागच्छन्द्विजाराजन् सर्ववेदविदाम्वराः। निवासंरोचयन्तिस्म सर्वभाषाविदस्तथा
॥ ३८ ॥ वणिजश्चाययुस्तत्र नानादिग्भ्योधनार्थिनः। सर्वशिल्पविदस्तत्र वासायाभ्यागमंस्तदा ॥ ३९ ॥ उद्यानानिचरम्याणि नगरस्यसमन्ततः। आम्रैराम्रातकैर्जीपै रशोकैश्चम्पकैस्तथा ॥ ४० ॥ पुन्नागैर्नागपुष्पैश्च लकुचैःपनसैस्तथा। शालतालतमालैश्च बकुलैश्चसकेतकैः ॥ ४१ ॥ मनोहरैःसुपुष्पैश्च फलभारावनामितैः। प्राचीनामल

वत शक्ति नामक अस्त्रों से घिरी, अस्त्र शिक्षा के लिये बड़े बड़े भवनों से सुशोभित, योधोंसे रक्षित, तेज अंकुश तथा एकबारही सैकड़ों मनुष्यों के प्राणनाशी शतघ्नी नामक अस्त्रयुक्त यन्त्रजाल और लोहेके बड़े बड़े चक्रों से सुशोभित हुई ३४।उस के पथ चौड़े और बड़े हिसाब से बनाये गये। उस नगरी में कभी दैवी छेड छाडकी सम्भावना नहीं रही वह नगर धुंधले रंगके भांति भांति के अच्छे अच्छे भवनों की कतारों से दीप्यमानहोकर अमरोंकी पुरी के समान शोभायमानहोने के कारण इन्द्रप्रस्थ कहलाया। ऐसे नगर के सुंदर शुभस्थानमें पाण्डवोंकी धनभरी धननाथ सदृश भवन मण्डली आकाश मण्डल में चमकती हुई विजली से जटित बादलसमान सोहने लगी ।३७। हे महाराज अनन्तर संस्कृत प्राकृतआदि देशकी भाषा जाननेवाले और सबवेदोंके जानकार ब्राह्मणोंने आकर उस स्थानमें वसना निश्चयकिया ।३८। वणिक लोग धनार्जन के अभिलाषी बनकी अनेक दिशाओं से वहां आनेलगे। अनेक प्रकार शिल्प विद्यावों के जानने वाले वहां आ वसे ।३९। नगर के चारों ओर सुन्दर सुन्दर फुलवाडी आम आम्रातक, कदम्ब, अशोक, चम्पा, पुन्नाग, नागकेशर, लकुच, पनस, शाल, ताल, तमाल, बकुल,

was protected by walls and houses impregnable by enemies and containing all sorts of weapons. In some places it had a paling of pointed iron like the two tongues of a serpent. There were large houses for training men in the science of arms. It was protected by warlike men and guns which could kill hundreds of men at once.34. Its thoroughfares were made wide with great accuracy. It was quite safe from molestation even of gods. From the rows of dark colored houses it looked like the city of gods and was therefore called Indraprasth. In a beautiful part within the city were the palaces of the *P*andavas, reaching to the sky like those of the god of wealth.37. Scholars of Sanskrit and *P*rakrit came from great distances to settle in the city. Traders from all parts came there to earn wealth

कैल्लोधैरङ्कोलैश्चसुपुष्पितैः ॥ ४२ ॥ जम्बूभिःपाटलाभिश्च कुब्जकैरतिमुक्तकैः । करवीरैःपारिजातैरन्यैश्च विविधैर्द्रुमैः ॥ ४३ ॥ नित्यपुष्पफलोपेतैर्नानाद्विजगणायुतैः । मत्तबर्हिणसंघुष्टं कोकिलैश्च सदामदैः ॥ ४४ ॥ गृहैरादर्शविमलैर्विविधैश्च लतागृहैः । मनोहरैश्चित्रगृहैस्तथा जगतिपर्वतैः ॥ ४५ ॥ वापीभिर्विविधाभिश्च पूर्णाभिःपरमाम्भसा । सरोभिरतिरम्यैश्च पद्मोत्पलसुगन्धिभिः ॥ ४६ ॥ हंसकारण्डवयुतैश्चक्रवाकोपशोभितैः । रम्याश्चाविविधास्तत्र पुष्करिण्योवनावृताः । तडागानिचरम्याणि बृहन्ति सुबहूनिच ॥ ४७ ॥ तेषांपुण्यजनोपेतं राष्ट्रमाविशतांमहत् । पांडवानांमहाराज शश्वत् प्रीतिरवर्द्धत ॥ ४८॥ तत्रभीष्मेणराज्ञाच धर्मप्रणयनेकृते । पाण्डवाःसमपद्यन्त खाण्डवप्रस्थवासिनः ॥ ४९ ॥ पञ्चभिस्तैर्महेष्वासैरिन्द्रकल्पैः समन्वितम् । शुशुभेतत्पुर

मनोहर फूल सहित केतक, फलके भार से नम्र पानीय आमलक, लोध्र, सुन्दर फूलयुक्त अङ्कोल, जम्बु, पाटल, माधवी लताकुञ्ज, करवीर और मन्दार यह सब और दूसरे नित्य फूल फलवाले भांति भांतिके वृक्षों से सुहावनी । वे फुलवाड़ी अनेक प्रकार के पक्षी, उन्मत्त मयूर दल और उमङ्ग से चुह चुहातीहुई कोयलकी कूकसे भरकर पहिलेकी अन देखी सुन्दरता फैलाने लगीं । और अनेक प्रकार के आदर्श सदृश निर्मल गृह, भांति भांतिके लतागृह, सुहावने चित्रगृह, कीडार्थ मिट्टी के कृत्रिम पहाड़ श्वेत लाल आदि नाना प्रकार के पद्मकी गन्ध से अति मनोहर सरोवर हंस, कारण्डव और चकवोंसे सुहावने बनसे घिरे, भांति भांतिके ताल और बडे बडे सुन्दर तडागोंसे सुहाई।४७।महाराज उस पुण्यशील जनों से पूरित महान् प्रदेश में जाकर पाण्डवों का आनन्द दिन पर दिन बढने लगा । राजा धृतराष्ट्र और भीष्मके पाण्डवों के लिये उसप्रकार धर्मकी व्यवस्था करदेने पर पाण्डव खाण्डव प्रस्थ में बासकर आनन्दितहुए भोगवती नगरी जिसप्रकार

and were followed by mechanics and artisans of all sorts. All round the city there were orchards containing various trees bearing fruits and flowers, viz., Amb, Amratak, Kadamb, Ashok, Champa, *Punnag*, Nagkessar, Lakuch, *Panas*, Shal, Tal, Tamal, Vakul, Ketak bearing beautiful flowers, Amlak bowed down by the weight of its fruit, Lodhra, Ankol bearing elegant flowers, Jamba, *Patal*, Madhavi a bushy creeper, Karvir, Madar and other trees bearing fruits and flowers, and evergreens. The gardens became exceedingly charming by the presence of peacocks and cuckoos. There were excellent houses, bowers, observatories, artificial hills for pleasure, tanks with red and blue lotus abounding in swans and other aquatic birds. Tanks and lakes were made in the midst of the forest. The joy of the Pandavas increased day by day in that holy place. By the justice of Bhishma and Dhritrashtra the Pandavas were able to

श्रेष्ठं नागैर्भोगवतीयथा ॥ ५० ॥ तांनिवेश्यततोवीरो रामेणसहकेशवः । ययौद्वारवतीं राजन् पाण्डवानुमते तदा ॥ ५१ ॥

इत्यादिपर्वणि राज्यलाभपर्वणि विदुरागमने अष्टाधिकद्विशतोऽध्यायः ॥ २०८ ॥

जनमेजयउवाच । एवंसम्प्राप्य राज्यन्तदिन्द्रप्रस्थं तपोधन । अतऊर्ध्वंमहात्मानः किमकुर्वतपाण्डवाः ॥ १ ॥ सर्वएवमहासत्त्वा ममपूर्वपितामहाः । द्रौपदीधर्मपत्नीच कथंतानन्ववर्तत ॥ २ ॥ कथञ्चपंच कृष्णायामेकस्यांते नराधिपाः । वर्त्तमानामहाभागा नाभिद्यन्तपरस्परम् । श्रोतुमिच्छाम्यहंसर्वं विस्तरेणतपोधन । तेषांचेष्टितमन्योऽन्यं युक्तानांकृष्णयासह ॥ ४ ॥ वैशम्पायन उवाच । धृतराष्ट्राभ्यनुज्ञाताः कृष्णया सहपाण्डवाः । रेमिरेखाण्डवप्रस्थे प्राप्तराज्याः परन्तपाः ॥ ५ ॥ प्राप्यराज्यंमहातेजाः सत्यसन्धोयुधिष्ठिरः । पालयामासधर्मेण पृथिवींभ्रातृभिःसह ॥ ६ ॥ जितारयोमहा

नागों से सोहती है, वैसेही वह नगर पंच पाण्डवों से अच्छी शोभा पाने लगा । हे महाराज ! बलदेव जीके साथ वीर श्रीकृष्ण इसप्रकार से पाण्डवों को राज्य में बैठाकर उनकी सम्मति से द्वारकाको गये ॥ ५१ ॥

अध्याय २०९ ॥

जनमेजयबोले, कि हेतपोधन ! महासत्व महात्मा मेरेपहिले के दादे पाण्डवों ने इन्द्रप्रस्थमें इस के पीछे क्या कियाथा ? उनकी स्त्री द्रौपदी क्योंकर उन सबोंके संग मिलती थी और वे महाभाग भूपति पांचों एकद्रौपदीसे रतहोते थे, फिर तिसपरभी उन पांचों में आपसका झगडा नहीं उभडाथा, इसका क्या कारण है ? हे तपोधन ! कृष्णा से मिलतेहुए महात्माओं ने आपस में कैसा व्यवहार कियाथा ? यह सब विस्तारपूर्वक सुना चाहता हूं । वैशम्पायन ने कहा, कि शत्रुमथनेहारे पांडव धतराष्ट्रकी आज्ञा से राज्यलाभ कर खाण्डवप्रस्थ में कृष्णाकेसाथ गृहस्थी करने लगे बड़े तेजस्वी सत्यशील

live there in great happiness. The city looked as grand by the presence of the Pandavas as Bhogwati the city of Nagas. Krishna with Baldev having installed the Pandavas on the throne went to Dwarika.51.

CHAPTER CCIX

Janmejaya said, " Tell me, learned man, all that the Pandavas did after this, while they were at Indraprasth. How did they manage to meet with their wife ? Having a wife common to themselves how did they manage to live peacefully ? How did they behave towards each other with regard to Krishna ? I wish to know all this in detail." Vaishampayan said that having obtained the kingdom from Dhritrashtra they managed to keep house by the help of Draupadi. Yudhishthir ruled the Kingdom by the

प्रजाः सत्यधर्मपरायणाः । मुदंपरमिकां प्राप्तास्तत्रोषुः पाण्डुनन्दनाः ॥ ७ ॥ कुर्वाणाः पौरकार्याणि सर्वाणिपुरुषर्षभाः । आसांचक्रुर्महार्हेषु पार्थिवेष्वासनेषुच ॥ ८ ॥ अथ तेषूपविष्टेषु सर्वेष्वेवमहात्मसु । नारदस्त्वथदेवर्षिराजगाम यदृच्छया ॥ ९ ॥ आसनं रुचिरंतस्मै प्रददौस्वंयुधिष्ठिरः । देवर्षेरुपविष्टस्य स्वयमर्घ्ययथाविधि ॥ १० ॥ प्रादाद्युधिष्ठिरोधीमान् राज्यंतस्मैन्यवेदयत् । प्रतिगृह्यतुतां पूजामृषिः प्रीतमनास्तदा । ॥ ११ ॥ आशीर्भिर्वर्द्धयित्वाच तमुवाचास्यतामिति। निषसादाभ्यनुज्ञातस्ततो राजा युधिष्ठिरः ॥ १२ ॥ कथयामासकृष्णायै भगवन्तमुपस्थितम् । श्रुत्वैतद्द्रौपदीचापिशुचिर्भूत्वासमाहिता ॥ १३ ॥ जगामतत्रयत्रास्ते नारदःपाण्डवैःसह । तस्याभिवाद्यचरणौ देवर्षेर्धर्मचारिणी ॥ १४ ॥ कृतांजलिःसुसम्वीता स्थिताथद्रुपदात्मजा । तस्याश्चापिसधर्मात्मा सत्यवागृषिसत्तमः ॥ १५॥ आशिषोविविधाःप्रोच्य राजपुत्र्या

युधिष्ठिर राज्यपाकर भाइयोंके साथ धर्म के अनुसार प्रजा पालने लगे । शत्रु विनाशी, महाप्राज्ञ, सत्य-धर्मशील पुरुष-श्रेष्ठ दूसरे पाण्डवगण बड़े आनंद से उसस्थानमें बसेरहे। वे बड़े मूल्यवान राजासनों पर बैठकर सम्पूर्ण पौर-कार्यों को निबटाया करते थे ।८। अनन्तर एक दिन वे सब महात्मा बैठे थे, कि ऐसे समय में देवर्षि नारद मनमाने वहां आ पहुँचे । बुद्धिमान युधिष्ठिर ने ऋषि को आते देखकर अपना सुंदर आसनछोड दिया अनन्तर देवर्षि के बैठनेपर उन्हों ने उनको विधि पूर्वक अर्घ्य देकर सम्पूर्ण राज-कार्यकी बातें कह सुनाईं । ऋषिने पूजा लेकर प्रसन्न चित्तसे उनको अशीस देकर बैठने को कहा ।११।राजा युधिष्ठिर मुनिकीआज्ञा से बैठगये और कृष्णाके पास देवर्षि के आने का समाचार भिजवाया । द्रौपदी वह बात सुनतेही शुचि और समाहितहोकर उसजगह आगयी जहां देवर्षि पाण्डवों के साथ बैठे थे ।१३।धर्मचारिणी कृष्णा देवर्षि के पांओं को प्रणामकर हाथजोड घूंघट काढ खड़ी हुई धर्मात्मा सत्यवादी ऋषिश्रेष्ठ नारद ने अनिन्दिता राज्यकन्या को अनेक अशीस देकर जानेकी आज्ञा दी।१६।अनंतर द्रौपदीके चले

help of his brothers. The other Pandavas virtuous, wise and truthful lived there peaceably and used to minister the affairs of the kiugdom from precious kingly seats. 8. They were sitting together one day when Rishi Narad came there. Yudhishthir received him with great respect. After offering him arghya they told him all about the affairs of their kingdom. The Rishi after accepting their worship told them to sit down.11. Yudhishthir sat down and informed Draupadi of the arrival of the Rishi. Draupadi at once came to the place where the rishi was sitting with the Pandavas. The virtuous Draupadi touched the Rishi's feet and stood up with downcast head and joined hands. The virtuous Narad pronounced his benedictions on Draupadi and told her to go away. 16. After her departure

स्तुनारदः । गम्यतामितिहोवाच भगवांस्तामनिन्दिताम् ॥ १६ ॥ गतायामथकृष्णा यां युधिष्ठिरपुरोगमान् । विविक्तेपाण्डवान् सर्वानुवाचभगवानृषिः ॥ १७ ॥ नारद उवाच । पांचालीभवतामेका धर्मपत्नीयशस्विनी । यथावोनात्रभेदः स्यात्तथानीतिर्विधीयताम् ॥ १८ ॥ सुन्दोपसुन्दौहिपुरा भ्रातरौसहितावुभौ । आस्तामवध्यावन्येषां त्रिषुलोकेषुविश्रुतौ ॥ १९ ॥ एकराज्यावेकगृहावेकशय्यासनाशनौ । तिलोत्तमायास्तौ हेतोरन्योऽन्यमभिजघ्नतुः ॥ २० ॥ रक्ष्यतांसौहृदं तस्मादन्योऽन्यप्रीतिमावहम् । यथावोनात्रभेदःस्यात्तत् कुरुष्वयुधिष्ठिर ॥ २१ ॥ युधिष्ठिर उवाच । सुन्दोपसुन्दावसुरौ कस्यपुत्रौमहामुने । उत्पन्नश्चकथंभेदः कथञ्चान्योऽन्यमघ्नताम् ॥ २२ ॥ अप्सरा देवकन्यावै कस्यचैषातिलोत्तमा । यस्याःकामेनसंमत्तौ जघ्नतुस्तौपरस्परम् ।२३। एतत्सर्वंयथावृत्तं विस्तरेणतपोधन । श्रोतुमिच्छामहेब्रह्मन् परंकौतूहलंहिमे ।२४। इत्यादिपर्वणि राज्यलाभपर्वणि युधिष्ठिरनारदसंवादे नवाधिकद्विशतोऽध्यायः२०९

जाने पर भगवान देवर्षि युधिष्ठिर आदि पाण्डवों से निराले में बोले, कि यशस्विनी द्रौपदी अकेली तुम सबोंकी धर्मपत्नी बनी है, ऐसी दशा में तुम भाइयोंमें बिगाडहोसकताहै, सो ऐसा कोई नियम करो, कि वह न होने पावे।१८।पूर्वकाल में सुन्द और उपसुंद नामक दोभाई एकत्र बसते थे। वे दूसरोंसे बधेजाने के अयोग्य और उनका एक राज्य, एक गृह, एक सेज, एक भोजन स्थानथा। उन में सदा ऐसी मित्रता बनी रहने परभी तिलोत्तमा के लिये उन्हों ने एक दूसरेको मारडाला।२०।हे युधिष्ठिर ! तुम आपस की प्रीति बढानेवाले भ्रातृप्रेम बनाये रक्खो। यह प्रयत्न करो, कि तुम में भ्रातृभेद न होने पावे। युधिष्ठिर बोले, कि हेमहामुने ! सुंद और उपसुंद किसके पुत्र थे ? क्योंकर उन में आपस का भेदहोगया और क्योंकर उन्होंने एक दूसरेको मारडाला था।२२।और जिस नारी के लिये उन्हों ने एक दूसरे को मारडाला था, वह तिलोत्तमा किसकीकन्या थी वह बाला अप्सरा वा देवकन्याथी ? । हेब्रह्मन् ! यह सब विस्तारपूर्वक आद्योपांतसुना चाहताहूं। हे तपोधन ! यह सुननेकी मुझे बडी इच्छा है । २४ ॥

he said to the Pandavas, "As Draupadi is the wife of you all, you should make a rule to avoid dispute.18. Formerly there were two brothers Sund and Upsund living together. They were indefatigable by any one else, ruled the same kingdom, lived in the same horse, slept on the same bed and ate together. In spite of such friendship they killed each other for Tilottama. You should always love one another and make rules that may enable you to live together peacefully." Yudhisthir asked, "Let me know, great Muni, whose sons Sund and Upsund were and how they quarrelled and killed each other.22. Whose daughter was Tilottama for whom they killed each other ? Was she an Apsara or a godess ? I wish to hear all this in detail and am very anxious."

नारद उवाच। शृणुमेविस्तरेणेममितिहासं पुरातनम्। भ्रातृभिःसहितःपार्थ यथावृत्तंयुधिष्ठिर ॥ १ ॥ महासुरस्यान्ववाये हिरण्यकशिपोपुरा। निकुम्भोनाम दैत्येन्द्रस्तेजस्वीबलवानभूत् ॥ २ ॥ तस्यपुत्रौमहावीर्य्यौ जातौभीमपराक्रमौ। सुन्दोपसुन्दौदैत्येन्द्रौ दारुणौक्रूरमानसौ ॥ ३ ॥ तावेकनिश्चयौ दैत्यावेककार्य्यार्थसम्मतौ। निरन्तरमवर्त्तेतां समदुःखसुखावुभौ ॥ ४ ॥ विनान्योऽन्यंनभुञ्जाते विनान्योऽन्यंन जल्पतः। अन्योन्यस्य प्रियकरावन्योऽन्यस्य प्रियंवदौ ॥ ५ ॥ एकशीलसमाचारौ द्विधैवैकोऽभवत्कृतः। तौविवृद्धौमहावीर्य्यौ कार्य्येष्वप्येकनिश्चयौ ॥ ६ ॥ त्रैलोक्यविजयार्थाय समाधायैकनिश्चयम्। दीक्षांकृत्वागतौविन्ध्यं तावुग्रंतेपतुस्तपः ॥ ७ ॥ तौतुदीर्घेणकालेन तपोयुक्तौबभूवतुः। क्षुत्पिपासापरिश्रान्तौ जटावल्कलधारिणौ

अध्याय ॥ २१० ॥

श्रीनारदजी बोले, कि हे पृथापुत्र युधिष्ठिर ! भाइयों के साथ तुम यह पुरानी कथा सुनो। पूर्वकाल में महावीर हिरण्यकशिपुके वंश में निकुम्भनामक बली तेजस्वी एक दैत्यवर ने जन्म लियाथा।२। उस के बडे पराक्रमी, बड़े वीर्यवन्त, कुटिलचित्त दो कठोर पुत्र हुए। उन दो दैत्यराज पुत्रों में एकका नाम सुन्द और दूसरेका उपसुन्द था। वे दोनों सदा एकही विषयमें सम्मत, एकही विषय में दत्तचित्त और एकहीकार्य के करनेवाले होकर समान सुख दुःख से काल गँवाते थे।४।दोनों एक दूसरे को प्यारी बोली बोलते और एक दूसरेका प्रियकार्य करते थे; एक भाईके विना दूसराभाई भोजन वा गमन नहीं करता था। उन दोभाइयों के स्वभाव और व्यवहार में भेद न रहने के हेतु जान पड़ताथा, कि मानो एक मनुष्य दोभागों में बंटगया है। हर काम में एकबुद्धि रखनेवाले वे दो बड़े वीर्यवन्त भाई क्रमसे बढगये।६। वे तीनों लोक जीतना निश्चयकर विन्ध्या पर्वत पर जाकर दीक्षित और समाहितहोकर कठोर तप करनेलगे पहिले वल्कल

CHAPTER CCX

Narad said, " Hear this old tale Yudhishthir with your brothers. In former times there was a very powerful demon, named Nikumbh, in the family of Hiranyakashipu. He had two sons who were very brave and cruel. They were named Sund and Upsund. They were always of one mind, were engaged in doing the same thing and were partners in woe or weal. 4. They pleased each other by sweet words and pleasant deeds. One brother did not eat or go anywhere without the other. They resembled so much in their manners and actions as to seem that one man was divided into two. They excelled in every sort of acquirement by mutual help. 6. Having resolved to conquer the whole world they began to practice severe asceticism on the Vindhya hills. In the beginning they wore barks

॥ ८ ॥ मलोपचितसर्वाङ्गौ वायुभक्षौबभूवतुः । आत्ममांसानिजुह्वन्तौ पादांगुष्ठाग्रधिष्ठितौ । ऊर्द्धबाहूचानिमिषौ दीर्घकालंधृतव्रतौ ॥ ९ ॥ तयोस्तपःप्रभावेण दीर्घकालं प्रतापितः । धूमंप्रमुमुचे विन्ध्यस्तदद्भुतमिवाभवत् ॥ १० ॥ ततोदेवाभयंजग्मु रुग्रं दृष्ट्वातयोस्तपः । तपोविघातार्थमथो देवाविघ्नानिचक्रिरे ॥ ११ ॥ रत्नैःप्रलोभयामासुः स्त्रीभिश्चोभौपुनःपुनः । नचतौचक्रतुर्भङ्गं व्रतस्यसुमहाव्रतौ ॥ १२ ॥ अथमायां पुनर्देवास्तयोश्चक्रुर्महात्मनोः । भगिन्योमातरो भार्य्यास्तयोश्चात्मजनस्तथा ॥ १३ ॥ प्रपात्यमानाविवस्त्राः शूलहस्तेनरक्षसा । भ्रष्टाभरणकेशान्ता भ्रष्टाभरणवाससः ॥ ॥ १४ ॥ अभिभाष्यततःसर्वास्तौ त्राहीतिविचुक्रुशुः । नचतौचक्रतुर्भङ्गं व्रतस्यसुमहाव्रतौ ॥ १५ ॥ यदाक्षोभंनोपयाति नार्तिमन्यतरस्तयोः । ततःस्त्रियस्ताभूतंच सर्व

पहिन कर और भूखप्यास छोडकर तपमें चित्त लगाया और सर्वशरीर में भस्म लगाकर वायु खाकर पांवके अंगूठों के बल खडेहोकर हाथ ऊंचे उठाकर, निमेषतजकर और व्रत धारणकर बहुतकाल तक अपने मांसकी आहुति चढाई ।९।उसकालमें यह एक आश्चर्य लीला हुई, कि विन्ध्या पर्वतने उनकी तपस्याके प्रभावसे तपकर धुआं वमन किया था । अनन्तर देवगण उनकी कठोर तपस्या देखकर भय खाकर तप नष्ट करनेके लिये विघ्न डालने लगे । उन्होंने लुभानेवाले रत्न और नारीसे उनदोनोंको बार बार लुभाया पर उनदोनों बडे अच्छे व्रत करनेवाले भाइयोंने किसीप्रकार व्रत नहीं छोडा ।१२। आगे उन्होंने फिर उनदोमहात्माओं के सामने माया फैलाकर यह एक बडीभारीलीलादिखाई, कि उन दोनों असुरोंकी माता, बहिन, स्त्री और दूसरे स्वजन अलंकारों से च्युतहोकर केश से रहितहोकर और वस्त्र खोकर, हाथों में शूल लिये हुए एक राक्षससे गिराये जाकर अति भयखाकर उन दोनों असुरों को पुकार पुकार कर त्राहि त्राहि चिल्लाने लगे । यह देखनेपरभी अति बडेव्रतधारी सुंद और उपसुंदने व्रत नहीं छोडा।१५।अनन्तर जब दोनों

of trees, did not mind hunger and thirst, and having smeared their bodies with ashes they stood on the toes of their feet with their hands upraised, living on air only and making their bodies lean. A strange event occured in those days : The Vindhya hills emitted smoke from the subterranean fire.10.The gods being afraid of their severe asceticism began to offer hinderances in their asceticism. They tried to tempt them by means of jewels and women but the two brothers could not be induced to break their vows. The gods then tried another trick: The mother, sister, wife and other kinsmen of the brothers were seen destitute of ornaments, hair and cloths and being beaten down by a Rakshas bearing weapons they were heard to call them for help. The brothers saw all this but did not break their vows.15.At length when none of the two was affected or

मन्तरधीयत ॥ १६ ॥ ततःपितामहःसाक्षादभिगम्य महासुरौ । वरेणच्छन्दयामास सर्वलोकहित प्रभुः ॥ १७ ॥ ततःसुन्दोपसुन्दौतौ भ्रातरौदृढविक्रमौ । दृष्ट्वापितामहं देवं तस्थतुःप्राञ्जलीतदा ॥ १८ ॥ ऊचतुश्चप्रभुंदेवं ततस्तौसहितौतदा । आवयोस्तपसानेन यदिप्रीतःपितामहः ॥ १९ ॥ मायाविदावस्त्रविदौ बलिनौकामरूपिणौ । उभावप्यमरौस्यावः प्रसन्नौयदिनौप्रभुः ॥ २० ॥ ब्रह्मोवाच । ऋतेऽमरत्वंयुवयोः सर्वं मुक्तंभविष्यति । अन्यद्वृणीतंमृत्योश्च विधानममरैःसमम् ॥ २१ ॥ प्रभविष्यावइति यन्महदभ्युद्यतंतपः । युवयोर्हेतुनानेन नामरत्वंविधीयते ॥ २२ ॥ त्रैलोक्यविजयार्थाय भवद्भ्यामास्थितंतपः । हेतुनानेनदैत्येन्द्रौ नवाकामंकरोम्यहम् ॥ २३ ॥ सुन्दोपसुन्दौऊचतुः । त्रिषुलोकेषुयद्भूतं किंचित्स्थावरजङ्गमम् । सर्वस्मान्नोभयं नस्यादृते-

---

मेंसे कोईभी उस से असंतुष्ट वा कातर नहीं हुआ तब वे स्त्रियां और राक्षस अन्तर्हित हुए।१६।इसके पश्चात् सर्वलोकोंके मंगलकारी प्रभु पितामहने उन दोनोंमहावीरोंके सामने आकर उन से वर मांगने को कहा । दृढ विक्रमी सुंद और उपसुंद दोनों भाई प्रभु पितामहदेवको देखकर दोनोंहाथ जोडकर खडेहुए।१८।और दोनों एकत्रहोकर बोले, कि प्रभो पितामह ! हमारी तपस्या में यदि आप प्रीति रखते हैं और प्रसन्नहुएहैं, तो हमको यह वर दें, कि हम दोनों मायाके जानकार अस्त्रके जानवार, बली कामरूपी और अमर होसकें।२०।श्रीब्रह्माजी बोले, कि तुमने जो जो प्रार्थनाकी उन मेंसे अमरहोनेके अतिरिक्त तुम्हारी सब अभिलाषा पूरीहोंगी । तुम अमरताके बिना और कुछ प्रार्थना ऐसी करो, कि अमरहोनेके तुल्यहो।२२।तीनोंलोकोंके प्रभु बननेहीकी इच्छासे तुम ने यह बडीतपस्या प्रारम्भ कीथी इसलिये तुमको अमरता लाभहोना ठीक नहीं है । हे दोनों दैत्यवर ! तीनों लोक जय करनाही तुम्हारी तपस्याका अभिप्राय है ; इसकारण मैंने तुम्हारे अमरहोनेकी अभिलाषा पूरी नहींकी । सुंद और उपसुंद ने कहा कि, हे पितामह ! हम दोनोंको एक

---

disturbed, the women and the Rakshas vanished. The Grandfather of all came to them and wished them to express their desire. The two brave brothers stood up with joined hands before the lord grand-father and said, " If you are pleased with our asceticism, grandfather, grant us the boon that we may become the most accomplished in the knowledge of arms and may become powerful, able to assume any form,and become immortal."Brahma replied,"You will have all your desires with the exception of immortality. You may crave another boon of equal importance instead. You commenced this severe asceticism with a desire to become masters of the world. It will not, therefore, be proper for you to become immortal. The object of your asceticism is to rule over the world. I do not therefore grant you the boon of immortality."23.Sund and Upsund then

न्योऽन्यं पितामह।२४। पितामह उवाच। यत्प्रार्थितंयथोक्तंच काममेतद्ददानिवाम्। मृत्योर्विधानमेतच्च यथावद्भविष्यति।२५। नारद उवाच। ततःपितामहोदत्त्वा वरमेतदातयो। निवर्त्यतपसस्तौच ब्रह्मलोकंजगामह।२६। लब्ध्वावराणि दैत्येन्द्रावथतौ भ्रातरावुभौ। अवध्यौसर्वलोकस्य स्वमेवभवनंगतौ।२७ तौतुलब्धवरौदृष्ट्वा कृतकामौ मनस्विनौ। सर्वःसुहृज्जनस्ताभ्यां प्रहर्षमुपजग्मिवान।२८। ततस्तौतुजटाभित्त्वा मौलिनौसम्बभूवतुः। महार्हाभरणोपेतौ विरजोऽम्बरधारिणौ ॥ २९ ॥ अकालकौमुदीं चैव चक्रतुःसार्वकालिकीम्। नित्यःप्रमुदितः सर्वस्तयोश्चैव सुहृज्जनः ॥ ३० ॥ भक्ष्यतांभुज्यतांनित्यं दीयतांरम्यतामिति। गीयतांपीयतांचेति शब्दश्चासीद्गृहेगृहे॥३१॥ तत्रतत्र महानादैरुत्कृष्टतलनादितैः। हृष्टंप्रमुदितंसर्वं दैत्यानामभवत्पुरम् ॥ ३२ ॥

दूसरे के विना इस त्रिलोकभर में स्थावर जंगम आदि किसीसे मृत्युका भय न रहे।२४। पितामह बोले, कि तुमने जो प्रार्थनाकी और जो कहा, वही होगा। मैंने तुम्हारी इस प्रार्थनाके अनुसार तुम्हारी मृत्युका नियम निश्चय किया। श्रीनारदजी बोले, कि अनन्तर पितामह सुन्द और उपसुन्दको यह वर देकर तपसे निवृत्तकर ब्रह्मलोक में गये।२६।दोनों भाई दैत्यवर वर पाकर सब लोकोंके वधके अयोग्य होकर अपने घरको पधारे। उनके स्वजन उन दोनों मनस्वियों को वर पाते और उनका मनोरथ सफलहोते देखकर बडे प्रसन्न हुए।२८।उन दोभाइयों ने तब जटा कटवाकर किरीट आदि अतिमूल्यवान आभूषण और स्वच्छ वस्त्रपहिने। अनन्तर सर्वकालिक अकाल कौमुदीका महोत्सव करना प्रारंभ किया उन के स्वजन सदा आमोद प्रमोद से काल काटनलगे।३०।उन के घरोंमें भक्षण करो, भोजन करो, दान करो, खेलो, गीत गाओ, पीओ, ऐसे शब्द सदा उच्चारे जाने लगे। ठौर ठौरसे दैत्योंके सिंह समान गर्जन के साथ थपोडीकी कठोर आहटसे सम्पूर्ण नगर में आनन्दकी उमंग फैल गई। कामरूपी दैत्योंके बडेआनंदसे उन प्रकारोंके भांति भांति

asked the grand-father to grant that no one should have power over their life excepting themselves: one over the other. Brahma granted this boon. They should not die except by each other's hand. Narad continued that Brahma having given them the boon went to his own abode and they gave up their asceticism.26. The two brothers having got the boon that no one else should be able to kill them went home. Their kinsmen were overjoyed at seeing them return successful. They removed their long hair and put on ornaments, They began a great festival named *Akal Koumudi* and their kinsmen passed the time in happiness and joy.30. Sounds of eat, drink, play and sing were heard from their houses. The citizens were over-joyed and the sounds and noises of revelry and

तैस्तैर्विहारैर्बहुभिर्दैत्यानां कामरूपिणाम् । समाःसंक्रीडतां तेषामहरेकमिवाभवत् ।३३।
इत्यादिपर्वणि राज्यलाभपर्वणि सुन्दोपसुन्दोपाख्याने
दशाधिकद्विशतोऽध्यायः ॥ २१० ॥

नारद उवाच । उत्सवेवृत्तमात्रेतु त्रैलोक्याकाङ्क्षिणावुभौ । मन्त्रयित्वाततःसेनां तावाज्ञापयतांतदा ॥ १ ॥ सुहृद्भिरप्यनुज्ञातौ दैत्यैर्वृद्धैश्चमन्त्रिभिः । कृत्वाप्रास्थानिकंरात्रौ मघासुययतुस्तदा ॥ २ ॥ गदापट्टिशधारिण्या शूलमुद्गरहस्तया । प्रस्थितौसहधर्मिण्या महत्यादैत्यसेनया ॥ ३ ॥ मङ्गलैःस्तुतिभिश्चापि विजयप्रतिसंहितैः । चारणैःस्तूयमानौतौ जग्मतुःपरयामुदा ॥ ४ ॥ तावन्तरिक्षमुत्प्लुत्य दैत्यौकामगमावुभौ । देवानामेवभवनं जग्मतुर्युद्धदुर्मदौ ॥ ५ ॥ तयोरागमनंज्ञात्वा वरदानञ्चतत्प्रभोः । हित्वात्रिविष्टपंजग्मुर्ब्रह्मलोकं ततःसुराः ॥ ६ ॥ ताविन्द्रलोकंनिर्जित्य यक्षरक्षोगणांस्तदा । खेचराण्यपिभूतानि जघ्नतुस्तीव्रविक्रमौ ॥ ७ ॥ अन्तर्भूमिगतान्नागान् जि-

के विहार में लगे रहने से उनको एक एक वर्ष एक एक दिन जान पड़ने लगा ॥ ३३ ॥

अध्याय २११ ॥

नारदजी ने कहा, कि अकाल कौमुदी के महोत्सव के अंतहोने पर तीनों लोकों के अधिकार लाभ करने के अभिलाषी होकर दोनों भाइयोंने युक्तिकर सेनाओंको सजने की आज्ञा दी । उन्हों ने स्वजन, और वृद्ध दैत्य मंत्रियोंकी आज्ञा से यात्राकरनेकीक्रिया पूरी कर रात्रिको मघा नक्षत्र में यात्रा की।२।तुल्य धर्मवाली बड़ी दैत्यसेना गदा, पट्टिश शूल, मुद्गर आदि शस्त्र लेकर उनके साथ चली । दोनों दैत्यराज चारणोंकी विजयसूचक मांगलिक स्तुति पाठसे प्रशंशितहोकर परम हर्षपूर्वक जानेलगे।४।युद्धमें कठोर कामगामी वे दोनों दैत्यवर आकाश पर चढ़कर देवलोक को गये । देवगण उन के आनेकी सुधपा पितामहका वर देना स्मरणकर अपनी अपनी जगह छोडकर ब्रह्मलोकमें गये ।६। तेजस्वी विक्रमी दोनों दैत्योंने इसलोक, यक्षगण, राक्षसगण और दूसरे खेचरी प्राणियोंको जीत

play were heard on all sides. *Being* engaged in play and festivities a year passed like a day." 33.

CHAPTER CCXI

Narad said that at the end of the great festival the two brothers prepared a large army to conquer the world. They went out of the city on an auspicious night. A large army of Daityas armed with different sorts of weapons went with them. Bards began to sing the songs of their glory. They went through the sky to the country of gods who knew that Brahma had granted them boon and left their posts to go to the abode of Brahma.6. The two brothers overran the countries of Yakshas, Rakshas and others who roam through the air. They then vanquished the Nagas of Patal and the Mlechas

त्वातौचमहारथौ । समुद्रवासिनीःसर्वा म्लेच्छजातीर्विजिग्यतुः ॥८ ॥ ततःसर्वांमहीं जेतुमारब्धावुग्रशासनौ । सैनिकांश्चसमाहूय सुतीक्ष्णंवाक्यमूचतुः ॥ ९ ॥ राजर्षयो महायज्ञैर्हव्यकव्यैर्द्विजातयः । तेजोबलंचदेवानां वर्द्धयन्तिश्रियंतथा ॥ १० ॥ तेषामेवंप्रवृत्तानां सर्वेषामसुरद्विषाम् । सम्भूयसर्वैरस्माभिः कार्य्यःसर्वात्मनावधः ।११। एवंसर्वान्समादिश्य पूर्वतीरेमहोदधेः । क्रूरांमतिंसमास्थाय जग्मतुःसर्वतोमुखौ ॥ ॥ १२ ॥ यज्ञैर्यजन्तियेकेचिद्याजयन्तिच येद्विजाः । तान्सर्वान्प्रसभंहत्वा बलिनौ जग्मतुस्ततः ॥ १३ ॥ आश्रमेष्वग्निहोत्राणि मुनीनांभावितात्मनाम् । गृहीत्वाप्रक्षिपन्त्यम्भुविश्रब्धं सैनिकास्तयोः ॥ १४ ॥ तपोधनैश्चयेक्रुद्धैः शापाउक्तामहात्मभिः । नाक्रामन्ततयोस्तेऽपि वरदाननिराकृताः ॥ १५ ॥ नाक्रामन्तयदाशापा बाणामुक्ताः शिलास्विव । नियमान्संपरित्यज्य व्यद्रवन्तद्विजातयः ॥१६॥ पृथिव्यांयेतपःसिद्धा

कर वहांसे चलकर पाताल में बसेहुए सर्पों को परास्तकर समुद्र द्वीप में म्लेच्छों को हराया।८।अनन्तर कठोर शासनेवाले दोनों महाबली भाइयोंने भूमण्डलको परास्त करने को उद्यतहोकर सेनाओं को पुकार पुकार यह कटीलीबातकही, कि राजर्षि वृंद महायज्ञों से और ब्राह्मणगण हव्यकव्यसे देवोंको तेज बल और श्रीवृद्धि पहुंचातेहैं ।१०। वह सब लोग इन कार्योंसे हमारी शत्रुता करते हैं, सो हम सब एकत्रहोकर सर्वप्रकार से उनको नष्ट करेंगे । वे महासमुद्रके पूर्व तटपर ऐसी निष्ठुर कल्पना कर सब सेनाओं को आज्ञा देकर चारों ओर दौडे उन दोनों बली भाइयों ने जिन जिन ब्राह्मणों को यजन वा याजन करते देखा, उसी क्षण उनको मार कर आगे बढने लगे उनकी सेना निःशंक चित्तसे मुनियों के आश्रम में जाकर उनके अग्निहोत्र लेकर जलमें छोडने लगी।१४।महात्मा तपोधनवृन्द क्रोधितहो शापदेने लगे, पर वह ब्रह्माजीके वर से व्यर्थ होने लगा, उनपर वर्त्ताव नहीं करसका जब द्विजों का शाप शिलापर छोडे शिलीमुखकी भांति व्यर्थ होने लगा तब वे नियम छोडकर भागने लगे।१६।भूमण्डलमें जितने समशील,तपःसिद्ध दांत

living on the islands of the seas.8. Then the two brave brothers intending to conquer the whole world addressed the soldiers of their army and said, " The Rajarshis by their sacrifices and *Brahmans* by their libations to fire increase the power of gods who are our enemies. We shall, therefore, destroy them by every means." Having made this cruel resolution on the eastern shore of the Ocean, they over-ran all parts of the world killing in their way the Brahmans engaged in performing sacrifices. The soldiers of their army fearlessly poured water over the sacrificial fire in the hermitages of the *Rishis*.14.The curses of the wrathful *Rishis* had no effect over them on account of the blessing of *Brahma* and had to run away in terror. The *Rishis* and ascetics in all parts of

दान्ताः शमपरायणाः । तयोर्भयाद्दुद्रुवुस्ते वैनतेयादिवोरगाः ॥ १७ ॥ मथितै-राश्रमैर्भग्नैर्विकीर्णकलशस्रुवैः । शून्यमासीज्जगत्सर्वं कालेनेवहतंतदा ॥ १८ ॥ ततो राजन्नदृश्यद्भिर्ऋषिभिश्च महासुरौ । उभौविनिश्चयंकृत्वा विकुर्वातेवधैषिणौ ॥ १९॥ प्रभिन्नकरटौमत्तौ भूत्वाकुञ्जररूपिणौ । संलीनमपिदुर्गेषु निन्यतुर्यमसादनम् । २०। सिंहौभूत्वापुनर्व्याघ्रौ पुनश्चान्तर्हिताबुभौ । तैस्तैरुपायैस्तौ क्रूराद्दृषीन्दृष्ट्वानिजघ्नतुः ॥ २१ ॥ निवृत्तयज्ञस्वाध्याया प्रनष्टनृपतिद्विजा । उत्सन्नोत्सवयज्ञाच बभूववसुधा तदा ॥ २२ ॥ हाहाभूताभयार्त्ताच निवृत्तविपणापणा । निवृत्तदेवकार्य्याच पुण्यो-द्वाहविवर्ज्जिता ॥ २३ ॥ निवृत्तकृषिगोरक्षा विध्वस्तनगराश्रमा । अस्थिकङ्कालस-ङ्कीर्णा भूर्भूयोग्रदर्शना ॥ २४ ॥ निवृत्तपितृकार्य्यश्च निर्वषट्कारमङ्गलम् । जगत्

ऋषि थे, वे इसप्रकार भागे, कि जैसे गरुड के भयसे सर्पभागे इसप्रकार आश्रम मथने और कलसे, स्रुव आदि इधर उधर छिरकाये तथा टूट फूट जानेपर सम्पूर्ण जग प्रलय काल में नष्टहोनेकी भांति खाली होगया ।१८। हे महाराज ! अनन्तर मुनियोंके इधर उधर छिपकर दृष्टि के बाहरहोजाने पर दोनों महावीर उनका बध निश्चय कर नानारूपधरने लगे वे कभी मदोन्मत्त गजका स्वरूपलेकर दुर्ग में गयेहुए तपस्वियों कोभी नष्ट करने लगे।२०।वेदोनों कुटिल कभी सिंहका स्वरूप कभी व्याघ्रकारूप धारणकरतेथे और कभी दृष्टि के बाहरहोजाते थे । इसप्रकार उन्होंने नानाउपायों से ऋषियों को नष्ट किया तब धरती पर यज्ञ और स्वाध्याय रुक जाकर और ब्राह्मण तथा राजा नष्टहोकर एकवारही यज्ञोत्सवका नाशहोगया।२२।सबलोक भयभीत होकर हाय हाय करने लगे मोल, बिक्री, हाटका कार्य, दैवी कार्य, पुण्य कार्य, बिवाहकार्य, ऋषिकार्य और गौरक्षा आदि सम्पूर्ण कार्यही रुकगये नगर और आश्रमोंका सत्यानाशहोकर केवल हड्डी और कंकालोंसे पृथ्वी बहुत भयावनी दीख पडनेलगी।२४।सम्पूर्ण देशोंमें पितृकार्य और वषट्कार आदि मांगलिक

the world ran away before them as serpents do by the fear of Garur. The sacrificial vessels were broken and the hermitage of the *Rishis* became desolate as if the world had come to an end.18. The ascetics having concealed themselves from their sight the two brothers resolved to kill them and put on various disguises. Sometime they assumed the shape of mad elephants and destroyed the *Rishis* hidden within fortresses. Some time they transformed themselves into lions and then disappeared altogether. Sacrifices and self study were put a stop to along with the destruction of kings and Brahmans. The people began to cry with fear, purchase, sale, commerce, worship of gods, charity, marriages, functions of Rishis, protection of cows and other works were put in abeyance. Cities and hermitages were destroyed and ruins and bones disfigured the land on all

प्रतिभयाकारं दुष्प्रेक्ष्यमभवत्तदा ॥ २५ ॥ चन्द्रादित्यौग्रहास्तारा नक्षत्राणिदिवौक सः । जग्मुर्विषादंतत्कर्म दृष्ट्वासुन्दोपसुन्दयोः ॥ २६ ॥ एवंसर्वादिशोदैत्यौ जित्वा क्रूरेणकर्मणा । निःसपत्नौकुरुक्षेत्रे निवेशमभिचक्रतुः ॥ २७ ॥

इत्यादिपर्वणि राज्यलाभपर्वणि सुन्दोपसुन्दोपाख्याने

एकादशाधिकद्विशतोऽध्यायः ॥ २११ ॥

नारद उवाच । ततोदेवर्षयःसर्वे सिद्धाश्चपरमर्षयः । जग्मुस्तदापरामार्त्तिं दृष्ट्वा तत्कदनंमहत् ॥ १ ॥ तेऽभिजग्मुर्जितक्रोधा जितात्मानोजितेन्द्रियाः । पितामहस्य भवनंजगतः कृपयातदा । ततोददृशुरासीनं सहदेवैःपितामहम् । सिद्धैर्ब्रह्मर्षिभिश्चैव समन्तात्परिवारितम् ॥ ३ ॥ तत्रदेवो महादेवस्तत्राग्निर्वायुनासह । चन्द्रादित्यौचश-क्रश्चपारमेष्ठ्यास्तथर्षयः ॥ ४ ॥ वैखानसावालखिल्या वानप्रस्थामरीचिपाः । अजा श्चैवाविमूढाश्च तेजोगर्भास्तपस्विनः ॥ ५ ॥ ऋषयःसर्वएवैते पितामहमुपागमन् । ततो

क्रियाके लोपहोजाने पर जग बड़ा भयानकहो देखनेके अयोग्य हुआ । चन्द्र, सूर्य, ग्रह, तारे और आकाश में रहनेवाले अश्विनी आदि नक्षत्र सुंद उपसुंद का यह कार्य देखकर उदास हुए वे इसप्रकार कुटिल कार्य से सब ओर पराजय कर अन्त को शत्रुवर्जितहोकर कुरुक्षेत्र में बसने लगे ॥ २७ ॥

अध्याय २१२

श्रीनारदजी बोले, कि अनन्तर शमदमशील देवर्षि, परमर्षि और सिद्धगण उस भारी प्राणीहत्याको देखकर बड़े दुःखीहुए । वे तब जगत् पर कृपायुक्तहो पितामह के भवन में गये।२।अनन्तर वहां पितामहको सिद्ध और ब्रह्मर्षियोंसे चारों ओरसे घिरे और देवोंके देव महादेव, अग्नि, वायु, चंद्र, आदित्य, इंद्र, ब्रह्मनिष्ठ ऋषिगण, वैखानस, बाल खिल्य, वानप्रस्थ, मरीचि, अज, अविमुग्ध और तेजोगर्भ आदि भिन्न भिन्न तपस्वी

sides.24.The study of the Vedas and other good deeds were nowhere to be seen throughout the country which became dreary and unbearable to look at. The Moon, theSun,the stars and other luminaries of the sky lost their lustre at such deeds of Sund Upsund. The two brothers having thus cleared all the land of all their enemies settled at last in Kurukshetra."27.

CHAPTER CCXII

Narad said that the Dewarshis, Paramarshis and *Siddhas* were much troubled at the sight of such slaughter of beings. Out of kindness to the people they went to the Grand-father and saw him surrounded by *Siddhas*, Brahmarshis and gods. There they saw Mahadeva, Agni, Vayu, Chandra, Aditya, Indra and other gods, and Rishis and complained of the great misdeeds and cruelties of Sund

ऽभिगम्यतेदीनाः सर्वएवमहर्षयः ॥ ६ ॥ सुन्दोपसुन्दयोःकर्मसर्वमेवशशंसिरे । यथा हृतंयथाचैव कृतंयेनक्रमेणच ॥ ७ ॥ न्यवेदयंस्ततःसर्वं माखिलेनपितामहे । ततोदेवगणाःसर्वेतचैवपरमर्षयः ॥ ८ ॥ तमेवार्थंपुरस्कृत्य पितामहमचोदयन् । ततःपितामहः श्रुत्वासर्वेषां तद्वचस्तदा ॥ ९ ॥ मुहूर्त्तमिवसञ्चिन्त्य कर्त्तव्यस्यचनिश्चयम् । तयोर्बधं समुद्दिश्य विश्वकर्माणमाह्वयत् ॥ १० ॥ दृष्ट्वाचविश्वकर्माणं व्यादिदेशपितामहः । सृज्यतांप्रार्थनीयैका ममदेतिमहातपाः ॥ ११ ॥ पितामहंनमस्कृत्य तद्वाक्यमभिनन्द्यच । निर्ममेयोषितंदिव्यां चिन्तयित्वापुनःपुनः ॥ १२ ॥ त्रिषुलोकेषुयत्किञ्चिद्भूतं स्थावर जङ्गमम् । समानयद्दर्शनीयं तत्तदत्रसविश्ववित् ॥ १३ ॥ कोटिशश्चैवरत्नानि तस्यागात्रे न्यवेशयत् । तांरत्नसङ्घातमयीमसृजद्देवरूपिणीम् ॥ १४ ॥ साप्रयत्नेनमहतानिर्मिता विश्वकर्मणा । त्रिषुलोकेषुनारीणां रूपेणाप्रतिमाभवत् ॥ १५ ॥ नतस्याःसूक्ष्ममप्यस्ति

ऋषिगण सभी उपस्थितहुए सम्पूर्ण महर्षिगणने दुःखीचित्त से सुंद और उपसुंदके कार्यों का वृत्तांत कह सुनाया उन दोनों दैत्यों ने जैसे धूम के साथ जो काम किया और जैसे मारा वह सब क्रमसे आद्योपांत कहसुनाया।७।सम्पूर्ण देवगण और परमर्षियोंने उस विषय के लिये पितामहका अनुरोध किया। अनन्तर पितामहने उन सबों का वचन सुन क्षण भर सोचकर क्या करना ठीकहै उसका निश्चयकर दुराचारी दोनों दैत्योंके वध के लिये विश्वकर्माको बुलवाया।१०।विश्वकर्मा के आनेपर महानुभव पितामहने उसकी ओर देख, आज्ञा दी, कि सबोंकी प्रार्थनीया मनभावनी एक प्रमदा बनाओ। विश्वकर्मा उनको प्रणामकर आदरपूर्वक उनकी आज्ञा मानकर यत्न से बार बार सोच विचार कर एक सुन्दरी बाला बनाने लगा।१२।त्रिलोकभरमें दर्शनयोग्य परम सुन्दर जितने स्थावर जंगम पदार्थ हैं, विश्वकर्माने उन सबों से चुन चुन कर देवरूपी एक कामिनी बनाकर उस के अंगादि सम्पूर्ण शरीर को सजाकर उसको रत्नकी प्रतिमा बनाया।१४।विश्वकर्माके बडे प्रयत्नसे बनायी हुई वह कन्या ऐसी रूपवती बनी, कि तीनों भुवन में कोईभी नारी

and Upsund from beginning to end. The gods and Maharshis drew the attention of Brahma to the subject. Brahma considered for a while and having resolved upon the proper course to adopt, called Vishwakarma into his presence and ordered him to create a heart-enchanting woman.11. Vishwakarma obeyed the orders and gave his whole attention towards making a woman. Whatever aesthetics there are in the three worlds, among moveables and immoveable, Vishakarma selected from them suitable portions for her body and made her body as if it were a statue of jewels. The girl made by Vishwakarma was matchless in beauty. Even the slightest parts of her body were sufficient to entangle the heart of the beholder. Like Lakshmi herself the beauty of her person enchanted the eyes and hearts of

यद्गात्रेरूपसम्पदा । नियुक्तायत्रवादृष्टिर्न सज्जतिनिरीक्षताम् ॥ १६ ॥ साविग्रहवतीव श्रीःकामरूपावपुष्मती । जहारसर्वभूतानां चक्षूंषिचमनांसिच ॥ १७ ॥ तिलंतिलं समानीय रत्नानांयद्विनिर्मिता । तिलोत्तमेतितत्तस्यानाम चक्रेपितामहः ॥ १८ ॥ ब्रह्माणंसानमस्कृत्य प्राञ्जलिर्वाक्यमब्रवीत् । किंकार्य्यमयिभूतेश येनास्म्यद्येहनिर्मिता ॥ १९ ॥ पितामह उवाच । गच्छ सुन्दोपसुन्दाभ्यामसुराभ्यां तिलोत्तमे । प्रार्थनीयेन रूपेण कुरुभद्रप्रलोभनम् ॥ २० ॥ त्वत्कृतेदर्शनादेव रूपसम्पत्कृतेनवै । विरोधःस्या द्यथाताभ्यामन्योऽन्येनतथाकुरु ॥ २१ ॥ नारद उवाच । सातथेतिप्रतिज्ञाय नमस्कृत्यपितामहम् । चकारमण्डलंतत्र विबुधानांप्रदक्षिणम् ॥२२॥ प्राङ्मुखोभगवानास्ते दक्षिणेनमहेश्वरः । देवाश्चैवोत्तरेणासन् सर्वतस्त्वृषयोऽभवन् ॥ २३ ॥ कुर्वत्यातुतदा तत्रमण्डलंतत् प्रदक्षिणम् । इन्द्रःस्थाणुश्चभगवान् धैर्येणप्रत्यवस्थितौ ॥२४॥ द्रष्टुका-

उसकी उपमा के योग्य न रही, उसके शरीर भरमें ऐसा कोई सूक्ष्म स्थानभी न था, कि जिसपर देखनेवालेकी आंख पडनेसे उसके अपूर्व रूपकी शोभामें फंस नहीं जाताथा।१६। साक्षात लक्ष्मीकी भांति वह कामिनी हर प्राणीके नयन मन चुराने लगी विश्वकर्मा ने सम्पूर्ण रत्न बटोरकर तिल तिल चुनकर उस कन्याको बनायाथा, इसलिये पितामह ने उसका नाम तिलोत्तमा रक्खा।१८।अनन्तर तिलोत्तमा दोनों हाथ जोडकर ब्रह्माजी से बोली, कि हे भूतनाथ ! मुझको क्या करनाहोगा कहो, कि मैं क्यों साम्प्रत बनाई गई। पितामहबोले, कि तुम सुंद और उपसुंद दोनों असुरों के यहांचली जाओ, वहां जाकर सुंदर रूप दिखा उनको लुभानेकी चेष्टाकरो।२०।भद्रे ! ऐसी चेष्टा करो, कि वे तुम्हारे रूपकी सम्पद देखकर आपस में झगडाकरें । श्रीनारदजी बोले, कि अनन्तर तिलोत्तमा उनका कहना मानकर प्रतिज्ञा ठानकर पितामहके पांवपर सिरझुकाकर देवोंकी चारोंओर परिक्रमा देनेलगी।२२।उससमय भगवान पितामह पूर्वओर, महेश्वर दक्षिण ओर, दूसरे देव गण उत्तरओर और ऋषियोंने नानाओर को मुह फेरेथे, तिलोत्तमा जब परिक्रमा देती थी, तब इन्द्र और भगवान महेश्वर अतिधीरजधर अपने अपने स्थानों में बैठेथे। २४।

the beholders. Vishwakarma had made her entire frame a colletion of all jewels. The grand-father therefore named her Tilottama.18. She asked *Brahma* with joined palms, " What shall I have to do ? What for am I made ?" The grandfather replied, " Go to the house of *Sund* and Upsund and tempt them by your beauty. You must any how raise a quarrel among the brothers." Narad said that Tilottama promised to do accordingly after bowing at the feet of the Grand-father. At the time she was going round *Brahma* the gods turned their faces from her. Indra and Maheshwar could with great difficulty check their desire. Maheshwar was seated with his face towards

मस्यचात्यर्थं गतयापार्षतस्तया । अन्यदञ्चितपद्माक्षं दक्षिणंनिःसृतं मुखम् ॥ २५ ॥ पृष्ठतःपरिवर्त्तन्त्या पश्चिमंनिःसृतंमुखम् । गतयाचोत्तरंपार्श्वमुत्तरंनिःसृतं मुखम् ॥२६॥ महेन्द्रस्यापिनेत्राणां पृष्ठतःपार्श्वतोऽग्रतः । रक्तान्तानांविशालानां सहस्रंसर्वतोऽभवत् ॥ २७ ॥ एवंचतुर्मुखः स्थाणुर्महादेवोऽभवत् पुरा । तथासहस्रनेत्रश्च बभूववलसूदनः ॥ २८ ॥ तया देवनिकायानां महर्षीणांचसर्वशः । मुखानिचाभ्यवर्त्तन्त येनयातीतिलोत्तमा ॥ २९ ॥ तस्यागात्रेनिपतिताद्दृष्टिस्तेषां महात्मनाम् । सर्वेषामेवभूयिष्ठमृते देवंपितामहम् ॥ ३० ॥ गच्छन्त्यातुतयासर्वे देवाश्चपरमर्षयः । कृतमित्येवतत्कार्य्यं मेनिरे रूपसम्पदा ॥ ३१ ॥ तिलोत्तमायांतस्यान्तु गतायांलोकभावनः । सर्वान्विसर्ज्जयामास देवानृषिगणांश्चतान् ॥ ३२ ॥

इत्यादिपर्वणि राज्यलाभपर्वणि तिलोत्तमाप्रस्थाप
द्वादशाधिकाद्विशतोऽध्यायः ॥ २१२ ॥

महेश्वर के बडे वेगसे देखनेकी चाह होने पर तिलोत्तमा जब उनकी दक्षिण ओरको गई तब खिले पद्मपलाश समान नेत्रोंसे सुशोभित एक दक्षिण मुख निकल आया, तिलोत्तमा जब उन के पीछे गयी तब उनका एक पश्चिम मुख निकला, और वह बाला जब उत्तर ओर गयी, तब उनकी बाईओरसे एक मुख निकला।२६।महेंद्रकेभी देखनेकी चाहरखनेके कारण जब तिलोतमा उनकी परिक्रमा देती थी, तब उनके सामने पार्श्व में और पीठ पर सम्पूर्ण शरीरही में बडी बडी सहस्रलाल आंखें निकलीं हे पार्थ ! पूर्वकाल में इस प्रकार महादेवजी चतुर्मुख और वलसूदन सहस्रनेत्रयुक्तहुए।२८।और परिक्रमा के काल तिलोतमा जिस जिस ओर को जाती थी, देव और महर्षियों के मुख उस उस ओर को घूम जातेथे उस काल में उस ब्रह्मसभा में जो जो उपस्थित थे उन में केवल पितामह के बिना सब महात्माओंकी दृष्टि उस नारीकी देहपरपडीथी।३०।जब तिलोतमा जानेलगी, तब सम्पूर्ण देव और परमर्षियों ने उस के रूपका उजाला देख अभीष्टकामना को सिद्ध जाना तिलोतमा के देवकार्य साधन को चलेजाने पर लोकभावन हिरण्य गर्भ ने सम्पूर्ण देव और ऋषियों को विदा किया ॥ ३२ ॥

the east but as she went round three other faces sprang up towards South, West, and North with a desire to see her again and again. Mahendra himself had a thousand eyes opened in all parts of his body ! Mahadeo thus came to have four faces and Indra thousand eyes ! The faces of the gods and Rishis were turned to whatever direction she went. All eyes were turned towards her except those of the grand-father and all believed that they had been fortunate to see her with their eyes. After the departure of Tilottama to do the work of gods, *Brahma* dismissed the audience.32.

नारद उवाच। जित्वातुपृथिवींदैत्यौ निःसपत्नौगतव्यथौ । कृत्वात्रैलोक्यमव्यग्रं कृतकृत्यौबभूवतः ॥ १ ॥ देवगन्धर्वयक्षाणां नागपार्थिवरक्षसाम्। आदायसर्वरत्नानि परांतुष्टिमुपागतौ ॥ २ ॥ यदानप्रतिषद्धारस्तयोः सन्तीहकेचन। निरुद्योगौतदाभूत्वा विजह्रातेऽमराविव ॥ ३ ॥ स्त्रीभिर्माल्यैश्च गन्धैश्च भक्षभोज्यैःसुपुष्कलैः। पानैश्चाविविधैर्हृद्यैःपरांप्रीति मवापतुः ॥ ४ ॥ अन्तःपुरवनोद्याने पर्वतेषुवनेषुच । यथेप्सितेषुदेशेषु विजह्रातेमरावित्र ॥ ५ ॥ ततःकदाचिद्विन्ध्यस्य प्रस्थे समशिलातले । पुष्पितोग्रेषु शालेषु विहारमभिजग्मतुः ॥ ६ ॥ दिव्येषुसर्वकामेषु समानीतेषुतावुभौ । वरासनेषु संहृष्टौसहस्त्रीभिर्निषीदतुः ॥७॥ ततो वादित्रनृत्याभ्यामुपातिष्ठन्त तौस्त्रियः। गीतैश्च स्तुतिसंयुक्तैः प्रीत्यासमुपजग्मिरे ॥ ८ ॥ ततस्तिलोत्तमातत्र वनेपुष्पाणिचिन्वती ।

अध्याय ॥ २१३ ॥

गाण्डीवंधनुरादाय तथाक्षय्येमहेषुधी । अहमप्युत्सहेलोकान विजेतुंयुधि पावक ॥ ३१ ॥ सर्वतःपरिवार्यैवं दावमेतंमहाप्रभो । कामंसम्प्रज्वलाद्यैव कल्योस्वः साह्यकर्मणि ॥३२ ॥ वैशम्पायन उवाच । एवमुक्तःसभगवान् दाशार्हेणार्जुनेनच । तैजसंरूपमास्थाय दावंदग्धुंप्रचक्रमे ॥ ३३ ॥ सर्वतःपरिवार्य्याथ सप्तार्च्चिर्ज्वलनस्तथा । ददाहखाण्डवंदावं युगान्तमिवदर्शयन् ॥ ३४ ॥ प्रतिगृह्यसमाविश्य तद्वनंभरतर्षभ । मेघस्तानितनिर्घोषः सर्वभूतान्यकम्पयत् ॥ ३५ ॥ दह्यतस्तस्यचबभौ रूपंदावस्यभारत । मेरोरिवनगेन्द्रस्य कीर्णस्यांशुमतोंऽशुभिः ॥ ३६ ॥ इत्यादिपर्वणि खाण्डवदाहपर्वणि गाण्डीवादिदाने षड्विंशत्यधिकद्विशतोऽध्यायः ॥ २२६ ॥

मैं भी यह अक्षय तूणीर और गाण्डीव धनुष लेकर सम्पूर्ण लोक परास्त करने का साहस कर सकता हूं सो आप आजही इच्छा नुसार इस बडे वनको सम्पूर्ण रूपसे घेर कर जलावें, हम आपको सहारा देनेको समर्थ हुए हैं ।३२। वैशम्पायनने कहा, कि गभवान हुताशन अर्जुन और श्रीकृष्णचन्द्र के यह वचन सुनकर पावक तैजसका रूपधारणकर उस वनको जलाने लगे । तब वह सात शिखा फैलाकर सब ओर फैलकर खाण्डववन जलाने लगे । उस काल में जान पडनेलगा, कि मानो युगके अंतहोने का काल प्रकटित होरहाहै हेभरतश्रेष्ठ प्रज्वलित अग्निदेव उस बडेभारी वनको पकड कर उस में घुसकर बादलकी गडगडाहटकी भांति भयानक शब्दसे सब प्राणियोंको थरथरानेलगे । हेभारत ! तब जलतेहुए उस वनने सूर्यकी किरणोंसे रंगेहुए सुमेरुपर्वतका स्वरूप धारण किया।३६।

self stronger than gods, Danavas, Rakshases Pishachas, Nagas, and men at the time of battle. This weapon thrown again and again will destroy the enemies without resistance and will return to you.26. Varun made him the present of a mace, the destroyer of Daityas, and dreadful like Vajra. Dexterous in the use of weapons, Arjun and Krishn, having got the chariot with standard and arms, said cheerfully to Agni, " We are now prepared to fight against gods and Asurs. To encounter Indra alone wishing to protect the serpent is nothing to us."29.There is nothing in the world which Janardan cannot destroy in battle by the help of this discus. I dare challenge the whole world with this bow and the inexhaustible quivers of arrows. You may burn the forest to day and surround it on all sides. We are now able to help you.32.Vaishampayan said that having heard this from Krishna and Arjun, Agni assumed his proper shape and began to burn the forest. Spreading his seven flames throughout the forest he surrounded it on all sides. It appeared as if the world was coming to an end. The burning fire having caught the extensive forest, entered into the heart of it and trembled the hearts of the inmates by its dreadful uproar. The forest, then looked like Mount Meru coloured by the rays of the Sun.36.

वैशम्पायन उवाच । तौरथाभ्यांरथिश्रेष्ठौ दावस्योभयतःस्थितौ । दिक्षुसर्वासु भूतानां चक्राते कदनंमहत् ॥ १ ॥ यत्रयत्रचदृश्यन्ते प्राणिनःखाण्डवालयाः । पलायन्तःप्रवीरौतौ तत्रतत्राभ्यधावताम् ॥ २ ॥ छिद्रंनस्मपश्यन्ति रथयोराशुचारिणोः । आविद्धावेवदृश्येते रथिनौतौरथोत्तमौ ॥ ३ ॥ खाण्डवेदह्यमानेतु भूताःशतसहस्रशः । उत्पेतुर्भैरवान्नादान् विनदन्तः समन्ततः ॥ ४ ॥ दग्धैकदेशावहवो निष्टप्ताश्चतथापरे । स्फुटिताक्षाविशीर्णाश्च विप्लुताश्चतथापरे ॥ ५ ॥ समालिङ्ग्यसुतानन्ये पितॄन् भ्रातॄनथापरे । त्यक्तुंनशेकुःस्नेहेन तत्रैवनिधनंगताः ॥ ६ ॥ सन्दष्टदशनाश्चान्ये समुत्पेतुरनेकशः । ततस्तेऽतीवघूर्णन्तः पुनरग्निंप्रपेदिरे ॥ ७ ॥ दग्धपक्षाक्षिचरणा विचेष्टन्तोमहीतले । तत्रतत्रस्मदृश्यन्ते विनदन्तःशरीरिणः ॥ ८ ॥ जलाशयेषुतप्तेषु

अध्याय २२७ ॥

वैशम्पायन ने कहा कि अनन्तर रथियों में श्रेष्ठ श्रीकृष्ण और अर्जुन रथपरचढ़ कर उस बनकी दोनों ओर रहकर चारों ओरके प्राणियों को नष्ट करने लगे । खाण्डव-वासी प्राणी जहां जहां भागते दीखपडे वे दोनों वीर तहां तहां दौड़नेलगे । २ । वे दोनों महारथी रथपर चढ़कर बन के चारों ओर इतना शीघ्र फिरने लगे, कि दोनों रथ आपस में जुड़ेहुए जानपडनेलगे, उन में विछोह दीख नहीं पड़ा । खाण्डव बन के जलने से सैकड़ों सहस्रों प्राणी बड़ा कोलाहल मचातेहुए चारों ओर गिरने लगे ।४। किसी किसी का एक एक अंग जलगया, कोई कोई अति ताप से जल भुनकर गिरगया, किसी किसी जन्तुकी आंखें फूटगयीं, कोई कोई दुबलाहोगया, कोई भय से दौड़ने लगे, किसी किसी प्राणीने बच्चे से, किसी किसीने पितासे किसी किसी ने भाईसे लिपटकर वासस्थलही में प्राण छोड़े, पर स्नेह वश उनको छोड़ नहीं सके।६।कोई२ देहधारी दांत से दांत पीसता अनेक वार गिरता पड़ता और बहुत चक्कर खाता फिर आग में गिरने लगा । कोई पंख जलने, कोई नेत्र जलने अथवा कोई पांव जलने पर मृतदीख पड़नेलगा ।८। वहांके

CHAHTER CCXXVII

Vaishampayan said that the best of charioteers Krishna and Arjun, having mounted their chariots, began to kill the inmates of the forest from all sides. They ran into whatever direction they saw the inmates of the forest running.2. Both Maharathis drove so fast round the forest as to seem that their chariots were joined together. There was no separation seen between the two. Hundreds and thousands of living beings were seen falling into that burning forest.4.Some were burnt in one part of the body, others were burnt altogether; some of the animals lost their eyes, others looked lean and were seen flying hither and thither. Some were clasping their young ones, others were clasped by their parents or

काष्ठगमानेषुवह्निना । गतसत्त्वाःस्मदृश्यन्ते कूर्ममत्स्याःसमन्ततः ॥ ९ ॥ शरीरैरपरे-
हीनैर्देहवन्त इवाग्नयः । अदृश्यन्तवनेतत्र प्राणिनःप्राणिसंक्षये ॥ १० ॥ कांश्चिदुत्पत
तःपार्थः शरैःसञ्छिद्यखण्डशः । पातयामासविहगान् प्रदीप्तेवसुरेतसि ॥ ११ ॥
तेशराचितसर्वाङ्गा निनदन्तोमहारवान् । ऊर्ध्वमुत्पत्यवेगेन निपेतुःखाण्डवेपुनः ।१२
शरैरभ्याहतानांच संघशःस्मवनौकसाम् । विरावःशुश्रुवेघोरः समुद्रस्येवमथ्यतः ।१३
वह्नेश्चापिप्रदीप्तस्य खमुत्पेतुर्महार्चिषः । जनयामासुरुद्वेगं सुमहान्तंदिवौकसाम् ।१४।
तेनार्चिषासुसन्तप्ता देवाःसर्षिपुरोगमाः । ततोजग्मुर्महात्मानः सर्वएवदिवौकसः ।
शतक्रतुंसहस्राक्षं देवेशमसुरार्दनम् ॥ १५ ॥ देवा ऊचुः । किन्विमेमानवाःसर्वे दह्य-
न्तेचित्रभानुना । कच्चिन्नसंक्षयःप्राप्तो लोकानाममरेश्वर ॥ १६ ॥ वैशम्पायन उवाच ।
तच्छ्रुत्वावृत्रहातेभ्यः स्वयमेवान्ववेक्ष्यच । खाण्डवस्यविमोक्षार्थं प्रययौहरिवाहनः ।

जलाशय अग्नि से तपने और उबल उठनेसे मछली कछुए आदि प्राणी इधर उधर मरे दिखाई देनेलगे । उस वन में देहियोंकी जो सब देह जली वह सब जली देह मानों भांति भांतिकी अग्निदेह के समान प्रतीतहोतीथी ।१०। उस वन से जो सब पक्षी उछल रहेथे, अर्जुन उनको बाणों से टुकडे टुकडे कर जलतेहुए अग्नि में गिराने लगे । बेप्राणी देह काटे जाने से बड़ा कोलाहलमचाते हुए वेगसे कुछ ऊपर चढकर फिर उसखाण्डव वनहीमें गिरनेलगे ।१२। समुद्र मथने के काल में जैसा घोरशब्द उठाथा वैसेही बाणोंसे घायल बनेले जानवरों का बड़ा कोलाहल सुन पड़ने लगा और जलतेहुए अग्निकी बड़ी बड़ी शिखायें देवों को घबराहट में डालनेवाली बन कर आकाश मण्डल में छागई।१४।अनन्तर महात्मा देवगण उस अग्निकी शिखाओंसे बहुत तपकर पुर में बसे ऋषियों के साथ असुरनाशी सहस्र नेत्र शतक्रतु सुरनाथ के पास गये और बोले, कि हे अमरनाथ ! क्या अग्नि इन अमरवृन्दको जला रहाहै क्या अब हम सब लोगोंका प्रलय काल आगयाहै।१६।वैशम्पायनने कहा, कि सिंहपर चढेहुए वृत्रनाशीने उन से वहसुनकर

brothers. They lost their lives, but did not leave them. 6. Some of the inmates gnashed their teeth in rage and fell reeling into the burning fire. Some had their feathers, eyes, or feet burnt and looked like dead.8. The resceptacles of water being heated by fire, their fish and tortoises were dead. The burning bodies of the inmates of the forest looked like bodies of fire.10.The birds trying to escape from fire were shot down by Arjun and fell again into fire. The wounded animals flew up with a great noise and fell down again. The noise of the wounded animals resembled that of the churning of the ocean and the flames of fire reaching the sky were terrifying to the gods.14.The gods feeling much the flames of fire went with rishis to Indra of thousand eyes and said, "Will fire burn down all

॥ १७ ॥ महतारथवृन्देन नानारूपेणवासवः । आकाशंसमवाकीर्य्य प्रववर्षसुरेश्वरः ॥ १८ ॥ ततोऽक्षमात्राण्यसृजन् धाराःशतसहस्रशः । चोदितादेवराजेन जलदाःखाण्डवंप्रति ॥ १९ ॥ असंप्राप्तास्तुता धारास्तेजसा जातवेदसः । खएवसमशुष्यन्त नकाश्चित्पावकंगताः ॥ २० ततोनमुचिहाक्रुद्धो भृशमर्च्चिष्मतस्तदा । पुनरेवमहामेघैरम्भांसि व्यसृजद्बहु ॥ २१ ॥ अर्चिर्द्धाराभिसम्बद्धं धूमविद्युत्समाकुलम् । बभूवतद्वनंघोरं स्तनयित्नुसमाकुलम् ॥ २२ ॥

इत्यादिपर्वणि खाण्डवदाहपर्वणि इन्द्रक्रोधे सप्तविंशत्यधिकद्विशतोऽध्यायः ॥२२७॥

वैशम्पायन उवाच । तस्याथवर्षतोवारि पाण्डवःप्रत्यवारयत् । शरवर्षेणबीभत्सुरुत्तमास्त्राणि दर्शयन् ॥ १ ॥ खाण्डवश्चवनंसर्वं पाण्डवौबहुभिःशरैः । प्राच्छा

सुनकर और स्वयं देखकर खाण्डववनकी रक्षाके लिये चल निकले।१८। उन्हों ने अनेक

महारथों से आकाशमण्डल को छाकर जल बर्षाना आरम्भ कर दिया । सैकडों बादल देवराजकी आज्ञा से खाण्डववन पर रथके पहियेकी लकड़ी के समानमोटी धारसे जल बर्षाने लगे । सब मोटीधार अग्नि के तेजसे आकाशहीमें सूखगयीं, एकभी धार अग्नि पर गिर नहीं सकी ।२०। तब नमुचि सूदन इन्द्र बहुत क्रोधकर फिर बडे२ बादलों से अग्नि के ऊपर बहुत जल बर्षाने लगे । तब वह बडाभारी वन अग्निशिखा और जलधारा से गीला धुआं और बिजली से मिला और ऊपरके बादलोंसे घिरा प्रकट होकर बड़ा भयानक दीख पडने लगा ॥ २२ ॥

अध्याय २२८ ॥

वैशम्पायन ने कहा, कि अनन्तर पाण्डुनन्दन अर्जुन ने देवराज को उस प्रकार जल बर्षाते देखकर अपने उत्तम अस्त्र प्रकटकरके बाण बर्षाकर उसको रोका । चन्द्रमा जिसप्रकार ओस से जग को छा देताहै वैसेही अमेयात्मा पाण्डुनन्दनने सैकडों बाणों से

the gods?Has our end come?" 16. Vaishampayan said that the destroyer of Vritra having heard this from them saw it himself and riding his lion started to save the forest from being burnt. He began to pour down rain from the sky. Hundreds of clouds began to pour torrents of rain thick as the spokes of a wheel, but all the water was dried up in the way by the heat of fire and did not reach the earth. Indra was angry and rained yet harder. Then the great forest from the flames of fire and torrent of rain was changed into a column of smoke and surrounded by clouds and lightning was dreadful to behold.22.

CHAPTER CCXXVIII

Vaishampayan said that Arjun the son of Pandu, seeing Indra's downpour of that excessive rain, obstructed it by his arrows. The

दयदमेयात्मानीहारेणेव चन्द्रमाः । २ ॥ नचस्मकिंचिच्छक्नोति भूतंनिश्चरितुंततः । सञ्छाद्यमानेखे बाणैरस्यतासव्यस चिना ।' ३ ॥ तक्षकस्तुन तत्रासीन्नागराजो महाबलः । दह्यमानेवनेतस्मिन कुरुक्षे तोहिस ॥ ४ ॥ अश्वसेनोऽभवत्तत्र तक्षकस्य सुतोबली । सयत्नमकरोत्तीव्रं मोक्षा नातवेदसः ॥ ५ ॥ नशशाकसनिर्गंतुं निरुद्धो ऽर्जुनपत्रिभिः । मोक्षयामासतंमाता निगीर्य्यभुजगात्मजा ॥ ६ ॥ तस्यपूर्वंशिरोग्रस्तं पुच्छमस्यनिगीर्य्यते । निगीर्य्यमाणा साक्रामत्सुतं नागीमुमुक्षया ॥ ७ ॥ तस्याःशरेणतीक्ष्णेन पृथुधारेणपाण्डवः । शिरश्चिच्छेद गच्छन्त्यास्तामपश्यच्छचीपतिः ॥८॥ तंमुमोचयिषुर्वज्री वातवर्षेणपाण्डवम् । मोहयामास तत्कालमश्वसेनस्त्वमुच्यत ॥९॥ तांचमायांतदादृष्ट्वा घोरांनागेनवांचितः । द्विधात्रिधाचखगतान् प्राणिनः पाण्डवोऽच्छिनत् ॥ १० ॥ शशापतञ्चसंक्रुद्धो बीभत्सुर्जिह्मगामिनम् । पावकोवासुदेवश्चाप्यप्र-

सम्पूर्ण खाण्डव बनको छिपाया । २ । वहांका आकाशमण्डल सव्यसाची धनञ्जय के फेंके बाणों से ऐसा ढंपा, कि कोई प्राणी वहां से निकल नहीं सका । पर महाबली सर्पराज तक्षक उससमय वहां नहीं था । जब खाण्डवदाह आरम्भहुआ था, तब कुरुक्षेत्र में गया था ।४। उसका पुत्र बली अश्वसेन वहां था । तक्षक के उस पुत्र ने अग्नि से निकलनेकी बडी चेष्टाकी, पर अर्जुन के बाणों से बँधुआबनकर निकल नहीं सका । आगे उसकी माता सर्पकन्या ने उसको निगलकर बचाया ।६। नागकन्या उसे बचानेकी चाह से उस का सिर निगलकर उसकी पूंछको निगलतीहुई आकाशमार्ग से निकल रही थी, ऐसे समय में अर्जुनने उसको देख चौडी नोकवाले तेजबाणसे उस सर्पिनका सिर काटडाला शचीनाथ ने यह देखकर अश्वसेन को बचाने के लिये उसीक्षण पवन चलाकर अर्जुनको मोहमें डाला । उस अवसर में अश्वसेन बचकर भागा ।९। अर्जुनने तब उस सर्पसे ठगे जाकर और वह माया देखकर आकाश तक पहुंचेहुए भयानक प्राणियों को काटकर

great son of Pandu covered the whole forest of Khandav as the moon does the earth by dew. The firmament over the forest was so covered by Arjun's arrows as to leave no place for the inmates of the forest to get out. 3. Takshak the powerful prince of serpents was not there at that time. He was gone to Kurukshetra before the commencement of the burning, but his brave son Ashwasen was there. He tried, his best to get out of the forest but could not do so on account of the network of Arjun's arrows. His mother, the daughter of a snake, swallowed him and was flying to save him when she was seen by Arjun and her head was cut off by his arrow. Seeing this Indra wished to save the son of Takshak and with a blow of the wind made Arjun insensible. In the meantime Ashwa-

तिष्ठोभविष्यसि ॥ ११ ॥ ततोजिष्णुःसहस्राक्षं खंचितत्याशुगैःशरैः । योधयामास संक्रुद्धो वञ्चनांतामनुस्मरन् ॥ १२ ॥ देवराजोऽपितंदृष्ट्वा संरब्धंसमरेऽर्जुनम् । स्वमस्त्रमसृजत्तीव्रं छादयित्वाखिलंनभः ॥ १३ ॥ ततोऽवायुर्महाघोषः क्षोभयन्सर्वसागरान् । वियत्स्थांजनयन्मेघान् जलधारासमाकुलान् ॥ १४ ॥ ततोऽशनिमुचोघोरांस्तडितस्तनितनिःस्वनान् । तद्विघातार्थमसृजदर्जुनोऽप्यस्त्रमुत्तमम् ॥ १५ ॥ वायव्यमभिमन्त्र्याथ प्रतिपत्तिविशारदः । तेनेन्द्राशनिमेघानां वीर्य्यौजस्तद्विनाशितम् । ॥ १६ ॥ जलधाराश्चताःशोषं जग्मुर्नेशुश्चविद्युतः । क्षणेनचाभवद्व्योम सम्प्रशान्त रजस्तमः ॥ १७ ॥ सुखशीतानिलवहं प्रकृतिस्थार्कमण्डलम् । निष्प्रतीकारहृष्टश्च हुतभुग्विविधाकृतिः ॥ १८ ॥ सिच्यमानोवसौघैस्तैः प्राणिनांदेहनिःसृतैः । प्रजज्वाला

दो२ तीन२ टुकडे करदिया।१०।बीभत्सु, वासुदेव और पावकने बहुतक्रोधकर उस कुटिल गामी सर्प को शाप दिया, कि तुम्हारी प्रतिष्ठा जाती रहेगी । अनन्तर पाण्डुपुत्र ने उस वञ्चना को स्मरणकर क्रोध से तुरन्त दौडनेवाले वाणों से आकाश मंडलको छा सहस्र नेत्र से लडाई मचायी ।१२। देवराज नेभी उनको युद्धमें कटिबद्ध देखकर अपना तीक्ष्ण अस्त्र छोडकर आकाश मण्डल को छा लिया । अनन्तर पवन ने बडे शब्द के साथ फैल कर सम्पूर्ण समुद्रमें हलचल मचाकर अति घोर बादल वृंद उपजाये१४उन सब बादलों से उसस्थान में बिजली वज्राघात और गडगडाहट के साथ जलधारा वर्षनेलगी । प्रति विधानकी शक्ति रखनेवाले अर्जुन ने उन सबको दूर करने के लिये सुन्दर वायव्यास्त्र मन्त्र पढकर छोडा, उससे इन्द्रके उसवज्र और बादलोंका वीर्य तथा तेज नष्टहुआ।१६। और जलधारा सूखी तथा बिजली नष्टहुई पल भर में आकाश मण्डल गर्द और अंधेरी से साफहोगया । सुखदाई ठण्डी हवा चलने लगी और सूर्य मण्डलने पहिलेकी प्रकृति प्राप्तकी ।१८। तब अग्नि बिना रोक टोक देहियोंकी देहसे निकलीहुई चर्बीसे औरभी प्रबल होकर आनन्दकी उमंग में नाना आकार धरकर और बडे शब्द से जगभर में शिखायें

sen escaped. Being cheated by the serpent and seeing the delusion, Arjun cut the animals to pieces by his arrows reaching the sky.10. Arjun, Vasudev and Agni cursed the serpent in anger saying that he would lose his respect. Remembering Indra's cunningness, Arjun let fly his sharp arrows towards him and overcast the sky with them. Indra seeing the attitude ofArjun darkened the sky with his weapon. The wind blew with great force and having agitated the water of the ocean brought over a thick storm of clouds.14.Lightning, thunder and a storm of rain came out from the clouds. Having the power of counteracting, Arjun shot his air-weapon and the force of Indra's clouds and lightning abated. Rain and lightning ceased and the sky was cleared of dust and darkness. A refreshing breeze

थ सोऽर्चिष्मान् स्वनादैःपूरयन्जगत् ॥ १९ ॥ कृष्णाभ्यांरक्षितंदृष्ट्वा तंवद्दावमहंकृताः । खमुत्पेतुर्महाराज सुपर्णाद्याःपतत्रिणः ॥ २० ॥ गरुत्मानवज्रसदृशैः पक्षतुण्डनखैस्तथा । महर्तुकामोन्यपतदाकाशात् कृष्णपाण्डवौ ॥ २१ ॥ तथैवोरगसंघाताः पाण्डवस्यसमीपतः । उत्सृजन्तोविषंघोरं निपेतुर्ज्वलिताननाः ॥ २२ ॥ तांश्चकर्त्तशरैः पार्थः स्वरोषाग्निसमुक्षितैः । विविशुश्चापितंदीप्तं देहाभावायपावकम् ॥ २३ ॥ ततोसुराः सगन्धर्वा यक्षराक्षसपन्नगाः । उत्पेतुर्नादमतुलमुत्सृजन्तो रणार्थिनः ॥ २४ ॥ अयःकणपचक्राश्मभुशुण्ड्यद्यतबाहवः । कृष्णपार्थौजिघांसन्तः क्रोधसंमूर्च्छितौजसः ।२५। तेषामतिव्याहरतां शस्त्रवर्षमुमुञ्चताम् । प्रममाथोत्तमाङ्गानि बीभत्सुर्निशितैःशरैः ॥ २६ ॥ कृष्णश्च सुमहातेजाश्चक्रेणारिविनाशनः । दैत्यदानवसंघानां चकारकदनं

फैलाकर जल उठा । हे महाराज ! सुपर्ण आदि पतत्रीगण श्रीकृष्ण और अर्जुन से उस खाण्डव दावानलको रक्षित होते देखकर अहंकारसे आकाशको उडे।२०।और वज्रसमान पंख चोंच और नखों से वासुदेव और धनंजय को मारनेकी इच्छा से आकाशसे नीचे उतर आये तथा जलते हुए मुखवाले विषैले सर्पगण कठोर विष गिराते हुए पाण्डव के सामने आ गिरे ।२२। आगे पाण्डुनन्दनने क्रोधकी आगसे सुलगेहुए बाणोंसे उन सबको काट डाला, सो वे देहको नष्ट करने के लिये भलेप्रकार जलतेहुए अग्नि में जा गिरे अनन्तर असुर, गन्धर्व, यक्ष, राक्षस और पन्नगगण लडने के लिये बड़ाकोलाहलमचाते हुए दौडे । क्रोधके मारे तब उनका तेज बढनेलगा।२४।वे अयःकणप अर्थात् लोहेकी गेंद गिराने का यंत्र और चक्राश्म अर्थात् पत्थर के टुकडों को बडी दूर फेंकने का लकडीका बना यंत्र, भुशुण्डी अर्थात् पत्थर फेंकने का चमडेकी रस्सीसे बनाहुआ यंत्र, यह सब अस्त्र लेकर हाथ उठाकर श्रीकृष्ण और अर्जुन को नष्ट करने के लिये उद्यत हुए । बीभत्सु उनको अयोग्य वचन कह कहकर बाण वर्षाते देखकर चोखे बाणों से उन के सिर मथनेलगे।२६।शत्रुकुलनाशी बडे तेजस्वी श्रीकृष्णचक्र से उन सब दैत्य दानवोंकोनष्ट

began and the sun shone as before.18.Agni became stronger by the fat of the animals and spreading his flames in various forms began to burn the forest yet faster. Winged animals seeing the burning forest protected by Krishna and Arjun flew towards the sky and then came down to attack them by their beak and talon. Venomous serpents fell down before the Pandava and were cut down by his arrows and thrown into the fire to be burnt. Asurs, Gandharvas, Yakshas, Rakshases and Pannagas came up to fight with great noise and anger. They attacked Arjun and Krishna with various weapons and had their heads cut off by Arjun's arrows or Shree Krishn's discus. Some of the powerful Daityas and Danavas, wounded by the arrows and discus lost courage and became immovable like pieces of

महत् ॥ २७ ॥ अथापरे शरैर्विद्धाश्चक्रवेगैरितास्तथा । वेलामिवसमासाद्य व्यतिष्ठन्न मितौजसः ॥ २८ ॥ ततः शक्रोऽतिसंक्रुद्धस्त्रिदशानां महेश्वरः । पाण्डुरङ्गजमास्थाय तावुभौसमुपाद्रवत् ॥ २९ ॥ वेगेनाशनिमादाय वज्रमस्त्रञ्चसोऽसृजत् । हतावेतावि तिप्राह सुरानसुरसूदनः ॥ ३० ॥ ततःसमुद्यतांदृष्ट्वा देवेन्द्रेणमहाशनिम् । जगृहुःसर्व शास्त्राणि स्वानिस्वानिसुरास्तथा ॥ ३१ ॥ कालदण्डंयमोराजन् गदाञ्चैवधनेश्वरः पाशांश्चतत्रवरुणो विचित्रांचतथाशनिम् ॥ ३२ ॥ स्कन्दःशक्तिंसमादाय तस्थौमेरु-रिवाचलः । ओषधीर्दीप्यमानाश्च जगृहातेऽश्विनावपि ॥ ३३ ॥ जगृहेचधनुर्द्धाता मुसलन्तुजलस्तथा । पर्वतञ्चापिजग्राह क्रुद्धस्त्वष्टामहाबलः ॥ ३४ ॥ अंशस्तुशक्तिं जग्राह मृत्युर्देवःपरश्वधम् । प्रगृह्यपरिघंघोरं विचचारार्य्यमाअपि ॥ ३५ ॥ मित्रश्च क्षुरपर्य्यन्तं चक्रमादायतस्थिवान् । पूषाभगश्चसंक्रुद्धः सविताचविशाम्पते ॥ ३६ ॥

करने लगे । कोई कोई अति बली दैत्य दानव शरों से विद्ध और चक्रसे घायलहो उत्साह छोड ऐसे चुपहुए, कि जैसे जलके सोते में लहरकी चोटसे घूमते हुए तिनके स्थिरहोते हैं । २८ । अनन्तर देवों के अधीश असुरसूदन इंद्र अति क्रोधकर पाण्डुवरण गज पर चढकर धनंजय और श्रीकृष्ण पर चढ आये और वेग से अमोघ अस्त्र लेकर उन पर छोडने को उद्यतहोकर देवोंसे बोले, कि अब यह दोनों मरेंगे ।३०। देवों ने देवराज को महावज्र उठाते देखकर सब ने अपना अपना अस्त्र लेलिया । हेमहाराज ! यमराज कालदण्ड लेकर खडेहुए, धननाथने गदाली, वरुणने पाश और विचित्र वज्रलिया, स्कन्द शक्ति लेकर अचल गिरि मेरुकी भांति खडे हुए, दोनों अश्विनीकुमार हाथों में दीप्यमान औषधि लेकर खडेहुए, धाताने धनुष लिया, जलने मूसल लिया, महाबली त्वष्टा ने रिसाकर पर्वत उठाया, सूर्य का अंश हाथों में देव शक्ति लेकर लडनेको उद्यत हुआ । मृत्यु ने देव परश्वध लिया, आर्यमा घोर परिघ लेकर घूमने लगे । ३५ । और मित्र अस्तुर के समान नोकदार चक्र लेकर खडे रहे । हे नरपाल ! भग, पूषा और सविता

straw, beaten by the current of water. 28. Then the chief of gods, Indra the destroyer of enemies attacked Krishna and the Pandav and being ready to destroy them by his unfailing weapons said to the gods, "They will die this time."30.The gods seeing Indra ready to raise the *Vajra* took up their own weapons. Yamraj stood up with the staff of death, Kuver with his mace, Varun with his noose and mace, Skand with his *Shakti* stood up like Mount Meru. The twin Aswins stood up medicines in their hands, Dhata took up his bow, Jal his Moosal, powerful Twashtha raised up a hill in anger, the Sun took up the godly *Shakti* in his hand,the god of death took up his parashwadh, Aryama was roaming with his *Parigh* and Mitra stood up with his *Chakra* sharp edged like a razor. Bhag Poosa and *S*avita attacked Arjun and *S*hree Krishn

आत्तकार्मुकनिस्त्रिंशाः कृष्णपार्थौमदुद्रवुः । रुद्राश्चवसवश्चैव मरुतश्चमहाबलाः ॥३७
विश्वेदेवास्तथासाध्या दीप्यमानाःस्वतेजसा । एतेचान्येचबहवा देवास्तौपुरुषोत्तमौ
॥ ३८ ॥ कृष्णपार्थौजिघांसन्तः प्रतीयुर्विविधायुधाः । तत्राद्भुतान्यदृश्यन्त निमित्ता
निमहाहवे ॥ ३९ ॥ युगान्तसदृशानि भूतसंमोहनानिच । तथादृष्ट्वासुसंरब्धं शक्रं
देवैर्महाद्युतौ ॥ ४० ॥ अभीतौयुधिदुर्द्धर्षौ तस्थतुःसज्यकार्मुकौ । आगच्छतस्ततो
देवानुभौयुद्धविशारदौ ॥ ४१ ॥ व्यताडयेयांसंक्रुद्धौ शरैर्वज्रोपमैस्तदा । असकृ-
द्भग्नसङ्कल्पाः सुराश्चबहुशःकृताः ॥ ४२ ॥ भयाद्रणंपरित्यज्य शक्रमेवाभिशिश्रियुः ।
दृष्ट्वानिवारितान्देवान् माधवेनार्जुनेनच ॥ ४३ ॥ आश्चर्य्यमगमंस्तत्र मुनयोनभसि
स्थिताः । शक्रश्चापि तयोर्वीर्यमुपलभ्यासकृद्रणे ॥ ४३ ॥ बभूवपरमप्रीतो भूयश्चैताव
योधयत । ततोऽश्मवर्षं सुमहद्व्यसृजत्पाकशासनः ॥ ४५ ॥ भूएवतदावीर्य्यं जिज्ञासुः
सव्यसाचिनः । तच्छरैरर्जुनोवर्षं प्रतिजघ्नेऽत्यमर्षितः ॥ ४६ ॥ विफलंक्रियमाणं तत्

भयानक धनुष और निस्त्रिंश लेकर क्रोध से अर्जुन और श्रीकृष्णकी ओर दौडे अपने तेज से जलनेवाले महाबली रुद्रगण, वसुगण, मरुद्गण, विश्वेदेवगण, और साध्यगण, यह और दूसरे अनेक देवगण भांति भांति के अस्त्र लेकर पुरुषोत्तम श्रीकृष्ण और अर्जुनको नष्ट करने के लिये चढदौडे ।३९। तब युग अन्तहोनेके कालकी भांति भूतों को मोहनेवाले आश्चर्य नक्षत्र पतन आदि बुरे बुरे चिन्ह प्रगटहोने लगे। युद्धमें अति कठोर अर्जुन और श्रीकृष्ण देवों के साथ देवराज को युद्ध में सबप्रकार से सन्नद्ध देखकर सज्ज शरासन लेकर निर्भय और अटल चित्त से खडेहुए युद्ध में दक्ष वे दोनों वीर सब आये हुए देवोंको वज्रसमान बाणों से क्रोधपूर्वक सबप्रकारसे पछाडनेलगे ।४१। अनन्तर देवोंने कृष्णार्जुनसे बारम्बार सबप्रकार संकल्प खोकर भय खाकर युद्धस्थल को छोडकर देवराजकी शरणली । आकाशमें खडे मुनियों ने देवों को कृष्णार्जुन के आगे पीठदिखाते अचरज माना । अर्जुन और श्रीकृष्णका रणस्थल में वार वार भुजवीर्य का प्रमाणपाकर देवराज बहुतप्रसन्नहुए, और फिर लडनेलगे।४३।तब वह सव्यसाची धनंजयकी सामर्थ्य

with their bows and arrows. The glorious Rudras, the Vasus, the Marutas, the Vishwedevas, the Sadhyas and other gods, with weapons, attacked Krishna and Arjun.39.Bad signs like the falling of stars at the end of the world were then seen. Brave Arjun and Shree Krishna, seeing the chief of gods ready to fight, stood up unmoved without hesitation and began to defeat the gods in anger with their arrows.41.The gods,defeated again and again,sought the protection of Indra. The *Munis* in the sky were astonished to see the gods defeated by Krishna and Arjun and the chief of gods was much pleased at the sight of their prowess and began to fight

समवेक्ष्यशतक्रतुः । भूयःसम्वर्द्धयामास तद्वर्षंपाकशासनः ॥ ४७ ॥ सोऽश्मवर्षंमहावेगैरिषुभिः पाकशासनिः । विलयंगमयामास हर्षयन्पितरंतथा ॥ ४८ ॥ ततश्चत्पाटय पाणिभ्यांमन्दराच्छिखरंमहत् । सद्रुमंव्यसृजच्छक्रो जघ्नासुःपांडुनन्दनम् ॥ ४९ ॥ ततोऽर्जुनोवेगवद्भिर्ज्वलिताग्रैःराजिह्मगैः । शरैर्विध्वंसयामास गिरेःशृङ्गंसहस्रधा॥५०॥ गिरेर्विशीर्य्यमाणस्य तस्यरूपंतदाबभौ । सार्कचन्द्रग्रहस्येव नभसःपरिशीर्य्यतः॥५१॥ तेनाभिपततादावं शैलेनमहताभृशम् ।शृङ्गेणनिहतास्तत्र प्राणिनःखाण्डवालयाः॥५२॥

इत्यादिपर्वणि खाण्डवदाहपर्वणि देवकृष्णार्जुनयुद्धे
अष्टविंशत्यधिकद्विशतोऽध्याय ॥ २२८ ॥
समाप्तंच खाण्डव दाहपर्व ।

जाननेकी इच्छा से बहुत पत्थर बर्षाने लगे । अर्जुन ने बहुत क्रोधकर उस पत्थर वृष्टिको बाण वृष्टि से रोका । इन्द्र पत्थर वृष्टि को विफल देखकर फिर औरभी अधिक गिराने लगे । इन्द्रनन्दन बडे तेज बाणों से उस भयानक पत्थर-वृष्टि को रोककर पिताका आनन्द बढानेलगे.।४८।अनन्तर महेन्द्रने पाण्डुपुत्रको मारनेकी इच्छासे दोनों हाथोंसे मंदर पर्वतकी वृक्षसहित एक बड़ी भारी चोटी को उखाड कर फेंका । अर्जुन ने अजिह्मग, जलतीहुई नोकवाले बडे तेजबाणों से पहाडकी चोटी को सहस्र खण्डोंमें तोड डाला , आकाश मण्डल से चन्द्र सूर्यादि ग्रह टुकडे टुकडेहो गिरने के काल में जैसे दीख पडते हैं, वह टूटी फूटी पहाडकी चोटी गिरने के काल में वैसेही दीख पडी । उस बडी भारी चोटी के खाण्डववन पर गिर जाने के हेतु उस काल उसकी चोट से बहुतेरे प्राणियों ने प्राण छोड़े ॥ ५२ ॥

again. To learn the extent of Arjun's power he began to shower stones on him, but Arjun angrily checked the shower of stones by the shower of his arrows.46.Seeing his shower of stones fail, Indra let fall another shower yet harder. The son of Indra checked it by his sharp arrows and increased the joy of his father. At last Indra threw down a large peak of mount Mandar together with its trees towards Arjun, but Arjun broke it into a thousand fragments with his sharp pointed arrows. The fragments of the mountain fell down like the falling of stars from the sky. Many lives were lost by the fall of the peak of mountain over the forest of Khandav.52.

अथमय दर्शन पर्व ॥

वैशम्पायन उवाच ॥ तथाशैलनिपातेन भीषिताःखाण्डवालयाः । दानवा राक्षसा नागास्तरक्ष्वृक्षवनौकसः ॥ १ ॥ द्विपाःप्रभिन्नाःशार्दूलाः सिंहाः केसरिणस्तथा । मृगाश्च नहिषाश्चैव शतसः पक्षिणास्तथा । समुद्विग्ना विसस्रुपुस्तथान्या भूतजातयः ॥ २ ॥ तं दावं समुदैक्षन्त कृष्णौचाभ्युद्यतायुधौ । उत्पातनादशब्देन संत्रासितइवास्थिताः ॥ ३ ॥ तेवनंप्रसमीक्ष्याथ दह्यमानमनेकोधा । कृष्णमभ्युद्यतास्त्रञ्च नादंमुमुचुरुल्वणम् ॥ ४ ॥ तेननादेनरौद्रेण नादेनचविभावसोः । ररासगगनं कृत्स्नमुत्पातजलदैरिव ॥ ५ ॥ ततःकृष्णोमहाबाहुः स्वतेजोभास्वरंगहत् । चक्रंव्यसृजदत्युग्रं तेषांनाशायकेशवः ॥ ६ ॥ तेनार्त्ताजातयःक्षुद्राः सदानवनिशाचराः । निकृताःशतशःसर्वा निपेतुरनलंक्षणात् ॥ ७ ॥ तत्राहश्यन्ततेदैत्याः कृष्णचक्रविदारिताः । वसारुधिरसंपृक्ताः सन्ध्यायामिवतोयदाः ॥ ८ ॥ पिशाचान्

अध्याय २२९ ॥

वैशम्पायन ने कहा, कि अनन्तर खाण्डव वन के रहनेवाले दानव राक्षस सर्प ऋक्ष भेडिये उन्मत्त हस्ती केशरी सिंह, बाघ और दूसरे वनैले भूत उस पहाडके गिरने से भय खाकर भागने लगे । २ । और श्रीकृष्ण तथा अर्जुन को अस्त्र उठाये और उस वनको सब ओर बडे शब्द से डोलता हुआ देखा । तब वे वनको चारों ओर से जलते और श्रीकृष्णको अस्त्र मारते देखकर बडा भयानक शब्द करने लगे ।४। उन सब वनैले जीवोंके भयानक शब्द और अग्निकी चट चटाहटसे आकाश मण्डल ऐसा गूंजने लगा, कि जैसे मेघ गर्जनसे गूंजे । अनन्तर महाभुज श्रीकृष्ण ने उनको मारने के लिये अपने तेजसे जलताहुआ अति ऊंची नोकवाला बडा भारी चक्र उठाया ।६। उस चक्र से दानव निशाचर आदि वे सब जानवर भय खाकर टुकडे २ हो उसी क्षण अनल के मुख में जा गिरे । दैत्यगण श्रीकृष्णचन्द्रके चक्रसे टुकडे २ हो और चर्बी तथा रक्त

CHAPTER CCXXIX

Vaishampayan said that the *Rakshases*, serpents, bears, wolves, mad elephants, lions, tigers and other animals of the forest were terrified by the fall of the mountain peak and fled, but they found no way to get out on account of the weapons of Shree Krishn and Arjun and began to make a great noise.4. The noise made by the animals and the burning of the forest resembled the roll of thunder. Shree Krishn raised his sharp discus to destroy them and cut them into pieces to be burnt by fire. The Daityas and Danavas, wounded by Krishn, wallowed in blood and looked like thick evening clouds.8. Like Yamraj, Krishn destroyed innumerable birds, Pishaches, serpents and animals and the Pishaches and *Rakshases*

पक्षिणोनागान् पशूंश्चसहस्रशः । निघ्नंश्चरतिवार्ष्णेयः कालवत्तत्रभारत ॥९ ॥ क्षिप्तं क्षिप्तंपुनश्चक्रं कृष्णस्यामित्रघातिनः । छित्त्वानैकानिसत्त्वानि पाणिमेतिपुनःपुनः ।१०। तथातुनिघ्नतस्तस्य पिशाचोरगराक्षसान । बभूवरूपमत्युग्रं सर्वभूतात्मनस्तदा ॥ ११ ॥ समेतानांचसर्वेषां दानवानाञ्चसर्वशः । विजेतानाभवत्कश्चित् कृष्णपाण्डवयोर्मृधे ॥ १२ ॥ तयोर्बलात्परित्रातुं तच्चदावंयदासुराः । नाशक्नुवनशमयितुं तदाभूवन पराङ्मुखाः ॥ १३ ॥ शतक्रतुस्तुसंप्रेक्ष्य विमुखानमरांस्तथा । बभूवमुदितोराजन् प्रशंसनकेशवार्जुनौ ॥ १४ ॥ निवृत्तेष्वथदेवेषु वागुवाचाशरीरिणी शतक्रतुंसमाभाष्य महागम्भीरनिःस्वना ॥ १५ ॥ नतेसखासन्निहतस्तक्षको भुजगोत्तमः । दाहकाले खाण्डवस्य कुरुक्षेत्रंगतोह्यसौ ॥ १६ ॥ नचशक्यौयुधाजेतुं कथंचिदपिवासव । वासुदेवार्जुनावेतौ निबोधवचनान्मम॥१७ नरनारायणावेतौ पूर्वदेवौदिविश्रुतौ । भवानप्य

धारसे नहाकर सन्ध्याकालके गाढे बादलकी भांति दीखनेलगे।८। हे भारत ! वृष्णिनंदन श्रीकृष्ण यमराजकी भांति सहस्रों पिशाच, पक्षी, सर्प और पशु मारते हुए फिरने लगे सर्व भूतोंकी आत्मा श्रीकृष्ण के इसप्रकार पिशाच, उरग, राक्षस आदि को नष्ट करने पर उस काल में उनका आकार बड़ा रूखा जान पड़ने लगा।११।आयेहुए देवों मेंसे एक भी कृष्णार्जुन के युद्धमें जय नहीं पासका । देवों ने जब देखा, कि कृष्णार्जुनके बाहुबल से उस वनको बचाने के लिये दावानल बुझाना उनकी शक्तिसे बाहर है तब वे पीठ दिखाकर चले गये ।१३।हेमहाराज ! अमरों को मुख मोड़ते देख इन्द्र प्रसन्नहोकर केशव और अर्जुनकी प्रशंसा करने लगे । अनन्तर सब स्वर्ग पतियोंके निवृत्त होनेपर महेंद्र को इसप्रकार आकाशवाणी हुई, कि तुम्हारा सखा सर्पराज तक्षक मारा नहीं गया, खाण्डवदाह के काल में वह कुरुक्षेत्रमें गयाथा।१६।हेइन्द्र तुम मेरेवचनसे निश्चयजानना कि कोईभी किसीप्रकारसे वासुदेव अर्जुनका युद्धमें सामना नहीं करसकेगा यह लोग देव

were dreadful to behold. The gods who had come to fight against Krishn and Arjun could not gain victory over them. They turned back when they found that they could not save the forest from being burnt guarded as it was by Krishn and Arjun. The chief of gods, seeing the gods turn back, was much pleased and praised the prowess of Krishn and Arjun.14.At that time Indra heard a heavenly voice saying, " Your friend Takshak has not been burnt as he was in Kurukshetra at the time of burning the forest. Be sure, Indra, no one can encounter Vasudev and Arjun in the field of battle.17. They are the eternal gods Nar and Narayan praised by gods. You yourself know their prowess.18.They are unconquerable by any one throughout the world. These two primeval rishis are worshipped by gods, Asurs, Yakshas, Rakshases, Gandharvas, men, Kinnars

भिजानाति यद्वीर्य्यौयत्पराक्रमौ ॥ १८ ॥ नैतौशक्यौदुराधर्षौ विजेतुमजितौयुधि । अपिसर्वेषुलोकेषु पुराणावृषिसत्तमौ ॥ १९ ॥ पूजनीयतमावेतावपि सर्वैःसुरासुरैः । यक्षराक्षसगन्धर्वनरकिन्नरपन्नगैः ॥ २० ॥ तस्मादितःसुरैःसार्द्धं गन्तुमर्हसिवासव । दिष्टंचाप्यनुपश्यैतत् खाण्डवस्यविनाशनम् ॥ २१ ॥ इतिवाक्यमुपश्रुत्य तथ्यमित्यमरेश्वरः । क्रोधामर्षौसमुत्सृज्य संप्रतस्थेदिवंतदा ॥ २२ ॥ तंप्रस्थितंमहात्मानंसमवेक्ष्य दिवौकसः । सहिताःसेनया राजन्ननुजग्मुःपुरन्दरम् ॥२३॥ देवराजंतदायान्तं सहदेवैरवक्ष्यतु । वासुदेवार्जुनौवीरौ सिंहनादंविनदतुः ॥ २४ ॥ देवराजेगतेराजन् प्रहृष्टौ केशवार्जुनौ । निर्विशङ्कंवनंवीरौ दाहयामासतुस्तदा ॥ २५ ॥ समारुतइवाभ्राणि नाशयित्वार्जुनःसुरान् व्यधमच्छरसंघातैर्देहिनः खाण्डवालयान् ॥ २६ ॥ नचस्म किंचिच्छक्नोतिभूतं निश्चरितुंततः । संच्छिद्यमानमिषुभिरस्यता सव्यसाचिना ॥२७॥

लोक में प्रशंसित पुरातन देव नर और नारायणहैं, इनकाजैसा वीर्य और जितनापराक्रमहै वह तुमभी जानते हो।१८। यह युद्ध में अजेय और दुर्धर्षहैं, इनको पराजय करना सर्वलोकों में किसीकी सामर्थ्य नहीं है । यह दो पुराणऋषिसत्तम, अमर, असुर, यक्ष, राक्षस, गन्धर्व, नर, किन्नर, पन्नग आदि सबों के बडे पूजनीयहैं, सो हेइन्द्र ! तुम देवों के साथ यहांसे लौटजाओ यह खाण्डवदाह विधिपूर्वकहीहुआहै ।२१। तब अमरनाथ इन्द्र वह वचन सचजानकर क्रोध तज देवलोकको गये । हेमहाराज ! देवोंने अपने नाथ इन्द्रको चले जाते देखकर सेनाओंके साथ उनकी राहली । वीर अर्जुन और वासुदेवने सेनागण और इन्द्रको मुखमोडते देखकर सिंहनाद किया । हे महाराज ! इन्द्रके चले जानेपर वे निर्भयहोकर खाण्डववनको जलानेलगे।२५। पवन जिसप्रकार बादलोंकोभगाती है वैसेही अर्जुन देवोंको परास्त कर खाण्डव में रहनेवाले प्राणियोंको मार मारकर फूकने लगे । उन के बाणों से काटे जाकर कोईभी प्राणी वहां से निकल नहीं सका । बडे बडे महाबली प्राणियों का अर्जुन से लडना तो दूर रहा, वे उनकी ओर देखभी नहीं सके ।

and Pannags. Take your army of gods back, Indra. The forest has been burnt properly."21.The chief of gods having heard and believed upon these words went back with a cheerful heart. The army of gods followed their chief. Brave Arjun and Vasudev, seeing Indra return with the army, roared like lion and fearlessly burnt the forest.25.The gods being dispersed like the clouds by the winds, Arjun killed at leisure the animals of the forest and burnt them. No animal escaped death. No living being could resist Arjun who sometimes killed a hundred animals with one arrow. They fell down into fire as if killed by Kal himself without any funeral rites. Innumerable living beings began to weep and cry with grief. Elephants, deer and wolves joind in the cry and terrified the neigh-

नाशक्नुवंश्चभूतानि महान्त्यपिरणेऽर्जुनम् । निरीक्षितुममोघास्त्रं योद्धुञ्चापिकुतोरणे ॥ २८ ॥ शतंचैकेनविव्याध शतेनैकंपतत्रिणाम् । व्यसवस्तेऽपतन्नग्नौ साक्षात्कालता इव ॥ २९ ॥ नचालभन्ततेशर्म रोधःसुविषमेषुच । पितृदेवनिवासेषु सन्तापश्चाप्यजायत ॥ ३० ॥ भूतसंघाश्चबहवो दीनाश्चक्रुर्महास्वनम् । रुरुद्रुर्वारणाश्चैव तथामृगतरक्षवः ॥ ३१ ॥ तेनशब्देनवित्रेसुर्गंगोदधिचराझषाः । विद्याधरगणाश्चैव येच तत्रवनौकसः ॥ ३२ ॥ नत्वर्जुनंमहाबाहो नापिकृष्णंजनार्दनम् । निरीक्षितुंवैशक्नोति कश्चिद्योद्धुंकुतःपुनः ॥ ३३ ॥ एकायनगतायेऽपि निष्पेतुस्तत्रकेचन । राक्षसा दानवानागा जघ्नेचक्रेणतानहरिः ॥ ३४ ॥ तेतुभिन्नशिरोदेहाश्चक्रवेगाद्गतासवः । पेतुरग्नेर्महाकायाः प्रदीप्तेवसुरेतसि ॥ ३५ ॥ समांसरुधिरौघैश्च वसाभश्चापितर्पितः । उपर्याकाशगाभूत्वा विधूमः समपद्यत ॥३६॥ दीप्ताक्षोदीप्तजिह्वश्च सम्प्रदीप्तमहाननः । दीप्तोर्ध्वकेशः पिंगाक्षः पिबन्प्राणभृतांवसाम् ॥ ३७ ॥ तांसकृष्णार्जुनकृतां

अर्जुन कभी कभी एक बाण से सौ प्राणी मारने लगे । वे सब प्राणी मानों साक्षात काल से मारेजाकर और प्राण छोड अग्नि के मुखमें गिरनेलगे।२९। वे न तो नदी तट, न रूखी जगह और न इमान कहींभी मंगल प्राप्ति नहीं कर सके सभी स्थान बडे तापसे तपने लगे । अगणित प्राणी दीन मन से बडी चिल्लाहटके साथ रोने पीटने लगे, हस्ती, हरिण और भेडिये चिल्लाकर रोने लगे, उस शब्द से अति दूरकी गंगाचर और समुद्रचर मछलियां और विद्याधर तथा उन स्थानों के निकट जितने बनवासी थे, सब बहुत भय खागये । हे महाभुज ! किसीका कृष्णार्जुन से लड़ना तो दूर रहा अर्जुन और जनार्दन पर दृष्टि चलानाभी बन नहीं पड़ा।३३।जिन सबराक्षस, दानव और नागोंने एकत्र मिल कर दौडकर भागना चाहा श्रीकृष्ण ने उनको चक्रसे नष्ट किया । वे चक्रके वेगसे सिर कटे, धडकटे बनकर प्राण छोड़ जलतीहुई आग में जा गिरे और दूसरे बडेभारी जीव भी आगके मुंहमें गिरनेलगे।३५। तब अग्नि मांस रक्त और चर्बीसे भलेप्रकार तृप्तहोकर धुआं तज आकाश को चढ गये और पिंगल आखें जीभ, मुख और ऊंचे ऊंचे बालों को

bouring birds aad animals. No one could resist Krishn and Arjun. The Rakshases, Danavas and Nagas,running together to escape from death, were destroyed by Krishn. Cut asunder by chakra, their heads and trunks fell down into fire. Animals of large size were also burnt in the flames.35.Being well-satisfied with the flesh, blood, and fat and becoming free from smoke, Agni rose up to heaven and with pale eyes, tongue, mouth and long hair began to drink the fat of animals. Agni was gratified by Krishn and Arjun. Madhusudan saw the Asur Maya running away from the residence of Takshak and Pavan the charioteer of Agni chasing him with his long

सुधांप्राप्यहुताशनः । बभूवमुदितस्तृप्तः परांनिर्वृतिमागतः ॥ ३८ ॥ तथासुरमयंनामं तक्षकस्य निवेशनात् । विप्रद्रवन्तंसहसा ददर्शमधुसूदनः ॥ ३९ ॥ तमग्निःप्रार्थयामास दिधक्षुर्वातसारथिः । शरीरवानजटीभूत्वा नदन्निववलाहकः ॥ ४० ॥ जिघांसुर्वासुदेवस्तं चक्रमुद्यम्य धिष्ठितः । सचक्रमुद्यतंदृष्ट्वा दिधक्षन्तञ्चपावकम् ॥ ४१ ॥ अभिधावार्जुनेत्येवं मयस्त्राहीतिचाब्रवीत् । तस्यभीतस्वनंश्रुत्वा माभैरितिधनञ्जयः ॥ ४२ ॥ प्रत्युवाचमयंपार्थो जीवयन्निवभारत । तेनभेतव्यमित्याह भयंपार्थोदयापरः ॥ ४३ ॥ तपार्थेनाभयदत्ते नमुचेर्भ्रातरंमयम् । नहन्तुमैच्छद्दाशार्हः पावकोनददाहच ॥ ४४ ॥ वैशम्पायन उवाच ॥ तद्वनंपावकोधीमान् दिनानिदशपञ्चच । ददाह कृष्णपार्थाभ्यां रक्षितःपाकशासनात् ॥ ४५ ॥ तस्मिन्वनेदह्यमाने षडग्निर्नददाहच । अश्वसेनंमयञ्चैव चतुरः शार्ङ्गकांस्तथा ॥ ४६ ॥

इत्यादिपर्वणि मयदर्शनपर्वणि मयदानवत्राणे ऊनत्रिंशदधिक द्विशतोऽध्यायः ॥ २२९ ॥

प्रज्वलित कर जीवोंकी चर्बी पीने लगे । उन कृष्णार्जुनसे मृत पीकर प्रमुदित और तृप्त हो परम सन्तोष प्राप्तकिया । अनन्तर मधुसूदन ने एकायक देखा, कि मय नामक असुर तक्षक के वासस्थान से भागा जाता है और पवन के सारथि अग्नि शरीर लेकर और जटाधर के बादल के समान शब्द करते हुए उसको पकडनेकी इच्छा कर रहे हैं । ३९ । तब वासुदेवजी उसको मारने के लिये चक्र उठाकर खडेहुए । मयदानवने उनको चक्र उठाते और अग्निको निगलनेकी इच्छा पर आते देखकर कहा, कि हे अर्जुनदौडो, मुझे बचाओ अर्जुन उसका वह करुणास्वर सुनकर मानों जीवन देकरही बोले, कि मत डरो, वह दयाशीलथे, सो मयको ढाढस दिया । अनन्तर अर्जुन के नमुचि के भाई उस दैत्यको ढाढस देनेपर दाशार्ह श्रीकृष्ण ने फिर उसे मारना नहीं चाहा, और अग्निभी जलानेको प्रवृत्त नहीं हुए । वैशम्पायन ने कहा, कि धीमान हुताशनने अर्जुन और श्रीकृष्ण द्वारा इन्द्रसे रक्षित होकर पन्द्रह दिनमें उस बनको जलाया । उस बनके जलानेके काल में अग्नि ने केवल अश्वसेन मय और शार्ङ्गकनामक चार पक्षी इन छओंको नहीं जलाया । ४६ ।

hair and roar like that of thunder. Vasudev stood ready to destroy him with his discus. Maya saw that Vasudev was ready to kill him with his discus and Agni ready to swallow him and he called Arjun to protect him. Arjun heard his cry and gave him life by saying 'Donot fear.' Being kind hearted, Arjun reassured him. Upon this Krishn and Agni desisted from killing and burning him. Vaishampayan said that being protected from Indra by Krishna and Arjun Agni burnt the forest in fifteen days. During this time Agni burnt all the living beings except Ashwasen, Maya and four birds called Sharangak 46.

जनमेजय उवाच । किमर्थं शार्ङ्गकानग्निर्न ददाहतथागते । तस्मिन्वनेदह्यमाने ब्रह्मन्नेतद्भवक्ष्यसि ॥ १ ॥ अश्वसेनस्य दानवस्यमयस्यच । कारणंकीर्तितंब्रह्मन् शार्ङ्गकाणांनकीर्तितम् ॥ २ ॥ तदेतदद्भुतंब्रह्मन् शार्ङ्गकाणामनामयम् । कीर्त्तयस्वाग्निपस्मद्दे कथयन्तेनविनाशिताः ॥ ३ ॥ वैशम्पायन उवाच । यदर्थंशार्ङ्गकानग्निर्न ददाहतथागते । तत्तेसर्वंप्रवक्ष्यामि यथाभूतमरिन्दम ॥ ४ ॥ धर्मज्ञानांमुख्यतमस्तपस्वी संशितव्रतः । आसीन्महर्षिः श्रुतवान्मन्दपालइतिश्रुतः ॥ ५ ॥ सुमार्गमाश्रितोराजन्नृषीणामूर्ध्वरेतसाम् । स्वाध्यायवान धर्मरतस्तपस्वी विजितेन्द्रियः ॥ ६॥ सगत्वातासःपारं दहमुत्सृज्यभारत । जगामपितृलोकाय नलेभेतत्रतत्फलम् ॥ ७॥ सलोकानफलानदृष्ट्वा तपसानिर्जितानपि । पप्रच्छधर्मराजस्य समीपस्थानदिवौकसः ॥८॥ मन्दपाल उवाच । किमर्थमाहृतालोका ममैतेतपसार्ज्जिताः । किंमयानकृतंतत्र

अध्याय २३० ॥

जनमेजय बोले, कि हे ब्रह्मन् ! यह बतलाओ, कि उस वनके जलाने के समय उस दशा में अग्नि ने क्यों शार्ङ्गक पक्षियों को नहीं जलाया, अश्वसेन और मयदानव जिन उपायों से नहीं जले वह आपने कह सुनाया है, पर चार शार्ङ्गकों के न जलने का कारण नहीं कहा। हे ब्रह्मन् ! शार्ङ्गकोंका बचना मुझको अचरजसा जान पडताहै, कहो कि वे उस अग्निदाहसे क्यों नहीं मरे। वैशम्पायन ने कहा, कि हेशत्रुदमन ! उस दशा में हुताशन ने जिस कारण शार्ङ्गकों को नहीं जलाया वह आप से कहताहूं, सुनो। हे महाराज ! मन्दपाल नाम प्रख्यात तपस्वी विद्वान व्रतशील धर्म के जानकार अति श्रेष्ठ एक महर्षिथे। वह स्वाध्याय में नियुक्त और जितेन्द्रिय होकर सदा तपस्या और धर्म करते थे। वह ऊर्ध्वरेता ऋषियोंकी बाट से चलकर तपस्या के दूसरे पारको उतर गये थे। हे भारत ! जब वह देहछोडकर पितृलोक को गये तब बटोरी हुई तपस्याका कोई फल प्राप्त नहीं हुआ। उन महर्षिने अपनी कठोर तपस्या से उपार्जन किये हुए लोक में

CHAPTER CCXXX

Janmejaya said, "Let me know, Brahman, why Agni didnot burn Sharangak birds. You have already told me how Ashwasen and Mayadanav escaped from being burnt, but have said nothing yet about the four Sharangaks. I am amazed at their escape. Please tell me why they did not die." 3. Vaishampayan replied, "Hear the story of the escape of Sharangaks: There was a great sage, named Mandpal, a learned man, vow observing and virtuous. He was always engaged in asceticism, doing good, and study. He led the life of chastity and walking in the way of celibate rishis he had completed his asceticism. When, however, he went after death to the region of Pitris he did not get the reward of his asceticism.7.

यस्यैतत्कर्म्मणःफलम् ॥ ९ ॥ तत्राहंतत्करिष्यामि यदर्थमिदमाहृतम् । फलमे तस्यतपसः कथयध्वंदिवौकसः ॥ १० ॥ देवा ऊचुः । ऋणिनोमानवाब्रह्मन् जायन्तेयेनतच्छृणु । क्रियाभिर्ब्रह्मचर्य्येण प्रजयाचनसंशयः ॥ ११ ॥ तदपाक्रियतेसर्वं यज्ञेनतपसासुतैः । तपस्वीयज्ञकृच्चासि नचतेविद्यतेप्रजा ॥ १२ ॥ तइमेप्रसवस्यार्थे तवलोकाःसमाहृताः । प्रजायस्वततो लोकानुपभोक्ष्यसि पुष्कलान् ॥१३॥ पुन्नाम्नो नरकात् पुत्रस्त्रायतेपितरंश्रुतिः । तस्मादपत्यसन्ताने यतस्वब्रह्मसत्तम ॥१४॥ वैशंपायन उवाच । तच्छ्रुत्वामन्दपालस्तु वचस्तेषांदिवौकसाम । कनुशीघ्रमपत्यंस्याद्बहुलं चेत्यचिन्तयत् ॥१५॥ सचिन्तयन्नभ्यगच्छत् सुबहुप्रसवान्खगान । शार्ङ्गिकांशार्ङ्गिकोभूत्वा जरितांसमुपेयिवान् ॥ १६ ॥ तस्यांपुत्रानजनयच्चतुरो ब्रह्मवादिनः । तान

न जाने पर धर्मराजके निकट देवोंसे पूछा, कि मेरी तपस्या से उपार्जन कियाहुआ पुण्य लोक क्यों रुका है ? जिन कर्मों के करने से इन सब पुण्यलोकों में जायाजाताहै क्या मैंने उन कर्मों को नहीं किया है ? हे देवगण ! आप कहें, कि क्यों मेरी तपस्या का फल रुका हुआ है, मैं उस के करनेको प्रस्तुत हूं ।१०।देवोंने कहा, कि हे ब्रह्मन् ! सुनो इस में संदेह नहीं कि मानवगण क्रिया, ब्रह्मचर्य और सन्तान उपजाना इन सबका ऋणीबनकर जन्म लेता है यज्ञ, तपस्या और पुत्रोत्पादन इन तीन कर्मोंसे वह ऋण चुकता है तुम ने बहुत तपस्या और यज्ञ किया है, पर तुम्हारे सन्तान नहीं है सो यह सब पुण्यलोक तुम्हारेलिये रुके हैं तुम पुत्र उपजाओ, तो इन श्रेष्ठ लोकोंको भोगनेपाओगे । हेब्रह्मश्रेष्ठ ! श्रुति है, कि पुत्र पिताको पुन-नामक नरकसे बचाता है, सो तुम पुत्र उपजानेका प्रयत्न करो।१४।वैशम्पायन ने कहा, कि अनन्तर मन्दपाल देवोंका वह वचन सुनकर सोचनेलगे कि किसयोनि में जन्म लेनेसे शीघ्र अधिक सन्तान उपजसकती हैं अनन्तर उन्होंने यह सोचकर कि पक्षियोंकी स्वल्पकाल में बहुत संतान होती हैं, शार्ङ्गक पक्षी बनकर जरिता नाम शार्ङ्गिका से मिलकर चार ब्रह्मवादी पुत्र उपजाये । अनन्तर वह अण्डे से

The Maharshi, not being able to enter the region obtained through asceticism, asked the gods in the presence of Dharmraj, "Please let me know the reason of obstruction to the way of my going to the region acquired by my asceticism. Have I not done the deeds by which people enter those holy places ? Let me know, gods, why the reward of my asceticism is withheld from me. I am ready to do anything for it."10.The gods replied, "Human beings, no doubt, are born with debts of celibacy and the bringing forth of offspring. You have performed severe asceticism and offered sacrifices, but you have no progeny, hence you cannot enter these holy places.13.Without bringing forth offspring you cannot enjoy these regions. The Vedas say that a son saves the father from the hell called Pun.

पास्यसतत्रैव जगामलपितांप्रपि ॥ १७ ॥ बालानसतानण्डगतान सहमात्रामुनिर्वने। तस्मिन्गतेमहाभागे लपितांप्रतिभारत ॥ १८ ॥ अपत्यस्नेहसंयुक्ता जरितावहुचिन्त यत् । तेन त्यक्तानसन्त्याज्यानृषीनण्डगतानवने ॥ १९ ॥ नजहोपुत्रशोकार्त्ता जरिताखाण्डवेसुतान् । बभारचैतानसञ्जाताम् स्वतृत्यास्नेहविह्वला ॥ २० ॥ ततोऽग्निं खाण्डवं दग्धुमायान्तंदृष्टवानृषिः । मन्दपालश्चरंस्तस्मिन् वनेलपितयासह ॥ २१ ॥ तंसंकल्पंविदित्वाग्नेर्ज्ञात्वापुत्रांश्चबालकान् । सोऽभितुष्टावविप्रर्षिर्ब्राह्मणो जातवेदसम्। पुत्रान्प्रतिवदनभीतो लोकपालंमहौजसम् ॥ २२ ॥ मन्दपाल उवाच । त्वमग्नेसर्व-लोकानां मुखंत्वमसिहव्यवाट् । तमन्तःसर्वभूतानां गूढश्चरसिपावक ॥२३॥ त्वामे-कमाहुः कवयस्त्वामाहुस्त्रिविधंपुनः । त्वामष्टधाकल्पयित्वा यज्ञवाहमकल्पयन् ॥२४॥

उपजे हुए बच्चोंको उनकी माताके साथ उस वनही में छोडकर लपिता के पास गये । हे भारत ! उन महाभाग के लपिताके पास चलेजाने पर जरिता पुत्र स्नेहसे कातरहो अनेक प्रकारकी चिंता करने लगी । ऋषि के उसखाण्डववनमें उन अण्डोंमें स्थित बच्चों को छोडने परभी जरिता पुत्र शोकसे कातरहोकर त्यागनेके अयोग्य उन बच्चोंको छोड़ नहीं सकी, उनको स्नेहसे अपनीवृत्ति अवलम्बकर पालने लगी।२०।अनन्तर ऋषि मन्द पालने लपिता के साथ उस वन में चरते हुए देखा, कि अग्नि खाण्डववन जलाने को आरहा है, ब्रह्मके जानकार विप्रर्षि महातेजस्वी मन्दपाल जातवेदाका वह अभिप्राय समझ कर अपनी संतानों को बालक जानकर उन के लिये उन से विनय करनेकी इच्छा से भयखाकर स्तव करनेलगे।२२।कि हे अग्ने!तुम सर्वलोकोंके मुखस्वरूप हुएहो, तुम हवन के पदार्थ ग्रहणकिया करते हो । हे पावक ! तुम सर्वलोकोंके हृदय में छिपकर चराकरते हो । कविगण तुमको अद्वितीय कहा करते हैं, और तीनप्रकारकाभी कहते हैं तथा तुम को अष्टधा कल्पना करके यज्ञ किया करते हैं ।२४। हेहुताशन ! परमर्षिगण कहतेहैं, कि

You must, therefore manage to bring forth a son." Vaishampayan said that having heard this from the gods, Mandpal reflected for awhile as to the shape in which he can bring forth the greatest number of offspring in the shostest time. At last he chose to become a bird of the genus Sharangak and produced four virtuous young ones by the union of a female bird of the same tribe, named *Jarata*. Before the bursting forth of the eggs, he left them in the charge of their mother and went to Lapita.17. After his departure, *Jarita* was very sorry for her offspring but could not leave them alone. She brought them up affectionately. Rishi Mandpal, walking with Lapita, saw Agni coming to burn the forest. He feared much for the safety of his offspring and began to praise him saying, 22. "Agni, you are the mouth of all the world, you receive sacrifices, you remain hid-

त्वयाविश्वमिदंसृष्टं वदन्तिपरमर्षयः । त्वदृतेहिजगत्कृत्स्नं सद्योनश्येद्धुताशन ॥२५॥ तुभ्यंकृत्वानमोविप्राः स्वकर्मविजितांगतिम् । गच्छन्तिसहपत्नीभिः सुतैरपिचशाश्वतीम् ॥ २६ ॥ त्वामग्निंजलदानाहुः खेविषक्तानसविद्युतः । दहन्तिसर्वभूतानि त्वत्तो निष्क्रम्यहेतयः ॥ २७ ॥ जातवेदस्त्वयैवेदं विश्वंसृष्टंमहाद्युते । तवैवकर्मविहितंभूतं सर्वंचराचरम् ॥२८॥ त्वयातपोविहिताःपूर्वं त्वयिसर्वमिदंजगत् । त्वयिहव्यञ्चकव्यं च यथावत्सम्प्रतिष्ठितम् ॥ २९ ॥ त्वमेवदहनोदेव त्वंधातात्वंबृहस्पतिः । त्वमश्विनौयमौमित्रः सोमस्त्वमसिचानिलः ॥ ३० ॥ वैशम्पायन उवाच । एवंस्तुतस्तदातेन मन्दपालेनपावकः । तुतोषतस्यनृपते मुनेरमिततेजसः ॥३१॥ उवाचचैनंप्रीतात्मा किमिष्टंकरवाणिते । तमब्रवीन्मन्दपालः प्रांजलिर्हव्यवाहनम् । मदहनखाण्डवंदावं

तुम्हीं ने संसारको रचाहै, और तुम्हारे न रहने से आजही जगन्मण्डल नष्टहोता । ब्राह्मणगण तुम्हीं को प्रणामकर स्त्री पुत्रोंके साथ शाश्वत लोक को जय करके उस में आते हैं ।२६ हेअग्ने ! पण्डितलोग तुमको विद्युतके साथ आकाशमें स्थित मेघ कहतेहैं । हेपावक ! तुम से शिखा निकलकर सर्व भूतों को जलाती है । हेमहाद्युते ! कर्मोंका विधान करनेवाला वेद तुम्हाराही वचनहै, और यह सब स्थावर जंगम आदि जीवातुम्हींसे बने हैं ।२८। हेअग्ने ! पहिले तुम्हींमें जलका विधानहै, यह सम्पूर्ण जगत तुम में स्थितहैं और सम्पूर्ण हव्यकव्य तुम्हीं को आश्रय कर विद्यमानहैं । हे देव ! तुम्हीं दहन, तुम्हीं विधाता, तुम्हीं बृहस्पति, तुम्हीं दोनों अश्विनीकुमार, तुम्हीं अर्क, तुम्हीं सोम और तुम्हीं पवनस्वरूपहो ।३०। वैशम्पायन ने कहा, कि हेमहाराज ! अति तेजस्वी मन्दपाल मुनि के इसप्रकार अग्निकी स्तुति करनेपर अग्नि उनपर प्रसन्नहुए और प्रीति पूर्वक उनसे कहा, कि बोलो तुम्हारा अभीष्ट क्याहै, मैं पूरा कर देता हूं । मन्दपाल दोनों हाथजोड

den in the breasts of all, poets call you matchless, they also call you 'of three kinds' and 'eight kinds' and offer sacrifices to you. Maharshis say that you are the creator of the world and without you no one can live. Brahmans bow to you and gain the eternal world with their wives and children. The learned say that you are cloud and stay in the sky with lightning. Your flames burn all things. The Vedas containing the manner of work are uttered by you. You are the maker of all moveables and immoveables. Water was at first contained in you and you are the supporter of all world. Sacrifices to gods and manes are offered through you. You are Dahan Vidhata, Vrihaspati, Aswinikumar, Ark, Som and Pavan ! 30. Vaishampayan said that Agni was gratified by the entreaties of Mandpal and spoke to him kindly, saying, " Please let me know your desire and I shall satisfy it." With joined hands Mandpal said, " Donot burn

ममपुत्रानविसर्ज्जय ॥ ३२ ॥ यथेतितत्प्रतिश्रुत्य भगवानहव्यवाहनः । खाण्डवेतेन कालेन प्रजज्वालदिधक्षया ॥ ३३ ॥

इत्यादिपर्वणि मयदर्शनपर्वणि शार्ङ्गकोपाख्याने त्रिंशदधिकद्विशतोऽध्यायः ॥२३०॥

